CC0. In Public Domain, Digitizagtion by eGangotri

Vanamali Sanjivni by Vanmali Bhatta ✓

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

RECORD NO 129	LANGUAGE Sanskrit
ROLL NO. 9 Date of Filming 3-12-95	
ACC NO. 18808	SCRIPT Devanagri
CATNo. —	
Bundle No.	
DEC NO. /R. NO.	MATERIAL Paper
DESCRITIVE CATALOGUE/TRIENNIAL CATALOGUE VOLUME : —	
AUTHOR JAYADEVA	NO OF FOLIOS ~~PAGES~~ 92
TITLE GĪTAGOVINDA	COMPLETE/~~INCOMPLETE~~
	DATE —
WITH OR WITHOUT COMMENTARY With commentary by Vanamali Bhatta	REMARKS Not yet catalogued; comm. Vanamalisanjivini
SUBJECT Laghukāvya	LOCATION Vrindaban Research Institute VRINDABAN

Dr. Urmila Sharma Collection, Varaṇasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णायनमः श्रीराधावरगिरिवरचंद्रोजयति स्थिराणांजंगमानांचयेनसृष्टिर्निरूपिता सर्वेशायनमस्तस्मै
कृष्णायजगदात्मने ॥१॥ भूयाज्जडायमनवतांकृष्णःकमललोचनः कालिंदीकेलिसंहृष्टोमेघश्यामोऽतिसुंदरः
॥२॥ लीलाह्यनादिसंसिद्धागिरिचंद्रविहारिणः जयदेवद्विजद्वाराचतुर्ष्वप्रकाशिता ॥३॥ श्रीमद्गिरिवराधीशंवृंदार
ण्यपुरंदरं कृष्णचंद्रंप्रपद्येहंमत्कानुग्रहकारकं ॥४॥ श्रीकृष्णदेवकरुणायतिलब्धविद्यःश्रीविठ्ठलेशकृपयाप्तभक्ति
शास्त्रभक्तिः गोविंदगीतविवृतिंवनमालिनामसद्दस्तनोतिसुकृतीत्रिवदामस्तुः ॥५॥ ग्रंथोयंजयदेवोक्तोव्याख्या
तोविमलाशयैः गोविंदजयदेवोक्तोनेतरैर्वनमालिना ॥६॥ टीकाशतंकविवरैःकृतमेवरम्यंयद्यस्तिमेतदपिनोवि
पुलःप्रयासः राकाक्षिपेसमुदितेप्यथकिंप्रदीपोनापेक्षतेनवनकोणतमोनिवृत्त्यै ॥७॥ सर्वस्नेहरसांबुधिप्रमथ्य
नप्रोद्भूतलीलाकृतिःश्रीराधोत्पललोचना [illegible] प्रसमरप्रसंगगौरच्छटा सर्वानंदरसैकसारसुलसंन्यस्तांबुदा भ्रजां
डंबरःकृष्णश्चांबुजलोचनस्तदुभयंवर्वर्त्तिसर्वोपरि ॥८॥ राधाक्रियाखाललिताजयंतीविजयाजया सुमुखीसुभगा
चेतिराधासख्यःप्रकीर्त्तिताः ॥९॥ ग्रंथादौमहाकविनृपचक्रचूडामणिःश्रीजयदेवःस्वज्ञानसर्वस्वसारनिश्चितं
प्रारंभनिर्विघ्नसमाप्तिकारणंश्रीराधाधवरतिरूपवीजंवस्तुमहामंगलमाचरति ॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रात्रौ मेघैरिति श्रीकृष्णानुज्ञा सहचरी श्रीराधा नाम्नो बहुभाषिमित्वादेष्यां कथमिति हे राधे नंदनाम्नोक्तिं तमाधिके यमुनाकू
लेकलिंदतनयातटेनकौरा धामाधवयोश्चैत्रवैशाखयोः केलयः क्रीडाप्रकारा यत्र जयंति तद्द्वहो गृहमेकांतकुंजकेलि
मंदिरे रह इति कामिनो बिनोदस्थानं रागिणां वा संत इमं श्रीकृष्णं इमाश्च श्यामाः किशोरी त्वमेव तु युगपत्त्वं प्रापयेम
न्वयः शृंगारे नायिकायाः प्राधान्यं चैत्रवैशाखयोरस्मिन्नेन बसंतकालोपिकामिनां केलिपुष्पपर्थे लक्षितः कीदृशः केल

मेघैर्मेदुरमंबरं बनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय

यः वनस्तु बः वृंदाबनस्य संबोधिन्यः कीदृशयोः नंदनिदेशतः नंदन्याः जयंत्याः देशतो निकटतो नंदनायः श्राय
मीयः निदेशातः संदेशतो बाऽध्वस्य ध्वाविश्वस्यास्तु नायेकुं जद्रुमास्ताप्रतिचलितयोः प्रकटितसोऽत्रापययोः कीदृशं
गृहं बरं श्रेष्ठं कीदृशं भीरुरयं भीरूणां काम यानानां रयोगमवेशो यत्र कीदृशं मेघैर्जलदैर्मेघाद्दशौर्गाढांधकारैर्वा त
मालद्रुमैः श्यामदृष्टैश्च मेदुरस्निग्धम् श्रीकृष्णविशेषणानि च कीदृशः श्रंबरे नवानरसमोत्कारं कीदृशं मेघैस्तमा
लद्रुमैश्च मेदुरा स्निग्धनारदपुंजश्यामलांगं भीरुरयं भीरूणामभिसारिकाणां रयोरान्नस्यस्मित मात्रेण यस्मात्तम् स्वथ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० वा राधामाधवयोः रहःकेलयश्च निमारोत्सवकारिण्य एकांतक्रीडा जयंति सर्वोत्कर्षेण वर्त्तंत इति नंदयति हर्षयती
२ ति नंदः सुरतारंभः तस्य निदेशः प्रेरणमिति केचन यत्तु नंदाज्ञा निप्राप्य व्याख्यानं तदसंतमनौचित्यादुपेक्ष्य कीदृशयोः
अध्वध्वनि प्रत्यासन्ना ये कुंजद्रुमाश्च तान्प्रति इत्थं चलितयोः इत्थं कथमिति मेघैर्मेदुरं स्निग्धं अंबरं तमालद्रुमैश्च व
नभुवः श्यामास्तस्मादिमं गृहं त्वमेव प्रापय तत्राप्ययं नक्तं रात्रौ भीरुः भयशीलः ननु सर्वतास्तामिरघुजे कुंजे कथं व्रजामी
तिज्ञं रपोक्तिः किंतु त्वमग्रतो व्रज तव पश्चात्गो छलितानंतमीरछटाभिर्धूतो ध्वतमसि मार्गे श्यामो प्ययं सुखं व्रजेदिति भा

इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः १

सर व

वःलत्तणेत्थंभूते सनेन कर्मप्रवचनीययोगे द्वितीया श्यामा इति गौरत्वादुज्ज्वलवर्णं नक्तं रात्रौ व्रते चेति देशो निकटाज्ञयोरि
तित्रिलोचनः भीरुः स्यात्कातरे पुंसि कामयाने वियोषिति इति महोदधिः श्यामा स्यादप्रसूतास्त्री श्यामा षोडशवार्षिकी सपि
वरः श्रेष्ठेन वरसास्वादके परिनेतरीति पादवंसूः प्रकारे चंचायां धरण्यां संनवेपि चेति मेदिनी कारः अकारो ब्रह्मविष्णुईशमा
न्यादिवनेकार्यः राधो वैशाखमासे स्याद्राधा गोप्यां चेति विश्वः वैशाखे माधवो राध इत्यमरः १ २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननुजयदेवस्यपुरुषत्वाद्गोप्यकेलिकथनेकथमधिकारइत्याशिष्यस्वस्यस्तत्वंनिराकुर्वन्नग्निसारात्वंप्रबंधं
स्वप्रौढिनिरूपणेनैवविस्तारयतिश्रीराधानुग्रहंचप्रार्थयते वाग्देवतेतिजयः श्रीकृष्णः देवोयस्यसएवकविःकाव्यक-
र्त्ताएतंप्रबंधंकरोतीत्यन्वयः प्रबंधश्चिह्नंभोजे शृंगारैकप्रधानोयोगात्तालादिसंयुतः अग्निसाराख्यपुराणः प्रबंधःसप्रका
कीर्त्तितःप्रकर्षेणबंधोन्योन्यासक्तिरूपोनायकनायिकयोर्यत्रसप्रबंधः कीदृशम् श्रीशृंगारजोनामसंपत्तिःकृदितःका

वाग्देवताचरितचित्रितचित्तसद्मापद्मावतीचरणचारणचक्रवर्ती

स्यापरं

तिरूपाराधैवयाचप्रस्तुतातद्योक्तंश्रीभागवते पञ्चतरानन्नयत्कोशलानद्विवं द्यौःकृदितः स्वर्गोज्ञायतेद्योतनतइतिद्यौःवैकुं
ठस्तद्वदत्रापिश्रीराधैवज्ञातव्या वसुधुश्रषासुदाव्यतातिवसुदेवोनंदोवासुदेवस्तयाराधयासहितोवासुदेवस्तस्यया रतिः
केलयःस्तेहक्रीडाप्रकारास्तासांयाःकथाश्चतुःषष्टिबंधात्मिकास्ताभिःसमेतयुक्त कीदृशः वाचांदेवताश्रीकृष्णस्तस्यचरि
तंरासात्मिकालीलावैदग्ध्यंवातयातेनवाचित्रितंमंडितंकामोद्बोधकप्रकारान्वितंवाचित्तमतःकरणमेवसद्मयगृहंय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० स्पृसः तच्चोक्तं श्रीभागवते सा वाग्यया तस्य गुणान् गृणीत इत्यनेनान्यत्र वाग्देवत्वं निरस्तं गृहमपि विविधोथक
३ रणैश्चित्रितं भवति तद्वदस्या अपि भगवद्गुणचित्रैरलौक्कियते प्रवेशमात्रेण पवित्रीकृतं बद्धमानस्नेहेन लिखितं बि
विधकेलिप्रदर्शनेन प्रकाशनेन वा चित्रितमिति भावः कीदृशाः पद्मावती नामस्वस्य प्रमदा ईः कामो वास्या स्तस्य बा
वरणपोश्चारणेन तस्य निपुणता रूपेण तेन वक्रवर्तीन्नृपराजो नटराजो वासुदेवः शृंगारित्वात् एतेन कवेः शृंगारित्वं

श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधम् २

स्मवितं यद्यानि क्रीडार्थं यत्र सा पद्मावती अथवा सौंदर्यसौभाग्यद्योतकं सामुद्रकशास्त्रोक्तं पद्मं वा हस्ते पस्याः सा पद्मा
वती श्रीराधा तस्याश्चरणयोश्चारणः सेवकतयात्मानं वेदनं तत्र चक्रः सेवकसमूहस्तद्वर्तित्वं शीलं यस्य स तथोक्तं च शृंगारी
चेत्कविः काव्ये तदा रसमयं जगत् स एव वेद शृंगारी तदा विरसता व्रजेदिति श्लेषोक्तिरलंकारः आलेख्याश्चर्ययोश्चित्रमि
समरः काविः काव्यकरे शूरे चेति विश्वः वक्रः कोके चुजे पुंसि क्लीबे सैन्यरथांगयोरित्यपि गृहं गेहोदवसितं वेश्म सद्म निकेत ३
री तनमित्यरः सया पद्मे सादिवं धातुप सौंधमिति ईक्षामरसेकान्तरे २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंतावद्विघ्नघ्नप्रवृत्त्यर्थमन्यवाक्योपेक्षयास्वकाव्योत्कर्षंप्रथयन्गीतगोविंदश्रवणेश्रोतॄणांप्रोत्साहयति
यदीति हेवदाःबहुपुण्यप्रदाः यदिहरिस्मरणेश्रीकृष्णस्मरणेमनश्चित्तंसरसंसानुरागंवस्तुप्रयुक्तंरसःशृंगाररसःतत्सहि
तंवासाभिलाषंवातदाजयदेवसरस्वतींगीतगोविंदरूपांवाचंशृणुतेसन्वयः मनस्तत्कर्तुंसाभिवांछातदास्वादरेण
शृणुतधारयत तच्छ्रवणमेवतद्देवकरिष्यतीतिभावः किंच यदिविलासःकलानांप्रतितिथिंकेशाद्यधोगास्पर्शोश्वर

यदिहरिस्मरणेसरसंमनोयदिविलासकलासुकुतूहलं

तोर्द्धचरतिकोशोक्तस्यकलासुचतुःषष्टिक्रीडासुकुतूहलंकौतुकं विलासलक्षणंरतिकोषोक्तंग्रंथविस्तर
भयान्नलिखितं कीदृशीम् मधुरामिष्टाःश्रीराधाशृंगारप्राधान्यात् कोमलामुल्लापणयपूर्वकश्रीकृष्णवच
नसंयुक्तत्वात् कांताकमनीयांस्निग्धसहचर्यादिवचनयुक्तत्वात् तत्पदानामावलीपरंपरायस्यास्तां कर्म
धारयःसमासः मधुरंयथा मधुरेरसवत्वाचिवस्तुन्यपिरसस्थितिः येनमाद्यंतिधीमंतोमधुनेवमधुव्रता इति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰टी॰ दंडी सुकुमारं यथा सुप्रयोगैर्महत्त्वहेतुर्युक्तमस्पष्टसंधिभिः सुकुमारार्थसंयुक्तं सुकुमारं प्रचक्षते कांतं यथा
४ यन्मनःश्रोत्रविषयादं प्रहलादजनकं भवेत् शब्दवेधातुयोगेन तत्कांतमभिवक्षतइत्यपि तत्सर्वमन्यकवीनां
काव्येसाधारणम् अत्रत्वसाधारणं राधाकृष्णदूतीनामेतत्सर्वं अतोजयदेवसरस्वतीसर्वश्रेष्ठाशृणुतेतिभा
वः कलास्याचंद्रकलायाम् कलास्यात्क्रीडनादिविति विश्वः दीपकोयमलंकारः तल्लक्षणं शिशुबोधे प्रस्तु

मधुरकोमलकांतपदावलींशृणुतदाजयदेवसरस्वतीम् ३

तौचितमंवर्द्धियहैकैः सहसंगतिम् दधानंदीपयत्यर्थान्दीपकंतदुदाहृतम् एवमेतैःश्लोकैर्विषयप्रयोजनसंबंधा
धिकारिणोदर्शिताः तत्ररहःकेलयइतिविषयः यमुनाकूलइत्यधिकरणम् राधामाधवयोरितिबसंतकालसम
यः सद्भक्तिरितिप्रयोजनं प्रतिपादकप्रतिपाद्यरूपःसंबंधः श्रीराधाकृष्णरसभावितांतःकरणएवाधिकारीसेवस ४
वोनिक्रीडासाधनानिनिरूपितानि ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं स्वसरस्वतीप्रामाण्योत्कर्षाय केनचिद्भागवतोत्तमेन कविराजसभायां बाल्लीतं पद्यं संगृह्णते कविनानेले
तन्नानागुणसंयुक्तापि सरस्वती लक्ष्मणसेनमहानृपतिवरसभायामुमापतिधरादीनां कवीनामप्यस्तिसा किं
नश्रोतृणां श्रवणरतिजनके साह वाचइति उमापतिधरसंज्ञो लक्ष्मणसेनमंत्री वाचः वाणीः पल्लवयति विस्तारय
ति तथा तस्यापि काव्यं व्यंग्यार्थशून्यं शब्दविचित्रार्थगुणशून्यमपि नरत्नचतुरसदयाह्लादजनकमिति भावः तथा धमं

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानाते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः

वराजसभायां शरणइतिनामा कश्चित्कविर्दुरूहस्य गूढार्थस्य द्रुतेः शीघ्रोच्चारणतः श्लाघ्यस्तुत्यः तथा चास्य कवेः का
व्यं गूढार्थत्वादिदोषसहितं प्रसादानुग्रहरहितं चेति अत एव न विद्वज्जनमनोरतिजनकमिति ध्वनितम् तथा च शृंगारो
त्तरस्य सत्समेयस्य शृंगाररस एव उत्तरः श्रेष्ठो यत्र शृंगारेणोत्तरं मुख्यं यासमेय मुत्तमं वस्तु तस्य रचनैः कवितायां मुख्य
प्रकथने राचार्य गोवर्द्धनाचार्येन सह स्पर्द्धी वात्र कोपि विश्रुतो न विख्यातः शृंगाररसमुख्यरचनायामेव तस्य प्रौढ्रसं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰टी॰ तरकथनेसोप्यसमर्थएवअतस्तत्कवित्वंनसज्जन[redacted]हृदयगामकमितिभावः आचार्यपदमुपहासार्थं धो
यानामाकविःक्ष्मापतिःकविराजःश्रुतिधरःश्रवणमात्रग्राहीश्रुतार्थधरोवानतुतस्यकविरचनायांस्वा
५ कौशलंउच्चारितमात्रग्राहकइतिभावःक्ष्मापतिरप्यहंनाहंकारकथनायराजोपमानतुकविगणनातस्येसर्थः
गिरांवचसांसंदर्भशुद्धिंगुणालंकारादिग्रथनांविजानाति जयदेवकविरेवजानोनान्यःकश्चित्कविःअतएवजयदे नीते

धो

शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धीकोपिनविश्रुतःश्रुतिधरोयाकविःक्ष्मापतिः ध

तौ

वक्तृता।त[redacted]गोविंदकाव्यश्रवणेसंतोषस्तथानान्यत्रकाव्ये अतएवदेवश्रोतव्यमितिभावःपल्लवःकि
सालयेपिगोविटपेविस्तरेवलइतिविश्वप्रकाशःलघुत्वप्रसरंदुतमित्यमरः उत्तरंप्रतिवाक्येस्पाद्दवेदि
व्योत्तमेन्यवदितिरुद्रदासनामायमलंकारःतल्लक्षणंशिष्यो धेनुचेसमसिवद्वस्तुवर्णनंस्पादुदात्ततासाम ५
र्थ्यंजायतेयत्रचरमोत्कर्षविचित्रितेति ध

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं तावत्सर्वश्लोकोक्ताः राधामाधवयोः रहः केलयस्ता एवं श्रीकृष्णचंद्रसंयोगपुष्पार्थं भगवद्वीलाविला
सानां प्रतापसौम्यापादीनां च श्रीकृष्णचंद्राधीनत्वं बदनदशावतारप्रस्तावे श्रीकृष्णचंद्रस्य नायकचूडामणि
त्वं च संयोगरसपुष्पार्थं विप्रयोगरसमाह प्रलयेत्यादिना यथा संयोगरसपुष्पार्थं विप्रयोगनिरूपणम् कार
षापिते हि वस्त्रादौ भूयान् रागो हि जायते गीतस्यास्य गौडमालवरागो रूपकतालः ध्रुवपदं च गीतलक्षणम्
१७ स्वरतालग्राममेदैः रागांगम्भूषितम् संस्कृते प्राकृते वाथ गीतं गीतविदो विदुरिति रागलक्षणम् नितांबिनांबुबि

गौडमालवरागे रूपकताले प्रलयपयोधिजले धृतवानसि वेदं विहितव

तवक्त्रपद्मः शुकधृतिः कुंडलवान्भ्रमरः संकेतशालां प्रविश्यान्प्रदोषे मालाधरो मालवरागराजः तालक्षणम्
रूपके स्याद्द्रुतं लघुरिति संगीतरत्नाकरः षोडशध्रुवकास्तल्लक्षणं ग्रंथविस्तरभयान्नालिखितं पदस्य पुनः पुनरावृत्तिः
ध्रुवपदम् हे केशव सुखशायिन् प्रशस्तचिकुर इति वा हे धृतमीनशरीर धृतमीनस्य शरीरमिव शरीरं येन धृतमीनव
धृतसर्वः स च विपरीतरतौ भवति तत्स्वरूपम् प्रसार्य हस्तचरणौ पुमानूर्ध्वांगो जायते नायिकामुपरिस्थाप्य र
मीनबंधः प्रकीर्तितः किंच मीनो हि रसवेदामकरकेतनलोयप्रेमानिर्ग्राहकश्च मंगलार्थश्च तद्वत्त्वापि धृतमी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जग

गी०टी० नवेध्यलवमंगलंहेदेवक्रीडाकर्त्तः हे हेस्तक्तजनसंतापहारिन् सर्वमंगलहारिन्वापुवतिकामथापनाशन
इतिवाजयंइतिवीप्सयाअतिशयेनसर्व्वोत्कर्षेणवर्त्तस्व जयजगदीशइतिवापाठः गछतीतिनानाशृंगाररसमापद्य
६ तेनजगद्भवतिहृदंतस्येशनायकचूडामणे प्रथममीनबंधकेलिमाह प्रलयेति प्रकर्षेणमनसःलयस्तदाकारता यत्र
सुरतेसप्रलयः सयथा सुरतेचसमाधौचमनोयत्रनलीयते किंतेनसुरतेनार्थः किंतेनचसमाधिनेति तत्रानंदश्रमजनि त
तपयोधौयज्जलंतस्मिन्वेदंवात्स्यायनशास्त्रप्रतिपाद्यमीनबंधादिकुर्वलंविधतेज्ञायतेरतिकोषोक्तकेशस्पर्शादिली
संवेशः

चरित्र हित्रमखेदम् केशवधृतमीनशरीरजयजगदीशहरे १

लांवाअरवेदंपयास्पान[illegible]थाधृतवानसित्वंपोषितवान.सोयमर्थः कीदृशंवेदम् विहितंकृतंवहित्रस्यपोतस्यचरित्रंके
लि[illegible]जलधिपारप्रापकरूपंयेनएतेननायकचूडामणित्वंसूचितम् पक्षे मीनरूपंस्तौति प्रलयकालीनायेपयोध
योजलक्षयस्तेषांजलेमग्नंतंवेदंमीनशरीरलीलयाधृतमादायनतुकर्मवशेनावेदंयथास्यात्तथाधृतवानसित्वं अल्प
जलनिवासोमत्स्यानामिष्टःसुतरांजलधौ तथाचश्रुतिः योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैतम्हदेवमात्मबुद्धि
प्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्यइतिकवयश्चईशाः शिवश्चतोवसोसेवकोनमोयस्येतिहेकेशवधृतमीनशरीरंपे ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नत्वं संबोधनं जय सर्वोत्कर्षेण वर्तस्व ननु सर्वोत्कर्षे हेतौ किं सामर्थ्यं तत्राह हे जगतां चतुर्दशभुवनानां ईशनियंतः हे हरे हरति भक्तानां क्लेशं भजनानुसारेणेति तथा तदुक्तं श्रीभागवते हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतामिति एतेन दुष्करकार्यनिर्वाहकत्वेन दक्षिणलक्षणो नायकगुणोक्तः प्रलयो नष्टसंज्ञे समुद्रः १ कच्छपसदृशावधांतर माह क्षितिरिति हे धृतकच्छपरूप स्वीकृतकच्छपबंध तल्लक्षणम् हस्तौ पादौ च संकोच्य कोतामुपरि वक्षनः स्थापयेत्सुरते यत्र कच्छपः स प्रकीर्तितः तव पृष्ठे पृष्ठविभागे क्षितिः दावनिकुंजभूमिः तिष्ठति वर्तते इत्यन्वयः कीदृशे

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे

पृष्ठे अतिविपुलतरे अतिशयेन विपुलयति विशेषेण महत्त्वं रसस्य प्राप्नोतीति तथा पुलमहत्त्वे धातुः अनेन नायकस्य श्रांतोद्वहनत्वं सूचितम् कीदृशे धरणिधरणकिणचक्रगरिष्ठे पूर्वोक्तबंधधारणेन किणांकुंकुमादिचिह्नंपत्रकुंचकाहतिकंकणं तेन गरिष्ठेऽप्रमगौरवे न घ्येद्समर्थः अन्यद्धि रत्नमचिह्नमव्रणमेवानर्घ्यमिदं पुनस्तच्छरीराद प्रियानखचिह्नितमप्यमूल्यमिति श्रीराधोक्तिस्त्व सर्वत्रैव या तद्यथा सर्वस्यापि हि रत्नस्य व्रणेर्दः परिहीयते दयिताधरत्नं तु व्रणितं यात्यनर्घ्यतामिति तिष्ठतीति फलपर्यंतकार्यनिर्वाहकतयास्थिरत्वात्तद्धृणो नायकगुणोक्तः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० टी० क्षितिः सहनशीलेसर्वक्षिस्तीर्णेचधराख्यपीतिमहोदधिः पृष्ठंपृष्ठप्रदेशेस्यात्पृष्ठंस्पृह्विविलाशायइतिमेदिनीकरः प
७ दे कच्छपरूपंतोति हेधृतकच्छपरूपधृतंकच्छपस्यरूपंयेनताहराजयजयस्वोत्कर्षमाविष्कुरु २ ननुनिंघंक
च्छपस्यरूपंमयाकस्यहेतोर्धृतमित्यतआह क्षितिरिति तवपृष्ठेक्षितिःपृथ्वीतिष्ठतिकच्छपपृष्ठमल्पंतकठिनतरंतो
ण्पाधारणंचनास्यनुकरणार्थमिमिक्लिनावः ननुपंचाशत्कोटियोजनविस्तीर्णांपृथ्वीममपृष्ठेकथंस्थितेत्यतआ ८
ति ह अतिविपुलतरेऽअतिशयेनधरायेदयाप्याधिकविस्तीर्णे पुनःकीदृशे धरणिधरणकिणचक्रगरिष्ठेधरण्या

केशवधृतकच्छपरूपजयजगदीशहरे २

धरायाधरणेनयज्जातंकिणचक्रंरक्ताकृतिमतरुधिरमंडलंतेनगरिष्ठेगौरवयुक्ते एतेनपानरसंगौरवंचोक्तम् कि
णस्यान्मतरक्त[redacted]कदूतिविश्वप्रकाशः किणांचिह्नेव्रणंकिनाविविहारावली क्रूर्मःकमठकच्छपःविस्मम
रः चक्रंचक्रेथनिर्दिष्टंसर्वचक्रेविवकके यातिवैजयंता यथारतिचक्रेप्रहतस्यनैवशास्तंचक्रमइति धराधरि
त्रीधरणीसमरः कच्छपःकमठेग्राहकस्तद्वंद्वेमिरितिप्रियेरितिनोजे विस्तीर्णोविपुलःप्रोक्तोविपुलत्वप्रदेपिवेतिकोशा
समुच्चये २ ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंविधात्मिकं केलिमुक्त्वा तदंगसौंदर्यं वर्णयंस्तमाह बसतीति हे धृतशूकररूप शूकरोति तन्न करोति कंदानिति शूक
रः अत्र तु मानकंदखननेतच्छात्वं तस्योच्यते उक्तंच कामिनीनयनकज्जलपंकादुत्थितो मदनमत्तवराहः कामिमानस
त बनांतरचारी कंदमुंखनति मानलतायाइति तवदशनशिखरे धरणीलग्नातिष्ठतीत्यन्वयः धन्नेरसंप्रेयसी वा धरणी तच्छीला
सातवदशनशिखरे दंताग्रे दशनस्ततबिधाने बसति कस्मिन्नकेव शशिनि परमानंदजनके चंद्रे निमग्ना कलंककलेवे
व सा यथा विद्यमानापि न शोभां तिरस्करणोति एतेन नायकस्य गुणप्रकर्षो दर्शितः पक्षे वाराहावतारमाहस्तौति च

बसति दशनशिखरे धरणी तव लग्ना शशिनि कलंककलेव निमग्ना केशव धृतशूकररूप जय जगदीश हरे २

हे धृतशूकररूप धृते शूकरस्य रूपं येन जय जय वाराहप्रयोजनमाह बसतीत्यादि तवदशनशिखरे दंतस्याग्रे लग्ना
सक्ता धरणी वसुंधरा बसति अत्र निमग्ना पदोपादानेन बालचंद्रस्य सादृश्यं दशनेकार्प्यते अनेनानायासेन तद्ध
याधरणपुद्धरणेन बलातिशयनिरूपणेन महासत्वता लक्षणो नायकगुण उक्तः उक्तं च समानम् रदनादशनादंताइत्य
मरः कलास्यादंशमात्रकं इतिहलायुधः अग्रं शिखरमिलाक्ष्मा दिशंगे बधरणिः शूकरः शूकरे प्रोक्तस्तनुकारिणि बा
सुनीति जोजे शतप्रेशगाग्निनोपमालंकारः २

Dr. Urmila Sharma Collection, Varanasi

हेध्रुतनरहरिरूपधृतंनृसिंहस्वरूपमिवरूपं साहसक्रोधोद्योतं वन्यादिदृप्तं येननतत्संबुद्धिः हेदंनाघातननखक्षतनिर्दयत्वकारिन् १

गी॰टी॰ पुनः कोकजाखप्रदर्शितां नखहतादिरूपां लीलां चतुरानायिकाप्रकारांतरेणाह तवेति क्रीडायां प्रवर्त्तमानस्याग्र पुनः कौतुकं नखहतनिर्दयत्वकथनायरतिसमयेनरसिंहरूपइत्युक्तम् तवकरकमलव पश्चात्तापोनास्तितत्तद्वसरजन्मत्वात् नखहतनिर्दयत्वकथनायरतिसमयेनरसिंहरूपइत्युक्तम् तवकरकमलव

C रेतवहस्तकमलवरेश्रेष्ठनखमस्ति कीदृशम् अद्भुतमाश्चर्यजनकमग्रभागोयस्यतत्तथा स्त्रलत्वकथनेनकंजसाम्यम् पुनः कीदृशम् दलितहिरण्यकशिपुतनुभृंगंदलितोविदारितोहिरण्यकशिपोस्वर्णशय्यायांतनुरेवभृंगोयत्रतत् अन्यत्रभ्रमरेणकमलंबिदार्यते अत्रतुसएवदलितइत्यनेनशृंगाररसपूर्त्तिरुक्तेतिभावः केशवेत्यादिपूर्ववत् पद्ये नरहरिरूपंस्तौति हेधृतनरहरिरूपधृतंनरहरिरूपंयेनतत्संबोधनं जयजय श्रीनसिंहावतारप्रयोजनमाहतवेत्यादि

तवकरकमलवरेनखमद्भुतशृंगंदलितहिरण्यकशिपुतनुभृंगम् केशवधृतनरहरिरूपजयजगदीश हरे ४

तवकरमलवरेकरोहस्तः सएवकमलवरः कमलश्रेष्ठस्तत्रनखंतिष्ठति कीदृशम् अद्भुतशृंगम् अद्भुतंआश्चर्यं तवकरमलवरेकरोहस्तः सएवकमलवरः कमलश्रेष्ठस्तत्रनखंतिष्ठति दलितेत्यादि दलितोविदारितोहिरण्यकशिपोर्दैत्यस्यतनुःकायः रूपंशृंगमग्रभागोयस्यतादृशम् अद्भुतत्वमेवाह दलितेत्यादि दलितोविदारितोहिरण्यकशिपोर्दैत्यस्यतनुःकायः रूपंशृंगमग्रभागोयस्यतादृशम् अद्भुतत्वमेवाह अन्यत्रकमलेतुमकरंदपानादिनाभृंगानांतृप्तिर्भवति इहतुनरहरिकमलायमागे सएवभृंगोभ्रमरोयेनतादृशम् अन्यत्रकमलेतुमकरंदपानादिनाभृंगानांतृप्तिर्भवति नायकेसाहसिकत्वातिशयगुणः नभृंगएवविदारितइत्यद्भुतत्वं नरहरिरूपेसनेनांतिदिक्कदृष्टौयद्बलातिशयेननायकेसाहसिकत्वातिशयगुणः सूचितः माणिक्येशिखरेशृंगंभूमतांचविषाणकेपीतिवैजयंती पुनर्भवःकररुहोनखोस्त्रीत्यमरः शृंगंप्रभुत्वेशि खरेचिह्नेक्रीडांबुजरतिविश्वप्रकाशः तनुकायेकृशेत्वाल्पेविरलेचापिवाच्यवत् द्विरेफःपुष्पलिड्भ्रमरोभृंगइतिविश्वः हि

[illegible]

क [illegible]

CC0. In Public Domain, Digitizagtion by eGangotri

अभ्दुतत्वसंबोधने हेतुगर्भविशेषणं हे पदनखनीरजनितजनपावन विपरीतरतौ सुरतेयत्पदनखं पदनखक्षतं तेन क्षाल नायकस्त्रीरं तेन जनितं जनस्य स्वचित्तस्य जनसमुदायस्य वा पावनं परमानंदयेनेति वा तत्संबुद्धिः हे स्वपरचित्तप्रसा नंदज.नक ५.

आलिंगनरूपां क्रीडामाह छलयसीति हे धृतवामनरूप वामयति नामयति आलिंगनादिभिर्मानादिना वा यः स वामनः तत्संबोधने तेन मानेन त्वं विक्रमे सुरतविक्रमे सुरतपराक्रमे इत्यर्थः बलिं त्रिबलिं छलयसि वंचयसि विपरीतविधानेन जाल्मानमयसीति सूचितम् हे अद्भुतवामन आश्चर्यवामन पदनखेति संबोधनम् विपरीत
२ सुरते न तत्र यैः पदनखैः पदनखक्षतैः तत्क्षालननायपत्नीरं तेन जनितं जनस्य नंदनेदनस्य पावनं चित्तप्रसादो येन त त्संबुद्धिः चित्तप्रसादकारिन् एतेन नायिकोत्कर्षः पावनत्वं च नायकस्योक्तम् ननु नखदानं कारनखेनैव जन्यते न पदनखेनेति सत्यमेतत्तु विपरीतरतौ नायिकापदनखदत्तानि प्रायेण ज्ञातव्यम् पक्षे वामनरूपस्तोति हे धृतवा

छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनितजनपावन केशव धृतवामनरूप जय जगदीश हरे ५

मनरूपेति अद्भुताश्चर्यरूपवामन अद्भुतमदृष्टपूर्वं देहानां दर्शनाद्भायतीति वामनः अद्भुतत्वमेवाह पदनखेति प दनखसंबंधि यन्नीरं गंगाजलं तेन जनितं जनानां पावित्र्यं येन तादृग्जय केशवादि पूर्ववत् वामनावतारप्रयोजनमाह छल यसीति विक्रमणे पराक्रमे बलिं दैत्यं छलयसि वंचयसि श्रीकृष्णः वामनरूपं विधाय बलेः पदत्रयपरिमितां भूमिं याचयित्वा पश्चाद् बृहद्रूपं प्रकटीकृत्य बलिमधः क्षिप्त्वा च तद्राज्यं भुवनानि गृहीतवानिति पुराणप्रसिद्धेः छलयसीत्यनेन नायकस्य चातुर्यं चा तुरीसूचितेति भावः बलिस्त्रिबल्यामसुरे बालिः पूजोपहारके बलिर्वलिश्चेति वैजयंती अर्णोज स्तोयपानीयनीरक्षीराम्बुश म्बरमित्यमरः वामनः कर्बके बिष्णौ वामनो नतिकारकः छलं कौतुके प्रोक्तं छलं केलिकलाघ्नपीतिरत्नकोषः ५

Dr. Urmila Sharma Collection, Varanasi

गी॰टी॰ अतिदुःसहतापोपशमनींक्रीडामाह क्षत्रियेति विश्रतिरसमितिभृगवोरसिकाः रसिकानांपतिः प्रशस्तोभृगुपतिरू
ए २ पप्रशंसार्थैरूपः रसिकचूडामणे जयजगदीपदंपूर्ववत क्षत्रियरुधिरमयेपयसिजगत्स्त्वंपयसि श्रीकालिंदीजल
क्रीडायांकुंकुमकर्मिरितायांगच्छतीतिजगत्त्राणकासमूहं स्वयपसि स्नानकारयसात्स्वन्वयः कीदृशंजगतव्रजयुवतिवृं
दम् अपगतंपापंस्नानमात्रेणनष्टंसंसारकलुषम् पुनःकीदृशंजगत्युवतिवृंदम् शमितभवतापम् शमितःशान्तिप्रा
पितःभवस्यकामस्यविरहोत्पन्नोतापोयेन भवोत्रकामवाचकः भीमोभीमसेनइतिवत पक्षे परशुरामावतारंस्तौति हे

क्षत्रियरुधिरमयेजगदपगतपापंस्नपयसिपयसिशमितभवतापम् केशवधृतभृगुपतिरूपजयजग
दीशहरे ६

धृतभृगुपतिरूप धृतंभृगुपतेःपरशुरामस्यरूपंयेनतादृशजय परशुरामावतारप्रयोजनमाह क्षत्रियाणांरुधिराणिप्रचुराणि
यत्रपयसिकुरुक्षेत्राख्ये तीर्थवरजलेजगत्प्राणिजातंअपगतपापंनष्टपातकंयथाभवतितथास्नपयसिस्नानंकारयसि
कीदृशंजगत शमितभवतापंशमितानाशितोभवस्यसंसारस्यतापोयत्रतादृशम् अनेनतेजस्वितालक्षणोनायकगुणउक्तः
रुधिरंगारकेप्रोक्तोरुधिरंकुंकुमासृजोरितिविश्वः पयःस्यात्क्षीरनीरयोरित्यपि भवःसंसारतापेस्यात्तथाशंकरजातिष्वितिध ए
रणिः भवोजन्मनिचप्रोक्तोभवःकामइतिकीर्त्यतइतिमेदिनीकारः ६

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुप्रसन्नात्मिकाङ्क्षीउआमाह वितरसीति हे धृतरघुपतिरूप जय रघवएकेनापतयस्तेषां पतिः श्रेष्ठस्तत्संबुद्धिः
एतेन बहुयुवतिप्रासक्तिर्निवारिता दिक्षुरतिविहारदिशासुरणे स्मरसंग्रामे दशमुखो दशप्रकारो यो मौलिः केशपाश
स्तेन बलिं पूजां वितरसि विस्तारयसि यद्वा दशमुखलायकामायमौलिना किरीटरत्नेन बलिं पूजां वितरसि ददासि इति केचि
त् कीदृशम् दिक्पतिकमनीयम् दिशां पतयः इन्द्रादयस्तेषां कमणीयं मनोहरम् तदभीष्टं वा तदगोचरमिति वा पुनः किं
स्तं रमणीयम् रतिजनकम् शेषं पूर्ववत् पक्षे रामावतारं स्तौति हे धृतरघुपतिरूप जय श्रीरामपुरुषार्थमाह वितरसी
ति रणे संग्रामे दिक्षु आशासु दशमुखस्य रावणस्य ये मौलयो मस्तकानि किरीटानि वा तान्येव बलिं उपहारं वितरसि ददासि

बलिं वितरसि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौलिं रमणीयम् केशव धृतरघुपतिरूप जय जगदीश हरे

कीदृशम् दिक्पतिकमणीयम् दिशां ये पतयः इन्द्रादयस्तेषां कमणीयं अभीष्टदम् तत्र हेतुः रमणीयं मनोहरम् अनेन दि
वधे क्पालानां हितेन रावणेन गाम्नीयं लक्षणेनायकगुणनक्तः किरीटरत्नमूर्द्धा सुमौलिः केशो वसंपते करोपहारयोः पुंसि बलिः
प्राण्यंगजे स्त्रियामित्यमरः ७ एवं रतिविहारगर्वितं प्रत्याह वहसीति हे धृतहलधररूप हलविलेखने [illegible] धातुः हलनं हल इति
लेखणेन वहलताधरः ततरूप धत्ते इति हलधरः सुरतकेलिप्रसक्तो हलधररूपस्तत्संबुद्धिः धृतनानानखाधरक्षत
पदरूप त्वं विशदे निर्मले वपुषि शरीरे वसनं वस्त्रं वहसि स्तोकसुंदरस्य वसनधारणं भारमतो धारयसी सुक्तम् कीदृ
शम् जलदाभम् जलदानां नीलमेघानां आभा शोभा यस्मात्तत् जलदपदस्याभिप्रायोयं जलदोयथा खंजनो वनं द

Dr. Urmila Sharma Collection, Varanasi

त्वाविश्वजीवनंकरोतितथात्वमपिबेदोक्तंहित्वाबिहारंकुरुनहिबेदोक्तमर्यादापालनेनसर्व्वोपिरसः साधयितुंश्रा
गी० टी० क्यः पुनः कीदृशम् हलहतभीतिमिलितयमुनाभम् हलेनयद्धननंनीतास्तातद्भयेनमिलितायायमुनातस्याश्चा
१० ह्नेवात्मादीक्षियेस्यतत् हलहतीतिपाठेसएवार्थः हलधरपदेनवीररसललितलक्षणोनायकगुणउक्तः पक्षे हल
धरावतारेस्तौति वहसीति हेधृतहलधररूप धृतंहलधरस्वरूपंयेनताहृशजयजय बलदेवस्यलीलामाह बहसीति ६
विशदेकर्पूरपरागगौरेबपुषिशरीरेजलदाभंसजलनीलमेघस्निग्धमेचकंबसनंबस्त्रंबहसिधारयसीसन्वयः हलँती

वहसिवपुषिविशदेवसनंजलदाभंहलहतिभीतिमिलितयमुनाभं केशवधृतहलधररूपजय
जगदीशहरे ८

सादिप्रलंबवत् नारूणांहिकंपउचितएवेकिंभावः कदाचिद्वृंदाबनेवारुणींपीत्वाव्रजांगणाभिःसहविहरताबलभद्रेण
यमुनाजलकेल्यर्थमाकारितामत्तोयमितिश्रीकृष्णाज्ञोद्योवेतिमत्वातिकंनायातीकृष्णाक्रोधेनहलाग्रेणाकृष्टवानिति
पुराणश्रुतेः हलधरशब्देनतुप्रसिद्धनाम्नासाधुरक्षणार्थंहलंधृतवानसीतिसूचितम् गात्रंवपुःसंहननंशरीरंवर्ष्मविग्रहइत्य
मरः शुक्लःशुभ्रःशुचिश्चेतविशदश्वेतपाण्डुराइत्यमरः विशदंनिर्मलेप्रोक्तंविशदंकनकप्रभे विशदंप्रकटार्थेपिविशदे १०
विमलाशयइतिकोशःचूडामणिः बस्त्रमाच्छादनंवासश्चैलंबसनमित्यमरः कर्षकेस्याद्धलधरःप्रलंबघ्नेचनीरसे बि
कर्षणेस्मरकृतेदारुणपिविकर्षणइतिमेदिनी उत्प्रेक्षापूर्वकोयमलंकारः भीतिःसाध्वसकंपयोरितिविश्वप्रकाशः ८

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेदोक्तमर्यादासंस्थहे सत्का बिहरे इति पूर्वोक्तं तद्वादाचरितं प्रत्याह निंदसीति हे धृतबुद्धशरीर बुद्धं ज्ञातं श्रीदृषन्ना शुभा [redacted] स्वरूपं येन तादृशजय जगदीशादि पूर्ववत् हे सदयहृदय त्वं यज्ञविधेः मकरध्वजयज्ञविधेः अहहेति खेदे श्रुतिजातं तत्प्रतिपादकमर्यादामार्गं निंदसि मर्यादामूलं मार्गं न मन्यसे न वेदस्ताविन्यामकस्स्यर्थः उक्तंच रति च वेदप्रवृत्तस्यनैव स्वान्तं नवक्ष्मइति सोजे कीदृशम् दर्शितः पशुघातो येन परे बुद्धावतारं स्तौति हे धृतबुद्धशरीर धृतं बुद्धस्य शरीरं येन त्वं जय न तु बुद्धावतारे वेद निंदकस्य बुद्धस्य मम कथमति श्लाघा प्रसंगात्क्रियत इत्यत आह निंदसीति त्वं यज्ञविधानस्य प्रवर्तकं श्रुतिजातं श्रावितविमार्गं निंदसि न तु सर्वमिसर्थः एतदर्था बिजीवात् परा

निंदसि यज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातम् केशव धृतबुद्धशरीर जय जगदीश हरे ९

यदा हि धर्मस्येति वचनात् किमर्थं सोपि निंद्यत इत्याह दर्शितेति अहहेति कथं दर्शितो बोधितः पशूनां घातो येन तथाभूतं वेदोपि पशूनां घातं प्रथयति कथं त्वं निंदसीति भावः तथा निंदायां कारणमाह सदयेति दयाकृपा तत्सहितं हृदयं यस्य तादृशासंबोधनम् यदा सदयहृदयाः ब्राह्मणास्तेषां दर्शितः पशुघातो हननं येन कथं निंदसि गवादिपशुघातं धिगिति तथा बौद्धशास्त्रे अहिंसापरमो धर्म इति अयमर्थः रागबन्धादज्ञानाद्विलोक्य यागी यो मीयं पशुमालभ्यते स्यादिस्वर्गादिफलाविधिवाक्यैः परोचनया तान् गुडलड्डुकवत् स्वस्य पश्चान्निरपराधवधसाध्यं नानाप्राणिवधं स्वर्गादिफलं न श्रुतं विचार्य परमपुरुषार्थं श्रीकृष्णजने तान् प्रवर्तयितुमाहिंसा त्वया न्तानास्ता दिनायतः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बोधकस्य वेदस्य निंदां करोषि न तु सर्वथा वेदनिंदायां प्रवर्त्तते इति तात्पर्यराद्धांतमज्ञात्वा दुरात्मनो वेदमार्गे श्रीकृष्णमत
 जनेषां विश्वासस्तेषां मोहनायतत्वावतारप्रयोजनमिति जगदीशपदं पूर्ववत बुद्धशरीरस्यानेन दयालक्षणो नायकगुणान
 क्तः वेदे श्रवसि च स्मृतिरित्यमरः जातं ज्ञातो वा जन्मसु इति विश्वः ए पूर्वोक्तविहारपुष्टं प्रत्याह म्लेच्छेति हे धृतकल्कि
शरीरे धृतं सापराधशरीरं येन तादृश जयजय शोभं समानम् त्वं म्लेच्छनिवहनिधने करवालं कलयसि म्लेच्छश्च केशरी
हे म्लेच्छस्यायुक्तकृज्जनस्य निवहः समूहस्तस्य निधने विरामे खड्गं खड्गवदतिकरालं तीक्ष्णं त्वं कलयसि दधासि पदे
कल्क्यवतारं स्तौति धृतं कल्किनः शरीरं येन तत्संबुद्धिः त्वं जयजय जगदीशेति पदं सर्वत्र योज्यम् ननु पूर्वं मम सदृश त्वं
कृपं कथितं तद्विपरीतप्राणिवधे प्रवर्त्तसे स तत्राह म्लेच्छेति म्लेच्छसमूहमारणार्थं किमपि करालमतिभयंकरं करवालं खड्गं

म्लेच्छनिवहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालम् केशव धृतकल्किशरीर जय जगदीश हरे १०

कलयसि धारयसि एतेन धर्मसंरक्षणपरिपालनेन दृढत्वलक्षणो नायकगुणश्च क्तः कमिव धूमकेतुमिव श्रौसातिकग्रह
मिव श्रौसातिकमुदितं ग्रहं दृष्ट्वा म्लेच्छानां नाशो भवतीति करवालस्य धूमकेतुसाम्यम् श्रौसातिकग्रह उदिते प्राणिनां
दुःखं स्यादिति भावः यथा धूमः केतुश्चिह्नं यस्य स धूमकेतुर्वह्निस्तमिव खड्गस्य नीलत्वाद्धूमसादृश्यं मुष्टेश्च कनकमयत्वाद
ग्निसाम्यम् म्लेच्छनिवहनिधनशांतिनिमित्ते समुपमा चमेत्तीक्ष्णचिह्नं हंता निवत म्लेच्छः पापरतो जातिभेदे स्यादल्पभाषिणि
हर्षापहारके चैव श्राधारा कृतेऽपि चेति कोशः चूडामणिः कल्की तु सापराधः स्यात्कल्को विष्णुर्मलान्वितः इति भोजे धूमके
तुः स्मृतो बह्नौ उत्पातग्रहयोरपीति विश्वः समूहे निवहव्यूह इत्यमरः निधनं स्यात्कुले नाशे इति विश्वप्रकाशः खड्गे तु नि
स्त्रिंशचंद्रहासासिरिष्टयः कौक्षेयको मंडलाग्रः करवालः कृपाण इत्यमरः करालो भीषणेऽन्यवदिति च वस्तूपमालंका

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वलीलाकर्त्तारंपूर्णंश्रीकृष्णंस्तौति श्रीति हेरसिकश्रीजयदेवकवेःइदंगीतंप्रदितंखलुःप्रेम्णास्फुटीभूतंशृणु कीदृशम् उदारंमहत्
समत्वात् अथवा उदारम् अतिरमणीयंश्रीराधाकृष्णकेलिनिरूपणत्वात् पुनःकी सुखदम् सकलानंदपूर्णत्वात् पुनःकी शुभद
म् अथवाशुभंददातियःश्रीकृष्णस्तस्यदम् नवसारम् नवेसारंसारभूतम् यद्वा नवोमनोभवःकामस्तस्यसारंशृंगाररसपूर्णम् य
द्वा नवमस्मादितिविग्रहस्तनवःश्रीकृष्णस्तस्यसारभूतंसुरतविस्तारकम् हेधृतदशविधरूप धृतानिदशविधानिदशप्रकाराणि
मीनवंधादिशरीराणियेनताद्दशाजयजय पद्दे कृतदशावतारांश्रीकृष्णहोति हेधृतदशविधरूप धृतानिदशविधानि
दशप्रकाराणिमीनाद्यवताररूपाणियेनतादृशत्वम् जयजय अथवा दशविधैरवतारैरूप्यतइति शोभमानम्
उदारंसुंदरंप्रोक्तमुत्कृष्टंपूजितंतथेतित्रिलोचनः रूपंप्रशस्तेरम्येचेतिचूडामणिः ११ पूर्वंकथितंलीलासमूहंश्रीकृष्ण
श्रीजयदेवकवेरिदमुदितमुदारंशृणुसुखदंशुभदंनवसारम् केशवधृतदशविधरूपजयजगदीशहरे ॥ वेदानु
द्धरतेजगन्निवहतेभूगोलमुद्बिभ्रतेदैत्यंदारयतेबलिंछलयतेक्षत्रक्षयंकुर्वते पौलस्त्यंजयतेहलंकलयतेकारुण्यमात
न्वतेम्लेच्छान्मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यंनमः १ चंद्रविषयंप्रथयन्प्रणमति वेदानित्यादिना श्रीकृष्णायदशाकृति
कृतेतुभ्यंनमइत्यन्वयः पूर्वोक्तादशविधादशप्रकारामीनवंधादिलीला[illegible]कृतिंकरोतितस्मैदशाकृते कृष्णायेतिपूर्णायनराकृतिप
रब्रह्मणेवा उक्तंचकृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतइति किंभूताय वेदानुद्धरतेमत्स्याय
नाद्विशाशंखासुरवधादिकामप्रकारान्उद्धरतेलोकेषुविस्तारयते अन्यथावात्स्यायनशास्त्रंनिःफलमेवाभविष्यत् पुनःकी जगन्निवहतेस
मूहंनिवहतेविगतसंतापंकुर्वते पुनःकी भवतीतिभूःकामस्तस्यगोलःसमूहः उद्बिभ्रतेधारयतेरासेव्रजवधूमंडलंवारासलीला
प्रतिवंधकंखलंसमीपमागतंशंखचूडाख्यंदैत्यंदारयतेविदारयते अनेनरासैकबाधान्यमुक्तम् पुनःकी बलिंत्रिबलिंछलयतेव्रज

Dr. Urmila Sharma Collection, Varanasi

गी०टी० युवतीनांकामजनितनखक्षतादिप्रदानेनवंचयते पुनःकीदृक्क्षत्रक्षयंकुर्वते क्षत्रशब्देनात्रक्षत्रसहचरितोवाराक्षसो
१२ लक्ष्यते तस्यक्षत्रस्यक्षयंविनाशंकुर्वते एतेनसुरवैररवध्वंसयते पुनःका पौलस्त्यंजयतेपुलमहत्त्वेधातुःपुलनंपु
लःमहत्त्वंतस्यसमूहस्तेनपौलस्त्यायतेसंहतंभवत्यस्मिन्नितिपौलस्त्योब्रह्मानंदःस्त्यैष्ट्यैशब्दसंघातयोरितिधातु
त्वमपिजयतेअसलंकुर्वते हलंकलयते हलविलेखणेधातुःहलनंहलःविलेखणंनखक्षतादितत्कुर्वते कारु
ण्यमातन्वते सज्जकेषुकृपांविस्तारयते म्लेच्छमव्यक्तभाषणंम्लेच्छअव्यक्तेशब्देधातुःअव्यक्तान्श्वाससीत्कारान्
मूर्छयतेबर्द्धयतेमूर्छामोहसमुच्छ्राययोरितिधातुःपदे श्रीकृष्णकृतांबंधादिलीलांस्तुत्वांशावतारेणसचि
दानंदरूपंपरिपूर्णविग्रहंश्रीकृष्णंवंदेगीतार्थश्लोकसंग्रहेणस्तौति वेदानित्यादिना कृष्णायनराकृतिपु
रूपिणेतुभ्यंनमःनमस्कारोस्तु ननुमीनाद्यवतारेणतस्यपूर्णस्यस्तुतिःकृते वेदानीनंदगोपबालकंमांकथं
स्तोषास्यतश्चाह दशाकृते आकृतिःकथितारूपेसामान्यवपुषोरपीतिविश्वः मीनादिदशांशरूपकर्त्रेआ
वतारवानीश्वरस्त्वमेवसमर्थः ननुकुतोहमीश्वरःकुतोममांशाएतेतत्राह पूर्णत्वात्तदुक्तंचश्रीभागवते अन्येचांश
कलाःपुंसःकृष्णस्तुभगवान्स्वयमितिकिंवक्तुमिच्छुर्भूवावकइति ननुपूर्णश्चेदहंकुत्सितामीनाद्याकृतयःकिमि
तिस्वीकृताइत्याशयेनावतारप्रयोजनमाह वेदानुद्धरते बेदोद्धरणंकुर्वतेमीनशरीरेण पुनःकी जगन्निवहते भुवनं १२
धारयतेकच्छपदेहेन पुनःकीदृशंपदंसर्वत्रयोज्यं भूगोलंधरामंडलंगाढमूर्ते ऊर्द्धंस्थापयतेशूकररूपेण दैत्याहिरण्यक
शिपुंदारयतेविदारयतेनृसिंहरूपेणनखैः बलिंदैत्यंछलयतेप्रवंचयतेवामनावतारेण क्षत्रक्षयंकुर्वतेदुष्टक्षत्रिया
णांविनाशंकुर्वतेपरशुरामरूपेण पौलस्त्यंरावणंजयतेश्रीरामचंद्ररूपेण हलंकलयतेदुष्टनाशायहलंधारयतेश्रीबल

CC0. In Public Domain, Digitizagtion by eGangotri

देवरूपेण कारुण्यमनुग्रहमातन्वते विस्तारयते बुद्धरूपेण म्लेच्छान्मूर्छयते नाशयते कल्किरूपेण एतेन श्रीकृष्णदेवस्य दशावतारप्रयोजनान्युक्तानि दीपकालंकारः जयदेववर्णितदशावतारवर्णनो नाम प्रथमः प्रबंधः १ एवं पूर्वोक्तकेलिप्रतापवर्णनेन दशाकृतिकृते कृष्णायेति यच्चोक्तं तदेव गोप्यंतरक्रीडाकथनेन दर्शितं इदानीं सकलनायकचूडामणेः श्रीकृष्णचंद्रस्य समस्तनायककलाविशेषानुवर्णयितुमपि [redacted] च व्रजबध्वाः स्वयूथ केलिकारयितुं श्रीकृष्णं नायकगुणकदंबले नस्तुवंतीति मंगलांतरं श्रितकमलेति गीतेन दर्शयति गीतस्यास्य गुर्जरीरागः रागलक्षणं श्यामा सुकेशी मलयद्रुमाणां

गुर्जरीरागेपरिमंवतालै श्रितकमलाकुचमंडलधृतकुंडलए कलितललितवनमालजयजयदेव हरे १

मद्धस्सलहवतल्पयाता श्रुतेः स्वराणां दधती विभागं तंत्रीमुखादक्षिणगुर्जरीयमिति ग्रंथवाहुल्यभयान्नात्र लक्षणं नोक्तं गीतस्यायमर्थः हे देव कंदर्पघोतक हे हरे सकलजनमनोहर जय जय स्वकेल्पयं नायकोत्कर्षमाविःकुरु श्रादरे द्विवचनं रदं ध्रुपदम् नायकगुणानाह श्रितेति पुनः कीदृश हे श्रितकमलाकुचमंडल श्रिता आश्रिता सौन्दर्यसौंदर्यमाधुर्यातिशयार्थं वा स्वी लक्ष्मीर्यया सा श्रितकमला वा रह्यो श्रीराधा तस्याः कुचयोः मंडलं समग्रकुचप्रदेशो येन तत्संबुद्धिः श्रिता धया कुचं मस्येति वा गौरपीनस्निग्धवर्तुलत्वात तत्सौभाग्यम्‌लोभाद्वाप्यर्थे यालक्ष्मीवें

मउल

गहितो

Dr. Urmila Sharma Collection, Varanasi

गी० टी० रस्तीश्चसेवतइतिभावः अनेनालौकिकोवरनायकगुणउक्तः पुनःकीदृश धृतकुंडलए धृतेस्वीकृतेपुष्पनि
१३ र्मितेकुंडलेकर्णाभरणेवायेनतत्संबोधनम् एइत्यतिहर्षे अनेनपूर्वक्रीडायांतद्विस्मृतमित्युक्तम् पुनःकी
कलितेति कलिताकंठेधृताऽतिमनोहरावनमालाऽऽपादलंबिनीरत्नमयीवायेन यद्वा कलितानिधृता
निललितानिमनोहराणिशृंगारविलाससरसचेष्टितानियस्यांतादृक्विधावनमालायस्येति अथवाकलि
ताधृताराधासखीनांखेदोत्पन्नपावनस्यजलस्यमालापंक्तिर्यस्मिन् अथवा कलिताप्रहृष्टारासरससमहोत्स
वेव्रजवल्लवीभिर्ललिताकुंकुमकर्पूरागुरुसुगंधादिभिर्मनोहरावनमालायस्य अतःनस्यखेदोत्पन्नश्रम
जलबिंदुक्लिन्नामपिमालांप्रेयसीभिर्दत्तेयंमत्वातिबद्धत्वान्नत्यजतीतिभावः उक्तंच प्रियेणसंग्रथ्यविप
क्षसंनिधावुपाहितांवक्षसिपीवरस्तने स्रजंनकाचिद्विजहौजलाविलांवसंतिहिप्रेम्णिगुणानवस्तुनीति
भारविः अनेननायकाखिलविलाससंपत्प्रियाकौशलंचोक्तम् पक्षे श्रितमाश्रितंकमलायाःलक्ष्म्याःकु
चयोःमंडलंकुचाग्रमाभोगोयेनतत्संबुद्धिः अनेनलक्ष्म्याकेलिकौशलेनरतिकेलिकौशलरूपोनायकगु-
णउक्तः लक्ष्म्याश्रयत्वेनधनाढ्यगुणःसूचितोनायकस्य धृतकुंडलकलितललितवनमालेतिपदद्वये
ननायकस्यस्रग्वत्वंसौभगत्वंचसूचितमिति ज्ञेयंसमानम् मंडलंराजचक्रेस्याद्बिंबेचस्वरमंडले कांताकु १३
चपदेशेचमंडलंवर्तुलेचेतिविश्वः कुचौस्तनावितिच आपादगामिनींमालांवनमालांविदुर्बुधाइतिविश्वः कमला

श्रीगीतगोविंदटीका

CC0. In Public Domain, Digitizagtion by eGangotri

कर्न्नमव्रजयुवतिकदंवलीला प्रवर्त्तकान्नायकगुणानाह दिनमणीत्यादिना ए इतिसादरसंबुद्धौ दिनस्पमणिःप्रकाशकःसूर्यःमणेःप्रकाशबहुलत्वंसिद्धमेवतस्ययन्मंडलंप्रकाशसमूहस्तस्ययन्मंडनंश्रीराधासौंदर्यंयस्यतादृश श्रीराधालंकारभूत एतेननायिकापक्षपातोध्वनितः पुनःकीदृश हेभवखंडन भवस्यकन्दर्पस्यखंडननाशकतत्संवोधनम् कीदृश मुनिजनमानसहंस मुनिजनास्त्वच्चरणकमलसुजगासौंदर्यमाधुर्यविचारशालागोपीजनास्तेषांमानसमेवसरस्तत्रहंसमराल प्रसिद्धेमानससरसिहंसास्तिष्ठंत्यत्रमानससरोवरसदृशोगोपीम

दिनमणिमंडलमंडनभवखंडनए मुनिजनमानसहंसजयजयदेवहरे २

नसिश्रीकृष्णचंद्रोहंसतुल्यइतिभावः अनेनमनोहारित्वंप्रोक्तम् पक्षे दिनमणेःसूर्यस्यमंडलंतेजःसमूहस्तस्यमंडन अलंकारभूत भवंसंसारंखंडयतिनाशयतातितादृश एतेननायकस्यगुणसामर्थ्यंध्वनितम् पुनःमुनिजनानामृषीणांमानसंचित्तमेवसरःसरोवरस्तस्यहंस अनेननायकधूर्त्तादिशहितत्वंस्वच्छहृदयप्रकाशकत्वंचोक्तम् शेषंजयादिपदंसमानंमानसंसरसित्वान्तइतिविश्वः हंसोविहंगभेदेस्यासरमात्मनियोगिनातिव मंडलंतुसमूहेस्याबिंडलेराजमंडले मडलंवर्तुलेचैवतेजस्यपिमंडलमितिमेदिनीकारः परंपरि[illegible]तरूपकालंकारः तद्रूपम् नियतारोपणोपायःस्यादारोपपरस्ययः तस्यांपरि[illegible]तोक्तिःश्चेद्वावकेभेदनाशिवेति २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० ।अन्यदप्याहुः कालियेत्यादिना कालियः सर्पस्तद्वदाकृतिः कुंडलीभूतो बंधस्तस्य गंजन संमर्दक बंधलक्षणं
१४ ।चोक्तम् यत्रोपरिस्थिता पुंसः कांतालिंगनलालसा बेष्टयत्यंगमंगेन नागबंधः स कथ्यत इति हे जनरंजन ज
नान् सक्तान् स्वकौशलादिना रंजयति एतेनालौकिकगुणो नायकस्य लक्षित इति नहि सर्वजनमल्पसामर्थ्येन रंज
ते अथवा जनः श्रीराधासखीजनः वाङ्माधुर्यादिना रंजन रतिप्रद एतेन नायिकाहृदप्रवणत्वमनुकूलत्वं च प्रो॰
क्तम् हे यदुकुलनलिनदिनेश यदुकुलं नाम गोपकुलमेव गोपकुलमेव नलिनं तस्य दिनेशः सूर्य एतेन कुलीनस

कालियविषधरगंजनजनरंजनए यदुकुलनलिनदिनेश जय जयदेव हरे ३

वेषकाशनायकगुणो लक्षितः उक्तं च पद्मपुराणे यादवानां हितार्थाय धृतो गोवर्द्धनाचल इति पक्षे पुनः कीदृश हे
कालियविषधरगंजन कालियनाम्नो विषधरस्य सर्पस्य गंजन गर्वनाशक अनेनापि क्लेशहारित्वमुक्तम् हे जनरंज
न जनान् गोवर्द्धनोद्धरणादिना मधुरसंभाषणादिना च रंजन सुखप्रद अनेन क्लेशहरणत्वं शुभवचं नायकगुण॰ नत्वं
उक्तः यादवानां कुलमेव नलिनं कमलं तस्य दिनेश सूर्य एतेन कुलीनत्वं यादवसौभाग्यं चोक्तम् आशीविषो वि १४
२ षधरश्च कालव्यालः शरीसप इत्यमरः वा पुंसि पद्मं नलिनमरविंदं महोत्पलमिति च उपमोपमालंकारः अन्यत्समानम्
३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपरमप्याह मधुमुरेत्यादिना एइतिसर्वत्रानंदसंबोधनंज्ञातव्यम् मधौवसंतेयेमुरामुरवेष्टनेधातुः अभिम
तार्थप्रदाहृद्याः नराणांकेसुखंयाभ्यस्ताः लताश्चयेचवयः पक्षिणस्तानपिनआज्ञायतिव्यापारयतीतिनाज्ञानताह
रा अशुभोजनेअशङ् व्यासोनिषेधार्थेनकारः समासत्वान्नलोपोंज्ञावोनैकधेतिवत् स्ववंशीवश्चएवतोतस्य ला
हे तापक्षिणांभोजनभोगतत्पाव्यापारैतवान् किंपुनर्मनुष्याणामितिभावः हेगरुडासन हेगरुडबंधनकंकाम
के सर्वेश्वेकशास्त्रे तद्रक्षणम् पल्लववाहुयुगलंविपरीतरतेप्रिया धुनोतियत्रकूजेतीसप्रोक्तोगरुडाकृतिरिति हे

मधुमुरनरकविनाशनगरुडासनए सुरकुलकेलिनिदानजयजयदेवहरे ४

सुरकुलकेलिनिदान देवानांकुलेकेलानांनिदानआदिप्रवर्त्तक नितरांरसप्रदइतिवा यमपेक्ष्यसुरकुलस्यके
लोत्साहान्नवतीतिभावः पक्षे मधुनाम्नोमुरनाम्नोनरकनाम्नोविनाशक सुरकुलकेलानांदेवकुलसमूहक्रीडानां
निदानआदिकारणात इत्येवकारकइतियावत् अनेननायकस्यदेवक्रीडाविशिष्टसौंदर्यकुशलादयश्चगुणाउक्ताः
मधुर्वसंतेमधुरेमधुन्यप्यसुरेचेतिमेदिनीकरः मुरोसुरेथस्वजनाभिमतार्थप्रदेपिचेतिवैजयंती केशवइत्तिसुखेवापि
जलेब्रह्मांडेचेतिच सुरोदेवस्समरः निदानंत्वादिकारणेचेतिच निदानंकारणेप्रोक्तंविनाशेनिश्चयेपिचेति ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० अपरमथाहुः अमलकमलेत्यादिना अमलं यत्कमलस्य दलं पत्रं तद्वल्लोचने यस्य ताद्दृश। निर्मलकमलकोशा
रक्तपत्रलोचन इत्यर्थः अनेन नायिकांतरसंभोगमालिन्यं निरस्तम् भवमोचन कामसंतापनाशक त्रिभुवन
१५ स्य भवननिधान त्रिभुवनं भवनं यस्याः श्रीराधायास्तस्य तस्य निधान निधिविशेषः एतेन नायकगुणोत्कर्षः प्रतिपादितः
पक्षे अमलं यत्कमलं तस्य यद्दलं पत्रं तद्वल्लोचने यस्य अनेनापि मनोहारित्वं प्रोक्तम् भवस्य संसारस्य मोचन

जय

अमलकमलदललोचनभवमोचनए त्रिभुवनभवननिधानजयँदेवहरे ५

निस्तारक अथवा भवं जन्म तस्माज्जनान्मोचयतीति ताद्दृश अनेन सागररूपो नायकगुण उक्तः त्रिभुवनमेव भव
नं मंदिरं तदेव निधानं वसतिस्थानं यस्य ताद्दृश जयादिपदमुभयत्रसमानं निधानं त्वालये निधावपीति विश्वः भवनं
भाववेश्मनोरिति च पत्रं पलाशं छदनं दलं पर्णं छद इत्यमरः निधानमाकरे प्रोक्तं निक्षिप्ते द्रव्यस्थितावपीति कोषसमुच्च १५
ये अत्र स्तुतिरलंकारः ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सकलकलाप्रवीणत्वेन श्रीकृष्णं त्वां सांप्रतमभिमतमाशुहरनीशं च प्रार्थयंति तवेत्यादिना हे कृष्ण वयं तव चरणं प्रणताः
तिभावयस्मान् जानीहि इतियावत् ननु मया किमिति भवत्यः स्मर्तव्याः अयमर्थः स्मरणं चित्तधर्मस्तस्य त्वन्निष्ठत्वा प्रण
त्वय्येव तद्विधेयमिति सूचितम् अथवा त्वमेव निजचरणं तान् स्वजनान् भावय कुर्विति अर्थः प्रणतेष्वनुरागिष्वस्मा
सुकुशलं कुरु त्वमनुरागात् अन्यत्र विरतिश्चेति भावः तवचरणस्मरणमेवास्मासु कुशलं तदितरमकुशलमेवेति सूचित
म् पद्ये वयं तव चरणे पतिताः इति भावं जानीहि ननु मया ततस्तातमेवमवतां किमिदं कर्तव्यमिति सत आहुः कुर्विति श्रीजयेति श्रीजयदेवकवेः इदं कृतं व्रजयुवतिगीति
वयजा प्रणतेषु शरणागतेषु कुशलं कुरु ८ एवमुक्त्वाशीषमाशास्ते श्रीजयेति श्रीजयदेवकवेरिदं कुरुते मुद

तव चरणं प्रणता वयमिति भावय ए कुरु कुशलं प्रणतेषु जय जयदेव हरे ८ श्रीजयदेवकवेरिदं कुरुते मुदम् मंगलमुज्वलगीति जय जयदेव हरे ए

मंगलविधाने सङ्क्षेपु मुदं कुरुते कुरुतामिति वक्तव्ये कुरुत इति माहात्म्यदनुभवात् वर्तमाननोक्ता कीदृशम् मंगलं सुरतमंगा
मंगलविधाने सङ्क्षेपु मुदं कुरुते कुरुतामिति वक्तव्ये कुरुत इति माहात्म्यदनुभवात् वर्तमानतोक्ता कीदृशम् मंगलं सुरतमंग
लप्रदम् कीदृशम् उज्वलगीति उज्वला दोषरहिता गीतिर्गानं यस्य तत्तथा श्रीराधाकृष्णसुरतकेलिकथनेनोज्वलत्वं तदित
रकेलिवर्णने मलिनत्वमेव श्रृंगारस्यापि तथैवेति भावः पद्ये श्रीजयदेवकवेः इदं गीतं श्रृण्वतां पठतां वा मुदं आनंदं कुरु
ते कीदृशम् मंगलं मंगलप्रदं उज्वलगीति उज्वला अलंकारादिदोषरहिता गीतिः कविलक्षणमस्य गीति दोषास्तु स्मरते शंकि
तं भीतमुद्भ्रांतमव्यक्तमनुनासिकम् काकस्वरं शिरःकंपं तथा स्थानविवर्जितम् विस्वरं विरसं चैव विश्लिष्टं विषमाह
तं व्याकुलं तालहीनं च गीतदोषान् विदुर्बुधाः मुग्धीति [illegible] श्रृंगारः शुचिरुज्वल इत्यपि ए

Dr. Urmila Sharma Collection, Varanasi

गी·टी· अपरमप्याह रभिनवेत्यादिना हे अभिनवजलधरसुंदर नूतनप्रकटितस्निग्धनीरदद्युते जलदोपथायी।
१६ अपरमप्याह रभिनवेत्यादिना हे अभिनवजलधरसुंदर धृतमंदर धृतगोवर्द्धन गोपसंरक्षणार्थायधृतोयंमंदराचलइ
प्रसंतापहारकः सकलानंदप्रदश्चतथात्वम् धृतमंदर धृतपर्वतबंध तल्लक्षणम् वाडुनै केनवनितां कांतो
तिपद्मपुराणे किंच मंदराचलइतितन्नामांतरं अथवा धृतपर्वतबंध तल्लक्षणम् श्रीमुखचंद्रचकोर श्रीसंयुक्तंयच्छ्रीराधामुखंतदेवा
पुत्रानुरागिनीम् दधारसैगिरिमिवगिरिविंध्यः सकीर्तितइति श्रीमुखचंद्रचकोर श्रीसंयुक्तंयच्छ्रीराधामुखंतदेवा
मंदजनकत्वेनचंद्रस्तस्यचकोर तदापत्रजीवन अत्रश्रीराधाधरचंद्रामृतपानत्वेनश्रीकृष्णचंद्रस्यचकोरपक्षि
त्वंनिरूपितम् श्रीमद्वृंदावनेश्रीराधामुखमेवचंद्रोनापरश्चंद्रोविराजतइति अनेनश्रीमद्वृंदावननायिकाना

अभिनवजलधरसुंदरधृतमंदरए श्रीमुखचंद्रचकोरजयजयदेवहरे ७

मुत्कर्षः पक्षे पुनः कीदृशः अभिनवेति अभिनवोनूतनोजलधरोमेघस्तद्वत्सुंदरश्यामः अनेननायकस्यरतिगंभीर
स्निग्धेनवत्त्वंवोक्तम् धृतक्षीराब्धिमथनावसरेमंदराख्यः पर्वतोयेन अनेनापिनायकसामर्थ्यंप्रोक्तम् श्रीमुखे
तिश्रियालक्ष्म्याराधायावा मुखमेवचंद्रआह्लादकारित्वात्तस्यचकोर अत्रेंदिरावदनचंद्राधरपानेनल
गवतश्चकोरत्वंनिरूपितम् एतेननायकस्यरतिकौशलमेवोक्तम् प्रत्ययोभिनवोनवीनोनूतनोनवइत्यमरः
धाराधरोजलधरइत्यपि मंदरोमंदरोप्युक्तोबधमेदेपिमंदरः इतिमेदिनीकरः नायकगुणलक्षणम् त्यागीकु
लीनः कुशलोरतेषुकल्यः कलाबिनरूपोधनाढ्यः नव्यः क्षमावान्सुजनोभिमानीस्त्रीणांमतइतिशृंगार

तिलके अत्रास्तुतिरेवालंकारः ७

सकलकलाप्रवीणत्वेन श्रीकृष्णं स्तुत्वा सांप्रतमभिमतमाशास्ते इष्टं च प्रार्थयंति तवेत्यादिना हे कृष्ण वयं तव चरणं प्रणता इ
ति भावय स्मर जानीहि इति यावत् ननु मया किमिति भवत्सः स्मर्तव्याः अयमर्थः स्मरणं चित्तधर्मस्तस्य त्वन्निष्ठत्वा प्रण
त्त्वय्येव तद्विधेयमिति सूचितम् अथवा त्वमेव निजचरणं तान् त्वत्प्रणतान् भावय कुर्वित्यर्थः प्रणतेषु अनुरागिषु अस्मा
सु कुशलं कुरु त्वय्यनुरागः अन्यत्र विरतिश्चेति भावः तव चरणस्मरणे वा अस्मासु कुशलं तदितरमकुशलमेवेति सूचित
म् पद्ये वयं तव चरणे पतिता इति भावो नाहि ननु मया तत् ज्ञातमेव भवतां किमिष्टं कर्तव्यमित्यत आहुः कुर्विति
वयजा प्रणतेषु शरणागतेषु कुशलं कुरु ८ एवमुक्त्वाभीष्टमाशास्ते श्रीजयेति श्रीजयदेवकवेः इदं कृतं व्रजयुवतिगीति

तव चरणं प्रणता वयमिति भावय ए कुरु कुशलं प्रणतेषु जय जयदेव हरे ८ श्रीजयदेवकवेरिदं कुरुते मुद
म् मंगलमुज्ज्वलगीति जय जयदेव हरे ९

मंगलविधाने सङ्केषु मुदं कुरुते कुरुतामिति वक्तव्ये कुरुत इति भाषाद् अनुभवाद्वर्तमानतोक्ता कीदृशम् मंगलं सुरतमंगा
लप्रदम् कीदृशम् उज्ज्वलगीति उज्ज्वला दोषरहिता गीतिर्गानं यस्य तत्तथा श्रीराधाकृष्णसुरतकेलिकथनेनोज्ज्वलत्वं तदित
रकेलिवर्णने मलिनत्वमेव श्रृंगारस्यापि तथैवेति भावः पद्ये श्रीजयदेवकवेः इदं गीतं शृण्वतां पठतां वा मुदं आनंदं कुरु
ते कीदृशम् मंगलं मंगलप्रदं उज्ज्वलगीति उज्ज्वला अलंकारादिदोषरहिता गीतिः कविभिर्यस्य गीतिदोषास्तु भरते शंकि
तं भीतमुद्घृष्टमव्यक्तमनुनासिकम् काकस्वरं शिरःकंपं तथा स्थानविवर्जितम् विस्वरं विरसं चैव विश्लिष्टं विषमाह
तं व्याकुलं तालहीनं च गीतदोषान् विदुर्बुधाः मुञ्चतीति पदद्वयोर्हर्षरसः परमः श्रृंगारः शुचिरुज्ज्वल इत्यपि ९

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰टी॰ ७

एवंपूर्वोक्तप्रकारेणश्रीराधाकृष्णयोरहःक्रीडावर्णिताः इदानींतत्पुष्टिकारिणींलीलाभूमिकामाह विप्रयोगात्मि
काकेलिःप्रथमंसंनिरूप्यते संभोगरसपुष्ट्यर्थंप्रेमवाक्यैर्यस्यया तत्रापिश्रीराधोत्कर्षकथनाययूथली
लामाह पद्मेत्यादिनामधुसूदनस्यश्रीराधाधरामृतपानकर्तुःपुरुषस्यलिप्तवेनैववक्षस्थलंवोयुष्माकंप्रियंमनोऽभीष्ट
मनुपूरयतुसंपूर्णंकरोतु कीदृशम् पद्मानिक्रीडार्थंबिंबितेयस्याःपद्मवर्णावापद्मांकितासामुद्रास्त्रोत्काम
हासौभाग्यवतीवापद्माश्रीराधातस्याःपयोधरतटीकुचाग्रंतस्यपरिरंभेणालिंगनेनलग्नंयत्काश्मीरंकुंकुमंतेनमु

पद्मापयोधरतटीपरिरंभलग्नकश्मीरमुद्रितमुरोमधुसूदनस्य व्यक्तानुरागमिवखेलदनंगखेदस्वेदांबुपूरमनुपू
रयतुप्रियंवः ६

द्रितंचिह्नितंसंजातमुद्रंवा श्रीराधयास्वप्रेमदर्शनाय निजस्तनाग्रलिप्तकाश्मीरेणमुद्रेवदत्तेतिभावः खेलनेनविनो
देनानंगक्रीडायांयःखेदःसुरतायासस्तेनयत्स्वेदांबुप्रस्वेदजलंतस्यपूरःप्रवाहोयत्रतादृशम् कीदृशमिव व्यक्तानु
रागमिव व्यक्तःप्रकटीभूतोनुरागःस्नेहोयत्रतादृशमिव अनेनश्रीराधानुरागाधिक्यात्स्नेहःकुंकुमरागव्याजेनब
हिर्निर्गतइतिभावः पक्षे पद्मालक्ष्मीःमधुसूदनोमधुदैत्यहंता शेषंसमानं पद्मालक्ष्मीःसतापद्मापद्मचिह्ना
पिकामिनी काश्मीरंकुंकुमेप्रोक्तमिति अनेनदाक्षिण्यरूपोनायकगुणउक्तः तल्लक्षणंशृंगारतिलके योगौरवं
नयंप्रेमसद्भावपूर्वंयोविति नमुंचत्यन्यचित्तोपिज्ञेयोसौदक्षिणोयथेति श्लेषोक्तिरलंकारः ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वोक्तश्लोकेन केलिरससोद्गमुक्त्वा तद्विधायिनी वासंती नाम्नी काचिदपि सहचरी सरसमिति शृंगाररससहितमनुना-
यसहितं वा यथा भवति तथा वसंतसमये राधामिदमूचे सहचरीलक्षणम् स्वात्मनोप्यधिकं स्नेहं कुर्वाणा यो स्यमा-
श्रयम् विश्रंभिनी वयोवेषादिभिस्तुल्या सखी मतेति वासंती माधवीलता तत्कुसुमवत्सुकुमारैः कोमलैरवयवैरुपल-
क्षिताम् पुनः का कांतारे वने भ्रमंतीं इतस्ततो गच्छंतीम् भ्रमंतीमित्यत्र हेतुगर्भविशेषणम् बहुबारं हरिं श्रीकृष्णस्या-
नुसरणमन्वेषणं यया ताम् अन्वेषणे हेतुः अमंदं अधिकं यथा स्यात्तथा कंदर्पस्य कामस्य ज्वरस्तापस्तेन जनि-

वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुविहितकृष्णानुशरणाम् अमंदं कंदर्पज्वरजनितचिंताकु-
लतया बलद्बाधां राधां सरसमिदमूचे सहचरी ७ वसंतरागे यतिताले ललितलवंगलतापरिशीलनकोमलम
कर लयसमीरे मधुकरनिकरकरंबितकोकिलकूजितकुंजकुटीरे विहरति हरिरिह सरसवसंते नृत्यति युवतिजनेन स-
मं सखि विरहिजनस्य दुरंते ८

तानुत्पादिता चिंता तया आकुलतया व्याकुलत्वेन बलद्बाधां बलंती प्रसरंती वा धा दुःखं यस्यास्ताम् श्रीकृष्णविरहातुरत्वेन न च जीविष्यतीति भावः महारण्ये दुर्गीपथे कांतार इत्यमरः पीडा बाधा व्यथा दुःखमित्यपि च अवयवैरित्यत्र जटाशि- स्तापम इतिवत् वासंती माधवीलतेत्यमरः ७ वसंतरागे यतिताले रागरूपं शिखंडिबर्होच्चयबद्धचूडः पुष्पान्वितं चूतलतांकुरेण भ्रमन्मुदा वासमनेगमूर्तिर्मतो मतंगस्य वसंतरागः तालक्षणं लघुद्रुतौ यत्र ताले यतितालः सकथ्यते सरसमिदमूचे इति श्लोकोक्तं प्रपंचयति ललितेत्यादिना गीतेन हे सखि राधे इह चैत्रे वेशाखे हरिर्मनोह- वा

राधे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सममहं दर्शयति नाहे विरहे पुरतो दर्शनं संभवतीति भावः तत्रा
तो नंदसूनुर्विहरति विहारं करोति इह विहरतीति सममहं दर्शयति नाहे विरहे पुरतो दर्शनं संभवतीति भावः तत्रा

गी०टी० १८ पि नैको विहरति किंतु युवतिजनेन व्रजवधूसमूहेन समं सह नृत्यति नर्मसंकरोति अनेन व्रजयुवतीयूथलीला
प्रोक्तेति भावः कीदृशो इह सरसबसंते शृंगाररससहितवसंतसमये पुनः की विरहिजनस्य दुरंते विरहिणो जना
गोपीजनाय स्य श्रीकृष्णस्य दुःसहे त्वां विनेत्यर्थः अथवा विरहिजनस्य वियोगिनो जनस्य दुरंते दुःखेनांतः समाप्ति
र्यस्य तादृशे वियोगिनां दारुणे न तु विहरतां युवतिभिः सह यदि श्रीकृष्णेनानुव्रजे व्यसितदायं बसंतस्तत्रापि दारु
णो न भविष्यतीति भावः धृपदम् बसंतसरसतामाह ललितेति ललिताकमनीया या लवंगानां लतातस्याः परिशील
नेनालिंगनेन कोमलो मृदुलो मलयस्य पर्वतस्य वा समीरो वायुर्यत्र अनेन वायुस्त्रिविधो बर्णितः कोमलेति मंदत्वं
लवंगेति सुगंधित्वं ललितेति शीतलत्वम् पुनः कीदृशे [redacted] मधुकरा मधुकर्त्तारो येन तत्तस्मान कर्त्तारस्तेषां निक
रेण समूहेन करंबिताः संयुक्ता ये कोकिलास्तैः कूजितं शब्दितं कुंजकुटीरं मल्लकुंजमंदिरं यत्र त्वां विना इह कुंज
मंदिरमपि कुटीकृतं तुच्छमिति भावः मधुकरयुक्ताः कोकिलास्त्वद्विरहखेदेनैव कूजंतीति ध्वनिः अल्पा कुटी कुटी
रः स्यादित्यमरः समूह निकरव्यूहमित्यपि करंबितं तु संयुक्ते समूहार्थे उत्तके पिचेति मोजे समीरमारुतमरुज्जगत्प्रा १८
णसमीरणा इत्यमरः मधुकरो मधुव्रतो मधुलिहो मधुपालिन इति च स्तोमश्च निकरव्रातबारसंघातसंचया इत्यपि
स्वभावोक्तिरलंकारः १

Dr. Urmila Sharma Collection, Varanasi

वसंतइःसहतामेवतनोति उन्मदेत्यादिना उन्मदउत्कटउद्धतोवाउद्भटोवाउन्मादावस्थांप्राप्तोवायोमदनःकंदर्पस्तादृशोमनोरथो
येषांपथिकानांवधूजनानांस्तैर्जनितउत्पादितोविलापोवियोगोयत्र अनेनोद्वेगावस्थातज्जन्याविलापश्चोक्तः कादृशे अलिकुले
भ्रमरसमूहैःसंकुलोव्याप्तःकुसुमसमूहःपुष्पवृंदस्तेननिराकुलःनितरांआकुलोव्याकुलोबकुलकलापोबकुलपुष्पाणां
समूहोयत्र अथवा बकुलएवकलापोभूषणंयत्र अनेनत्वद्दर्शनंविनानानुरागोदयःकस्यापीत्युक्तंकलापोभूषणेबर्हेतूणी
रेसंहतावपीत्यमरः संकुलंव्यवधानेस्यात्स्पष्टार्थेवचस्यपीतिविश्वः केसरोबकुलइत्यपि केसरःकुंकुमेप्रोक्तः केसरोनागकेस
रे वाजिमौलिकेत्याहप्रोक्तःपुष्पादिषपीतिधरणिः हेत्वक्तिरलंकारः २ पुनःकी मृगमदस्यकस्तूरिकायाःसौरभस्यसुगंधस्यरभ हर्षस्य

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे २
मृगमदसौरभरभसवशंवदनवदलमालतमाले युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ३

सोवेगस्तस्यात्मपरत्ववादिनानवदलमालानूतनपत्रपंक्तिर्येषांतादृशास्तमालवृक्षायत्र पुनःकीदृशे युवजनानांतरुणकामिज
नसमूहानांहृदयंविदारयंतितियेतादृशाःमनसिजस्यकामस्यपेनखास्तद्वद्रुचिर्दीप्तिर्येषांतादृशायेकिंशुकाःपलाशकुसुमा
नितेषांजालानियत्र साधारण[redacted]तरुणपुरुषहृदयविदारकाःयुवतिहृदयविदारकाःसुतरामितितामामहष्टगुणकामोद
पादिसर्थः उक्तंच कामश्चाष्टगुणःस्त्रीणामिति एतेनबसेतस्यइःसहतोक्ता मृगनाभिर्मृगमदःकस्तूरीचेत्यमरः रभसोवेगः
हर्षयोरितिविश्वः रुचिर्मयूखेशोभायामभिष्वंगाभिलाषयोरिति पलाशःकिंशुकेमतइत्यपि कामःपंचशरःस्मरःशंवरारिर्मन
सिजःइत्यमरः जालंगवाक्षइत्यपि रूपकालंकारः ३

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी०
१९

कीदृशो मदनः काम एव महीपतिः सार्वभौमस्तस्य छत्रार्थं यः कनकदंडस्तस्येव रुचिर्दीप्तिर्यस्य ताहृशस्य केसरस्य नागकेसरस्य कुसु-
मानां पुष्पाणां विकाशः प्रकाशो यत्र पुनः कीदृशो मिलिताः झिल्लीमुखाः भ्रमरा एव बाणा यत्र ताहृशं यत्पाटलपटलं पुष्पसमूहस्तेन
कृतः स्मरतूणस्य कंदर्पतूणीरस्य विलासो लीला सारूप्यं वा यत्र ननु कामः कुसुमबाणस्तेन भ्रमरबाणाः स इदं यं तत्रेला अत्रा-
तिव्यथोत्पादकत्वेन भ्रमराणां बाणसाम्यं केसरो नागकेशरः कनकाह्वयः इसमर अलिबाणौ झिल्लीमुखाविति च समूहे पट-
लं नालेछिद्रे संरोधके पिधे ते त्रिलोचनः तूणोपासंगतूणीरनिषंगाइषुधिरिस्समरः एतेन स्मरातिशयेकसमर्थो वसंतगुण उ-
क्तः रूपकालंकार एव ५ पुनः कीदृशो विगलितं गतं लज्जितं लज्जा यस्य तस्य जगतः प्राणिमात्रस्यावलोकनेन विशेषदर्शनेन तरुणैः

मदनमहीपतिकनकदंडरुचिकेशरकुसुमविकाशे मिलितशिलीमुखपाटलपटलकृतस्मरतूणविलासे
५ विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे विरहिनिकृंतनकुंतमुखाकृतिकेतकिदंतुरिताशे ५

नवीनकरुणकैः पुष्पविकाशव्याजेन कृतो हासो यत्र अत्र हासरसस्य शुभ्रत्वात्पुष्पविकाशसाम्यम् उक्तं च श्वेतो हा-
सः प्रकीर्तित इति अथवा विगलितलज्जितानां वियोगिजनानां जगसवलोकनेन तरुणैरवियोगिभिः करुणं यथा स्यात्तथा
कृतो हासो यत्र ताहृशे वियोगिनो लज्जां सकृपत्रपंतीति च हासस्तेषां मिलितानाव तरुणा[redacted]लिज्जा एव हृद्धानां कृतसंनिवारणानां
तरुण हासेन दोष इत्युक्तम् कीदृशे विरहिणां वियोगिनां निकृंतनाय त्रिधाय नविदारणाय कुंतस्य पुष्पविशेषस्य पत्रस्य मुखम
ग्रमागः तस्येवाकृतिर्यस्य ताहृशं यत्केतकं तेन दंतुरिता व्याप्ता आशा दिशो यस्मिन् केतकि रितिपाठांतरे दंतुरदंतमुकुलेविषमे-
मकुंतने अग्रभागो वितीस्तोचप्रोक्तं तेचेति हलायुधः करुणः करुणोत्र हेतुरूपायां करुणा इति विश्वः क्षितालुकक्कुमः काष्ठा आशा

कुसुमशरः तावकादिव्यापादव दंतविताविनिर्मितानीत्येव
इतरथः ५

१९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कीदृशे मधौ वसंते यस्मिन्माधविका वसंतो नायकः माधविका वासंती नायिका च तस्याः परिमलेन सौरभेण ललि
तेम नोहरे यद्वा मधुर्वसंतः श्रीराधाधरामृतं वा तस्मिन् यत्वा माधवः श्रीकृष्णो मधुप्रिया माधविका श्रीराधा तस्या अंगपरि
मलेन सौरभेण मुखपरिमलेन वा ललिते सुंदरे इति ध्वनिः नान्यथेदृशी सौरभसंपत्तिर्वसंते इति भावः पुनः कीदृशे नव त
मालिकया नूतनमालिकापुष्पेण अतिसुगंधौ अतिशयेन सौरभयुक्ते अथवा मालतिजातीति पावः नवमाला
ति नूतनमालतिजातिश्च ताभ्यां सुगंधौ सौरभयुक्ते गंधस्येदुत्पूतिसुरभिभ्य इतीत मालतिजातिरित्येकं पदं

कया माधविकापरिमलललितेनवमालतिजातिसुगंधौ मुनिमनसामपि मोहनकारिणि तरुणाका
रणबंधौ ६

वा कीदृशे मुनिमनसाम खंडब्रह्मानंदमोदजुषां सेवमानानां किं पुनरन्येषां मोहनकारिणि मोहजनके एतेन ब्रह्मानंदा
च्छ्रीराधाकृष्णजनानंदो धिक इति ध्वनितम् न चेदं वसंतसौंदर्यं सोभाग्यं च किंतु विहारिणोः श्रीराधाकृष्णयोरेव पुनः
की तरुणानां विलासिपुवजनानां स्वाभाविकमित्रे यद्वा कारणेन बलात्कारेण वध्नातीति वंधुरासक्तिकारके पुरुषवि
हारः स्त्रीणां रतिजनकोन्नवलेव अत्र पुरुषाणां मनोहरत्वमुक्तमिति अथवा जीवानाम जिमतं तनोतीति तरुः कल्पत
रुः श्रीकृष्णस्तेन तरुणा श्रीकृष्णेन अकारणवंधो सहजमित्रे विमर्दोत्थे परिमलो गंधे जनमनोहर इत्यमरः ६

Dr. Urmila Sharma Collection, Varanasi

गी॰टी॰ कीदृशो स्फुरंतीसात्विकोदयेनकंपमानानतुवायुनाकोंसाघोतमानावायाश्रतिमुक्तलतावासंतीमाधवीचल
२० तातस्याः परिरंभेनालिंगनेनमुकुलितोजातकामांकुरःपुलकितःरोमांचितश्चूतवदसाधारणगुणःश्रीकृष्णोयत्र॰
चूतएवेतिताहृशो अनेनश्रीकृष्णचंद्रस्पर्शेनैवचूतस्यपुलकादयोनवासंतीलतालिंगनेन एवंप्रसिद्धिःमहारहा
महानायिकायास्पर्शमात्रेणैवनवीनपल्लवपुष्पफलसंपदोभवंतीति दोहदशालेपि दोहदंबिनानतरवःपल्ल

स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते वृंदावनविपिनेपरिसरपरिगतयमुनाजलपूते ७

वपुष्पफलाभवंति तस्मात्तद्देवमंगलंतच्चरणस्पर्शमेव एतावतावसंतस्यसरसतांउरंततांचोक्त्वेदानींक्रीडायाःस्था
नविशेषमाह वृंदावनारण्यविपिनेवने परिसरेसमीपदेशेयपरितःसर्वतःगमनशीलेनश्रीकृष्णाजलेनपूतेपवित्रिते पू
तंयमुनाजलंयस्मिन्नितिवातेनपूते श्रीकृष्णायाःपरितःप्रसरणंवसंतेतच्चरणस्पर्शोपचितपूरत्वादेव वासंतीमाध २०
वीलतेत्यमरःपर्यंतभूःपरिसरइत्यपि आम्रश्चूतइत्यमरः मुकुलितइतितारकत्वादितच् ७

CC0. In Public Domain, Digitizagtion by eGangotri

एवंगीतार्थंवसंतवर्णनमुपसंहरन्निवविद्वज्जनप्रवृत्त्यर्थंस्वगीतोत्कर्षमाह श्रीजयदेवेत्यादिना श्रीजयदेवकवेरिदंभणितंगीतमुदयतिविराजते तत्रहेतुः हरिचरणयोःस्मृतिःस्मरणंतेनसारंश्रेष्ठम् अथवा हरिचरणस्मृतिःएवसारोयत्रताहृशम् नात्रहरिपदंचैत्ताहरणपरंमनोहरपरंवोधव्यम् नहिव्रजवासिनांमाहत्म्यज्ञानाधीनोनंदकिशोरेश्वरणयःकीहृशम् सरसंश्रृंगारेणसहवर्णयेनवासहश्रीराधयावासहइतियावत् तत्समयोचिते

श्रीजयदेवभणितमिदमुदयतिहरिचरणस्मृतिसारम् सरसबसंतसमयबनबर्णनमनुगतमदनबिकारम् ८

यद्वनबर्णनेयद्भणिते बनशब्देनवृंदाबनमेवनहिसर्वबनेषुताहृशंसौभाग्यम् कीदृशम् अनुगतमदनबिकारम् अनुगतःप्राप्तःसंलग्नोवामदनस्यकामस्यविकारउदयोयत्र विश्वस्तोजनकोपियेनवसंताश्रयभणितेनकंदर्पोपिमोहंप्राप्तइतिभावः नहिमदनोवसंतेनमोहमुपयातिकिंतुश्रीवृंदावनचंद्रिकाविहारेणेतिरसज्ञाएवजानंतीति स्वभावोक्तिरलंकारः ८

Dr. Urmila Sharma Collection, Varanasi

गी०टी० पूर्वंवसंतसमयस्यदुःसहतोक्तासंप्रतितन्नायोरपिवियोगिजनसंतापकत्वमाह दरविगलितेत्यादिना इहा
२१ स्मिन्वसंतेबनेवास्वतोदुःसहेद्गंधवाहोवायुरपिप्रसरद्यथास्मरवत्तितथाचेतोदहतीत्यन्वयः अर्थाद्विरहिणा
मितिशेषः कीदृशः केतकीगंधबंधुः केतकीगंधोबंधुर्यत्रतद्बंधुर्यो अनेनपरमाधिक्यंसूचितम् पुनःकी अ
समबाणस्यकामस्यप्राणवत्कामप्राणसदृशः उक्तंच अपूर्वंवधनुर्विद्यामन्मथस्यमहात्मनः शरीरमन
तंयातिजिनस्यंतगीतंमनइति किंकुर्वन्काननानिवनानिवासयन्सुरभीकुर्वन् कैःदरईषद्विगलितामल्लय

दरविगलितमल्लीवल्लिचंचत्परागप्रकटितपटवासैर्वासयन्काननानि इहहिदहतिचेतःकेतकीगं
धबंधुःप्रसरदसमबाणप्राणवद्गंधवाहः ८

वायुस्पर्शेणयामल्लीबल्लिर्मल्लिकालतातस्याःचंचंतःप्रसरंतोयेपरागाःपुष्परेणवस्तएवप्रकटिताःपटवा
साःपिष्टातकास्तैः अतिसुकुमारत्वादीषद्विगलितायास्तस्याःपुष्परेणुसमूहःसंभवतीतिभावः कामस्या
नंगत्वेनतद्रूपेणप्रसरत्सएवचेतोदहतीतिध्वनितम् ईषदर्थेदराव्ययमितिविश्वप्रकाशः परागःपुष्परजः
सातिच पिष्टातःपटवासकइत्यमरः पटवासःपरागेपिपटस्या र्थेधूपनइतिमेदिनीकरः श्लेषोपमालं

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वमेतावद्व्याप्तुवर्णनेन बसंतस्य दुरंतत्वमुक्तं संप्रति कोकिलकाकलीनामपि तथात्वमाह। आसुत्संगेत्यादि।
श्रीखंडशैलानिलो मलयाचलपर्वतवायुः ईशोरुद्रस्तस्याचलो हिमाचलस्तमनुसरति किमर्थम् प्रालेयप्र
लयकालेयतल्लवनजीवनं तदिच्छया कस्मादिव आद्रेर्मलयस्योत्संगे ये बसंतो भुजंगाः सर्पास्तेषां कवलनेन नगाधे
यः क्लेशस्तस्मादिव अनेनास्योद्वेगावस्था कथिता किंच पिकानां पुंस्कोकिलानां गिरः कुहूः कुहूरित्येवं रू

अद्र्युत्संगवसद्भुजंगकवलक्लेशादिवेशाचलं प्रालेयप्लवनेच्छयानुसरति श्रीखंडशैलानिलः। किं
चस्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलंति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः

पाः पंचमस्वरानुवादिन्यो हर्षोदयादुन्मीलयंति तिन्नवंति किं कृत्वा स्निग्धानि रसालानामाम्राणां मौलौ शिखरे यानि
६
मुकुलानि तानि विलोक्य दृष्ट्वा कीदृशाः कलोत्तालाः कलमधुरास्तैरुत्तालाश्च पुरुषवत्कूजित्वा उत्तालाः राजसन्नादोद
त्तिः पुंसि विशिखो पांस्यान्मुकुटे मस्तके चेति हलायुधः ध्वनौ तु मधुरास्फुटइति कलः अर्थांतरे न्होपमालंकारः ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वंवसंतस्यतद्वायोश्चकोकिलकाकलीनामपिचदुःसहत्वमुक्तंसंप्रतितद्दिवसानामपिचविश्लेषदुरंतत्वमाहोन्मील
गी०टी० इत्यादि पथिकैरमीवसंतसंबंधिनोवासरादिवसाःकथंकथमपिमहताकष्टेननीयंतेसमाप्यंतेअतिवाह्यंतइत्यर्थः
२२ कादृशा उद्गीर्णःप्रकटीकृतःकर्णज्वरःश्रोत्रसंतापोयेषु कैःउन्मीलंतिप्रकटीभवंतियेमधौवसंतेगंधास्तल्लंपटाये
मधुपाभ्रमरास्तैर्व्याधूताःकंपिताःयेचूतांकुराआम्रमुकुलानितेषुक्रीडतांकोकिलानांयाकाकल्योव्यक्तमधुराणि
रस्तासांयेकलकलाःकोलाहलास्तैः कर्णस्याकाशगुणत्वात्कर्णज्वरस्यापिदीर्घत्वंकर्णइत्युपलक्षणंसर्वेंद्रियज्व

उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः नी
यंतेपथिकैःकथंकथमपिध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमीवासराः ९

राइति तर्हिकथंनीयंतइत्यतआह ध्यानेत्यादि ध्यानेस्वप्रियाचिंतनेकेनापिभाग्योदयेनयदवधानंमनसस्तल्ली॰
नत्वंतेनक्षणःप्राप्तोयःप्राणसमायाःप्राणवत्प्रियायाःकांतायाःसमागमरूपोरसस्तस्माद्उत्पन्नायेरसोल्लासाःर॰
सोत्कर्षास्तैः कोलाहलःकलकलस्तिरश्चांवाशितंरुतमितिसमरः काकलीतुकलेसूक्ष्मेइत्यपि आम्रश्चूतोरसा २२
लोसावित्यपि मधुमद्येपुष्परसेइत्यपि मधुपभ्रमरालपइत्यपि स्वभावोक्तिविरोधौरेवालंकृती ९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंवसार्थमुद्दीपनेनवसंतभावावर्णिताइदानींरागांतरेणविनावामाह अनेकेत्यादि पद्यपूर्वंवासंतीप्ररोहतयोवाच
सासौसखीसमक्षंराधिकांपुनराहेत्यन्वयः किंकुर्वती आरात्समीपेमुरारिंमुरस्यमधुराः समूहस्यारिः हंतास्मारकः श्रीकृ
ष्णंउपदर्शयंती मधुमुरनरकेतिमुरारिशब्दार्थोदर्शितः कीदृशम् अनेकनारीणांपरिरंभसंभ्रमेणालिंगनादरेणस्फुरंश्चा
मनोहारीविलासस्तस्यलालसाऔत्सुक्यंयस्यतम् अथवा अनेकनारीविलासंबैदग्ध्यंविद्यतेयस्यांश्रीराधायांला
लसम् अन्यसदपूर्वंवत्संभ्रमःस्नेहहर्षयोरितिविश्वः आराद्दूरसमीपयोरितिअमरः नचविरहेप्रत्यक्षतासंभवाति

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसम् मुरारिमारादुपदर्शयंत्यसौसखीसमक्षंपु
नराहराधिकां ॥ रामकरीरागेरूपकताले चंदनचर्चितनीलकलेवरपीतवसनवनमाली

सापुनर्नायिकानायकयोर्नसखीनामिति अर्थांतरन्यासोलंकारः ॥ एवंराधामाधवयोरहःकेलिंनिरूप्येदानींसमुदा
यकेलिंगीतेनैवदर्शयति चंदनेत्यादिना गीतस्यास्यरामकरीरागः रूपकतालश्च तालरूपंपूर्वमेवोक्तम् रागलक्षण
म् स्वर्णप्रभाभास्वरभूषणाचनीलंनिचोलंसुतनौवहंती कांतेपदोपांतमधिश्रितेपिमानोन्नतारामकरीप्रदिष्टाइति गीता
र्थमाह हेविलासिनिहेकृष्णविहारशालिपश्येतदितिशेषः इहवृंदावनेवसंतेवामुग्धवधूनिकरेसुंदरवधूसमूहेहरिर्मनो
हरोविलसतिक्रीडांकरोति त्वांविनाकुहइत्यपिनक्रीडतीत्यर्थः कीदृशोकेलिपरेक्रीडापरायणे अत्रमुग्धवधूशब्देनके

Dr. Urmila Sharma Collection, Varanasi

लिपरस्याष्टेनच हावभावाद्यनभिज्ञतासामान्यक्रीडापरताचव्यंजिता विलासिनीतिसंबुद्ध्यालव्ध्येवसर्वकलासंपद्दर्शिता विलसतीतिसामान्यक्रीडेतिध्वनिः कीदृशे चंदनेनचर्चितेलिप्तेपिनीलकले केलिकला।कौशलत्वेनीलामलनीभूताकलायस्मिन् किंभूतोहरिः वरेपीतवसनवनमालेयस्य अथवा त्वद्वियोगमसहमानएवचंदनेनचर्चितात्र अनुलिप्तानीलकलेवरः पीतवसनंवनमालाचयस्यसः एतेनलव्ध्येवानुरागानंकः अंकंच अंतर्गतामदनवह्निशिखावली यासावाधतेकिमिहचंदनचर्चितापि यत्कुंभकारदहनोपरिपंकलेपस्तापायतस्तुनसौनत्वतापशांत्यैइत्यादि तस्मात्त्वमेवविलोकयेतिदर्शयति कीदृशोहरिः केलिषुक्रीडासुचलंतीकंपमानेयेमणिकुंडलेताभ्यांमंडितमलं

केलिचलन्मणिकुंडलमंडितगंडयुगस्मितशाली हरिरिहमुग्धवधूनिकरेविलासिनिविलसतिकेलिपरे ॥ ध्रु
पदं १०

कृतंगंडयुगंयस्यस्मितेनेषद्धसितेनवाशालीशोभमानः स्मितलक्षणंचभरते ईषद्विकसितैर्गण्डैःकटाक्षैः सौष्ठवान्वितैः अलक्षितद्विजंधीरमुत्तमानांस्मितंभवेदिति केलिचलन्मणिकुंडलेत्यादिनाकुंडलवलनंसाकांक्षंनद्यो तासुदाक्षिण्यमानुनंदिनातुल्याधिकाच इतियत्स्मितंतेनशालीशोभमानोनतुतासांविलासेनेतिभावः मुग्धवधूरित्यत्र कर्मधारयः एतेनमौग्ध्यमेवनतुकेलिकुशलतादर्शिता किंक्रीडस्यपितुचेष्टांकरोतीति अतएवलयासमस्तेएषनवितव्यामितिममप्रार्थना मुग्धःसुंदरमूढयोरितिविश्वः विलासोहावविशेषः तात्कालिकोविशेषस्तुविलासोंगक्रियादिषुसमरः अथकलेवरंगात्रंवपुःसंहननमित्यमरः गंडौकपोलावित्यमरः स्वरूपोक्तिरलंकारः विलासलक्षणं वार्तस्यांना।

मन्दानांनेत्रवक्रादिकर्मणि तत्सहितविलोचय
सविलासःप्रकाशितः १

CC0. In Public Domain, Digitizagtion by eGangotri

व्रजवधूनां हावभावाद्यनभिज्ञत्वं कथयन् प्रथमस्तामेव युवतिं पृथुलीलामाह पीनेत्यादि काचिद्गोपवधूः पीनपयो
धरभारभरेणातिस्थूलस्तनगौरवाधिक्येन सरागे सस्नेहं यथा स्यात्तथा अथवा पीनोतितीव्राः पयोधरयोर्भारस्त
स्य भरेण भारेण स्वस्याभिप्रायप्रकाशनार्थं तेन हरिं मनोहरं परिरभ्याऽऽलिंग्य हरेर्गानानंतरं गायति न तु स्वयं गायति तस्यैव दाक्ष्य
ने स्फुरमेव श्रीकृष्णालिंगनं विनापि प्रथममालिंग्य शृंगाररसशोभामावहतीति उक्तं च वेषदेशक्रियालापपरि
मादिभिर्वनैः स्यादानंदस्तदा यूनोरन्योन्यमनुरक्तयोरिति कीदृशं हरिं सरागं त्वय्येव कामभावेन स्नेहेन वा सानुरागम्

पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् गोपवधूरनुगायति काचिदुदंचितपंचमरागम् २

न तु सिंदूरादिरागसंयुक्तम् एतेन तासाम वैदग्ध्यमेव ध्वनितम् पुनः कीदृशम् उदंचितस्तालालापनेनाभ्युदंचितः पं
चमस्वरो येन तम् शृंगारे पंचमराग एव स्वरो वा तुल्येन क्रियते अथवा पंचमरागगानं तासां परीत्यार्थायितवाक्या
दजननायुचेति ध्वनिः उक्तं च निषादं षड्जपतेवाजीगावक्षभमभाषिणः अजाविकं तु गांधारं धैवतं ह्नेहते गजः षड्ज डु
मयूरा ब्रुवते मग्राम ध्यमभाषिणः पुष्पसाधारणे काले कोकिलो रौतिपंचममिति हास्यशृंगारयोर्ज्ञेयौ स्वरौ पंचम
मध्यमौ षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुतेरसे गांधारश्च निषादश्च कर्तव्यौ करुणाश्रयौ इति २

Dr. Urmila Sharma Collection, Varanasi

गी०टी० कस्याश्चिदवैदग्ध्यमाह कापीत्यादि कापि मुग्धवधूः मधुसूदनस्य वदनसरोजं मुखपंकजं ध्यायति स्मरति स्म तस्य श्रीकृष्णस्य ध्या
२५ नादवैदग्ध्यमेव विस्मायतेस्याः कीदृशम् विलासेन विरोधनर्त्तनेन विलोलयोश्चंचलयोर्विलोचनयोर्यत्खेलनं तेन जनितत्र
सादितो मनोजः कामो येन तम् पुनः कीदृशं मुखम् अधिकं अनुपममाधुर्यविलाससारसंदोहमित्यर्थः क्रियापदविशे
षणं वा सौगंध्यादिगुणमधुररसेन कामोद्दीपकत्वात्तापहारकत्वाच्च वदनस्य सरोजोपमा मधुसूदनपदं पूर्ववत् कापी
ति सामान्यकथनाय ध्यायती संगसंगात्वाबोदर्शितः मातश्चाभिन्नवसरे त्वया गंतव्यमिति कलाकौशलेनायं वचनीय
इति भावः २ कापि नितंबवती गोपवधूः दयितं कृष्णं चारु मनोहरं यथास्यात्तथा कपोलतले चुंबनं कृतवती कीदृशी

कापि विलासविलोलविलोचनखेलनजनितमनोजम् ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोज-
म् २ कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले ५

किमपि लपितुं मंत्रयितुं प्रलपितुं वा कंदर्पवशाद्धैर्येण स्वचातुर्यरक्षणाय श्रुतिमूले कर्णमूले मिलिता संलग्ना व्याजेनालि
गनाय वा नाम ममतं तत्कर्णमूले पद्वे सुंवा अतएवोक्तम् किमप्यनिर्वचनीयमिति नितंबवसनेनालिंगनाचतुरतोक्ता
कीदृशी पुलकैः रोमांचैरनुकूले नायिकाभिलाषसूचके पुलकोद्गमस्तु लक्ष्मामश्रवणसात्विकोदयात् चुंबनेनेस्या
स्याश्च धीरत्वं संपादितम् औत्कंठेन सहसा कांतमुखचुंबनं सखीजनहास्यकारं नवतीति भावः यदा त्वत्कथाश्रवणे २५
न जातपुलको भवति तदा त्वय्येव स्नेहप्राचुर्यं तस्मात्त्वया शीघ्रं तत्र गंतव्यमिति ५

एवं हे दृष्ट्वा चतुर्यैरीमासं तुष्टां श्रीराधां सखी पुनराह हे रासरसे आश्चर्यं सखि कलय रासरसे गोपवधूनिकर
रचितेपि युवतिः श्रीराधैव प्रसंशे स्तुता श्लाघितेत्यर्थः न त्वया सहनृत्यपरा रासरसस्तु वरस्त्रीकदंबं विनानव
तासं मनोहरत्वं तद्विकारस्योक्तम् अथवा हरिणा सहनृत्यपरा काचिद्युवतिस्त्वां प्रशंसे ननु सा कथं तथा
वक्ते उच्यते रमणीयवस्तुनि नकस्यवहुमान इति अथवा रासे रासक्रीडायां रसः वहुनर्तकीनृत्यविशेषो गो

करतलतालतरलबलयाबलिकलितकलस्वनबंशे रासरसे सहनृत्यपरा हरिणा युवतिः प्रसंसे
शे ५

पुक्रीडा वा तस्मिन् हरिणा सहनृत्यपरा नृत्यमात्रकुशला न तु सर्वकर्मसु एवमपि तस्या उपहासः तवैव प्रशंसे
इति ध्वनिः कीदृशे करतलयोस्तालेन परस्परं वादनेन तरला चंचला या वलयावलिः कंकणपंक्तिस्तया कलि
तो मिश्रितः कलस्वनः अव्यक्तमधुरशब्दः सहितो वंशो वेणुर्यत्र तादृशे रासरस इत्यनेन गोपीह क्रीडास्वेव सा स्तुता
न तु सकलसंगीतकलास्विति ध्वनितम् द्रुमन्नेदेकरास्फालेन तालेन हरितालकर इति विश्वः तरलश्चंचले वक्षे हारम
ध्यमणावपीति हारावली रासस्तु गोपीहांक्रीडा इत्यपि चेति विश्वप्रकाशः स्वभावोक्तिरलंकारः ५

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

सखिरासविहारेतासांत्वदङ्करीत्याप्राधान्यंताभिःकेलिःत्वदङ्गौरवान्वेषणायालिनतुतासांगौरवम् नकंवात्र रा
धामाधायहृदयेतस्याजब्रजसुंदरीरितित्वदङ्गौरवमेवाह श्लिष्यतीत्यादिना मच्छ्रीकृष्णचंद्रः कामपिरामांक्रीडात्व
भावांश्लिष्यति आकृष्यालिंगनंकरोति कामपिरामांचुंबति चिबुकोद्धृत्यचुंबनंकरोति कामपिरामांकुचस्पर्शा
धरपानमधुरवचनादिनारमयति भावगर्भितस्मितेनचारुतरामतिशायेनमनोहरांपश्यत्यवलोकनंकरोति एवं
तास्वभिमुखेनसमानासुप्रीत्याश्लिष्यालिंगनादिकंदृष्ट्वाअपरांवामांमाधुर्य्यस्वभावांमनोहरस्वभावांवातामनुग

श्लिष्यतिकामपिचुंबतिकामपिकामपिरमयतिरामाम् पश्यतिस स्मितचारुतरामपराम
नुगच्छतिवामाम् ६

च्छतितत्सखीमनुनयार्थमनुगतिंकरोति अथवा तद्वंचनमेवंप्रकारेणविधायापरांनाविद्यतेपरान्यात्वत्सदृशी
व श्रेष्ठातांत्वांवामांकोपवतींस्वापराधशमनायानुगच्छति वलात्कारेणालिंगनादिकेकृतेपिताभिर्नकृतमित्यवेद
य्यंसूचितम् तासांपरस्परकृतालिंगनादौशृंगाररसःपुष्टोभवतीतिग्राम्यसुखेप्रसिद्धिः अतएवतासामपकं
षीर्थंस्वोत्कर्षंशृंगाररसपुष्ट्यर्थंवनायकवरातिकेलयागंतव्यमितिसूचितम् सुंदरीरमणीरामेतिविश्वःमुदासंक्री
डद्भिर्व्रजयुवतिसूथैःपरितोषंप्राप्नोतिक्वचिदपिमनागंदतनयः तदुक्तम् तस्मिन्नेवंसहचरिमनागप्यविप्रयंमनः २५
नसो।

CC0. In Public Domain, Digitizagtion by eGangotri

लीलांतरमाह केलिकलेत्यादि काचिद्व्रजांगना अमुं श्रीकृष्णं वंदे केलिकलाकुतुकेन क्रीडाविलासोत्सादकाद्याजे
नडकूले पटवस्त्रविषये करेणा हस्तेन विचकर्ष आकृष्टवती दुकूले गृहीत्वा अमुं विचकर्षेति केचित्पठंति कीदृश
म् मनोज्ञवेतसमंदिरगतम् तवध्यानाय तद्वंचनाय वा रहःस्थितमिति सूचितम् कुत्राकृष्टवती यमुनाजलकूले य
मुनाजले केलिविधानायाकृष्टवतीति ध्वनितम् अत्रान्यासक्तस्य श्रीकृष्णचंद्रस्य त्वद्वियाध्यानासक्तस्य वा वस्त्राक
षेणादस्या अधीरत्वं मुग्धत्वं च स्फुटमेव अतस्तवाधरामृतपानेन त्वया संजीवनीयः इति मम प्रार्थना वंजुलो वेतसे मत
इति विश्वः मनोज्ञं मंजुलमित्यमरः कुलकं चक्रुत्कूलमपि च दुकूलं पट्टवस्त्रं स्यादिति त्रिकांशुकेपि वेति विश्वः पर्या

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले ७ श्री
जयदेवकवेरिदमद्भुतकेशवकेलिरहस्यम् वृंदावनविपिने ललितं वितनोतु शुभानि यशस्यम् ८

योक्तिरलंकारः रसवदलंकारश्च ७ तत्कलालीलाश्रवणफलमाह श्रीजयदेवकवेः इदं गीतं शृण्वतां पठतां च शुभानि
श्रीकृष्णस्मरणात्मकानि कल्याणानि वितनोतु विस्तारयतु कीदृशम् अद्भुते अद्भुतार्थे अद्भुतस्वरूपं वा आश्चर्यकारं वा के
शवस्य श्रीकृष्णस्य केलिरहस्यं क्रीडाहर्षः क्रीडागोप्यं वा यत्र अद्भुतत्वमेतदेव गोपवधूदाक्षिण्यानुरोधेन क्रीडितं श्रीराधो
लक्षत्वाय नायास्य मुग्धत्वनिरूपणायेति अथवा अद्भुतं युगपत् व्रजनारीणां रमुसादनात् कृष्णे राज्ञ्यवसेयस्येति क्रियते
व्रजांगनावशीकरणम् पुनः कीदृशम् वृंदावननाम्निवने ललितं नानारसान्वितं वनविहारक्रीडायुक्तम् वा वलेः काम
धेनुस्मरणात् वनविहारव्याजेन श्रीराधान्वेषणचातुर्यमुक्तमिति भावः यशस्यम् यशोहितं यशस्करं वा यशःसहितं वा ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सकलशृंगाररसैककलानिलयस्य श्रीकृष्णस्य श्रीराधोत्कर्षप्रतिपादनाय प्रबंधगीतैर्हावभावाद्यनभिज्ञाभिर्गोपीभिर्यूथ
लीलैवोक्ता इदानीं श्रीकृष्णक्रीडोत्कर्षं तदर्थमाह विश्वेषामिति हे सखि राधे मधौ वसंते हरिर्मनोहरणशीलः क्रीडतीत्य
न्वयः कीदृशः मुग्धः त्वद्विरहेण मूढः यद्वा मनोहरः त्वदागमनकांक्षया सुंदरः किंकुर्वन् विश्वेषां व्रजवधूनां सर्वजीवा
नां वानुरंजनेनानुरागेणानंदं तोषं जनयन्नुत्पादयन् पुनः किंकुर्वन् इंदीवराणां नीलकमलानां श्रेण्यः पंक्तयस्तद्वन्नी

विश्वेषामनुरंजनेन जनयन्नानंदमिंदीवर श्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवम् स्वच्छंदं
व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः शृंगारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति १२

लैः श्यामलैः कोमलैश्च सुकुमारैः शृंगारांगैर्वा अनंगस्य कामस्योत्सवं हर्षमुपनयन्नुत्पादयन् कीदृशो हरिः स्वच्छंदं स्वेच्छया
व्रजसुंदरीभिरभितः सर्वतोभावेन प्रत्यंगमंगमंगं प्रति इति प्रत्यंगमालिंगितः आश्लिष्टः कयाचित्तांबूलरसकुचंदना
घुद्दीपनरूपं कयाचित्सस्मितकटाक्षानुरूपं कयाचित्प्रेमांचश्लेषादिरूपं शृंगारस्यांगमाश्रित इति भावः क इव मूर्तिमा
न्सांगः शृंगारः शृंगाररस इव श्रीकृष्णस्य श्यामांगत्वेन शृंगारसाम्यं श्यामो भवति शृंगार विशेषणान्यप्येतानि पदानि १२ २६

शृंगारः॥ २ सितो हास्यः कृतोत्तिः ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संगीतेश्रोतृजनकविराशिषंददाति रासोल्लासेति हरिःश्रीकृष्णोवोयुष्मान्पातुरक्षतु कीदृशः। स्मितेनमनोहा
मनो री स्मितैर्हारोवापाठः स्मितेनेषद्धास्येनशोकहरः हारीहारवान् पुनःकीदृशः प्रेमांधयासहचरीजनप्रेमग्र
याराधयागाढंयथास्यात्तथानुरोवक्षस्थलेआभीरवामभ्रुवांगोपवधूनांअन्यर्णसमीपेरिरम्यालिंग्यरासक्रीडा
योत्कल्लासेनरणहर्षातिशयेनगीतस्तुतिव्याजात्गानप्रसंगेसाछलेनइतिव्याहृत्सोत्कात्डर्कटंयथास्यात्तथाचुंबितः
इतीतिकिम् साधुत्वद्वदनंसुधामयंकिंभूतानां शृंगारविलासवतीनाम् अत्रानादरेषष्ठी ननुसाकथंतद्वक्रे

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमांधयाराधया साधुत्वद्वदनं
सुधामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारीहरिःपातुवः १४ इतिगीतगोविंदेश्री
द मौदामोदरोनामप्रथमःसर्गः १

तथोक्तम् प्रेमांधयेति नद्भटचुंबनंकामसर्वस्वोक्तंतल्लक्षणम् कांतंभुजाभ्यामालिंग्यप्रेयसीप्रणयान्विता स
गाढंचुंबतिमुखंयत्तदुद्भटमुच्यतइति स औतेटीकाकारोक्तिः वंदेयुवतिस्थस्यंकृष्णंकेलिकलानिधिम् का
लिंदीजलसंसिक्तंसर्वाभरणभूषितम् १४ इतिश्रीमत्कृष्णवंशसेवकोदीच्यावतंसश्रीशिवदासपंडितात्मज
श्रीबनमालिनरहरिविरचितायांबनमालिसंजीवन्यांश्रीगीतगोविंदटीकायांव्रजयुवतिस्थकेलिवर्णनेमामोद

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० द्वितीये कथ्यते सर्गे श्रीराधाप्रणयोदयः सेर्ष्या कुंजांतरगता सखी राधामब्रवीत १ एवं पूर्वं गोपसीमंतिनी यूथके
२७ ल्युत्कर्षमालोक्य विगलितनिजोत्कर्षवशश्रीराधासखीमाह विहरतीति श्रीराधा रहएकांतेगोप्यमपि बहुसमाप्ताः सखी॰
मुवाचोक्तवतीत्यन्वयः कीदृशी हरौश्रीकृष्णेवने विहरतिक्रीडतिसति ईर्ष्यावशेनासहिष्णुतया अन्यस्मिन्कुंजेगता
पुनः कीदृशी क्वचित्कदाचिदपिलताकुंजेलताछादितेकुंजेलीना तदुच्चनानिश्रोतुंगाढांधकारेकुंजमंदिरेनिली

प्र॰ विहरतिवनेराधासाधारणप्रणये हरौविगलितनिजोत्कर्षादीर्ष्यावशेनगतान्यतः क्वचिदपिलता
कुंजेगुंजन्मधुव्रतमंडलीमुखरशिखरेलीनादीनाप्युवाचरहःसखीम् १५

यस्यिता कुतः विगलितनिजोत्कर्षात् विशेषेणगलोनिजःस्वीयउत्कर्षोहरेरहमेववल्लभाइत्येवंरूपस्तस्मात् किं
भूतेहरौ साधारणप्रणये श्रीराधायामन्यगोपीतुल्यस्नेहे असाधारणेपवेतिछेदः श्रीराधामंतरानान्यासुगोपासुश गा॰प्र॰
तिस्तस्मिन्कीदृशेकुंजे गुंजायमानभ्रमरसमूहशब्दयुक्ताग्रभागे अतएवदीनादुःखिता विप्रलंभोयंविभावना॰
लंकारः शिखरंत्वग्रभागोस्यामागिकंपेशोखरेचेतिधरणिः प्रणयःप्रेमविश्रंभइत्यमरः ईर्ष्यामाहुःसमानेषुमान २७
दानाद्यमर्षणमितिभरतः १५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमर्षेणेन किमुवाचेत्यतः संचरदित्यादिना श्लोकोक्तमर्थं गीतेनाह गुर्जरीरागे प्रतिमंठताले रागलक्षणम् पू-
र्वोक्तमेव द्रुततत्रयेण गातव्यम् कुंदश्च प्रतिमंठक इति तालक्षणम् हे सखि मम मनः कृतापराधमपि हरिं रह-
कुंजमंदिरे स्मरति तद्यथा केतकीकुसुमं भ्रंगाः खंड्यमानोपि सेवते दोषाः किं नाम कुर्वंति गुणापहृतचेतस इति
कीदृशं रासे रासक्रीडायां विहितः कृतः विलासः क्रीडा येन ध्रुवपदम् पुनः किम् संचरता नानाप्रकारेण स्फुरता अध-
रसुधामधुरेण ध्वनिना शब्देन मुखरितः शब्दितो मोहनो विश्वमनोहरो वंशो येन तम् पुनः की चलितः कस्यचिन्मू-
र्छाविशेषेण सात्त्विकरसोदयेन वा दृगंचलो कटाक्षो यस्य चंचलश्च पलो मौलिः शिखंडाग्रभागो यस्य कपोलयो

गुर्जरीरागे प्रतिमंठताले संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशम् चलितदृगंचलचंचलमौलिक-
पोलविलोलवतंसम् रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासम् १ ध्रुवपदम् चंद्रक-
चारुमयूरशिखंडकमंडलवलयितकेशम् प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशम् २

विलोलौ चंचलौ वतंसौ कर्णभूषणे यस्य तम् कर्मधारयः पीयूषममृतं सुधेत्यमरः मौलिः किरीटं केशाश्च संयता मौ-
लय इति पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे इत्यमरः १ नन्वेवंभूतः श्रीकृष्णः सदा व्यासंगादिना न स्मर्तव्यः स स्वबला-
च्चेतस्यायाति किं कर्तव्यम् कीदृशम् चंद्रकेन विचित्रचिह्नेन चारूणां मनोहराणां मयूरपिच्छानां मंडलेन समूहेन वलयि-
ता वेष्टिताः केशा येन किंच प्रचुरैर्बहुभिः पुरंदरस्य इंद्रस्य धनुर्भिरनुरंजितः शोभितो मेदुरः स्निग्धो मुदिरः सान्द्रो जलदो

Dr. Urmila Sharma Collection, Varanasi

गी० टी० मेघवत्तद्वत्सुवेषं सुंदरम् अत्र नानामणिखचितहारमुकुटकेयूरादीनामिंद्रधनुर्भिः साम्यमिति अद्भुतोपमेयम् श्रीकृ
२८ ष्णस्य मेघसाम्यं शिखंडः पिच्छबर्हे तु नपुंसक इत्यमरः वेष्टितं स्याद्वलयितमित्यपि मुदिरः कामुकेंबुद इति विश्वः
वेष्टो वेष्टनागरे प्रोक्तो नेपथ्ये गृहमात्रक इति समो चंद्रकमेचकाविल्यमरः मयूरो बर्हिणो बर्हीत्यपि मंडलं व
र्तुले प्रोक्तं समूहे विषये रवेः आवृत्तौ देशभागेपि मंडलं त्वंडभूमिक इति वैजयंती भावोत्र्येषा रूपकालंकारः
२ ननु श्रीकृष्णस्याप्यनुरागरहितोन्याभ्युवतिभिः सह क्रीडतीति किमर्थं तं स्मरसीति सत्यं स गुणवांस्तत्राह गोपेत्या
दिना पुनः कीदृशम् गोपकदंबस्याभीरसमूहस्य या नितंबवत्यो नार्यस्तासां मुखचुंबनेन लंभितः प्रापितो

गोपकदंबनितंबवतीमुखचुंबनलंभितलोभम् बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ३

लोभो यस्य तम् अथवा तान्नितंबवतीभिः स्वमुखचुंबनेन लंभितो लोभो येन तम् तस्य तासु स्वच्छंदानुरागः स्नेहो नास्ति परं तु बा-
लात्कारेण ताभिश्चुंबने लोभः कारित इत्यभिप्रायः किंच बंधुजीववत् बंधूकपुष्पवत् मनोहरो योधरपल्लवः पल्लवाह्वाते
रधरश्रेष्ठो यस्य तम् यद्वा बध्नातीति बंधुः प्राणप्रतं जीवयतीति स चासौ मधुराधरपल्लवो यस्य तम् पुनः उल्लसितेन देदीप्यमा-
नेन स्मितेनेषद्धास्येन शोभा यस्य तम् यदि बंधूकपुष्परागेण मधुरपल्लवाधररागो रंजितो भवति स च स्मितकुंदकालिकयापु
लो भवति तदाधरशोभामनुहरेदित्यद्भुतोपमेयम् रक्तकस्तु बंधूको बंधुजीवक इत्यमरः सरसो मधुः प्रोक्तो मधुरोथमनोह २८
रे रसेनेकार्थः पल्लवोस्त्री किसलयमपि तदुपमा रूपकालंकारः ३

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशम् विपुलो विस्तीर्णः पुलको रोमांचो यत्र ताभ्यां भुजपल्लवाभ्यां पल्लववत् कोमलाभ्यां वलयितं वेष्टितं बल्लवयुवतीनां गोपवधूनां सहस्रं समूहो येन तम् अत्र वलयितशब्देनावलयता सा वेष्टनमात्रेण तु गाढालिंगनचुंबनादिकमिति भावः सस्नेहालिंगनादिकं तु तस्य मध्ये चेति तासामेवेति किंच करयोश्चरणयोश्चोरसि च मणिगणानां रत्नसमूहानां भूषणानां किरणैः रश्मिभिर्विभिन्नं विदूरितं नाशितं तमिस्रमंधकारो येन तम् अनेन प्रथमालिसारसंगमे मदीयांगालंकारप्रकाशेन ध्वांतनाशेन चकुंचितमुखीमां दृष्ट्वा वलादानीयतोषे हास्यं कृतवान् तं क्षणमपि विस्म

विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्रम् करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रम् ४

र्तुमस्मन्मनो नार्हतीति प्रेमपराकाष्ठा दर्शिता स्वसौभाग्यातिशयोपि दर्शित इति भावः करचरणोरसीति प्राण्यंगत्वादेकत्वं बहुत्वेपि जेष्ठि तस्माद्वलयितेन वलयालिंगनेपि चेति कीशप्रदीपे अंधकारो स्त्रियां ध्वांतमित्यमरः किरणोत्र मयूखाभुरिस्यपि ४ पुनः की स्वोत्कर्षमेव प्रथयन् कथयंत्याह जलदेत्यादिना जलदपटले मेघसमूहे वलन्नो राजमानसचलदिति पाठे चलतः स्फुरत इंदोश्चंद्रस्य विनिंदकस्तच्छोभातिशायी चंदनतिलकः चंदनकृततिलकः ललाटपस्यतम् पुनः किं गोपवधूनां पीनौ पीवरौ तौ स्तनौ पयोधरौ तयोः परिसरस्य पर्यंतभागस्य प्रसरणशीलस्य वामर्दनेन निर्दयं दयार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० टी हितं हृदयमेवकपाटवद्विस्तीर्णं हृदयंयस्य कपाटपदस्यायंभावः कपाटंप्रियधनरक्षार्थमप्रियनिवारणार्थंचदी
२९ यते अत्रश्रीकृष्णचंद्रस्यप्रियधनंश्रीराधैवतच्चतद्धृदयेतिष्ठतीतितद्रक्षार्थंहृदयंकपाटपदेनगृहीतमिति अर्थान्तर-
न्यासोपमालंकारः नचेहारूपकइत्येके कपाटमररंतुल्यइत्यमरः पर्यंतभूःपरिसरइत्यपि कपाटंकुंचिकामतेनोद्घा-
टितंनवतियथातथामांविनातद्धृदयालिंगनरसइतिसूचितम् मध्यतिरिक्तानांकंसुखंपाटपतीतिवाकपाटशब्दा-
र्थः ५ पुनः स्वोत्कर्षप्राधान्यमेवर्णयंस्याहमणि मयेत्यादिना पुनःकीदृशम् मणिमयेमणिखचितेमकरवन्मनोह

जलदपटलवलदिंदुविनिंदकचंदनतिलकललाटम् पीनपयोधरपरिसरमर्द्दननिर्द्दयहृदय
कपाटम् ५ मणिमयमकरमनोहरकुंडलमंडितगंडमुदारम् पीतवसनमनुगतमुनिमनुजसु
रासुरवरपरिवार ६

२ मणिमयमकरेणरत्नमयमत्स्येनवामनोहराभ्यांकुंडलाभ्यांमंडितौभूषितौगंडौकपोलौयस्यतम् कीदृशम् उदारम् मं२
स्वलावण्योदारगुणयुक्तम् तद्वृत्तपंदश्चारूपके दानमभ्युपपत्तिश्चतथावप्रियभाषणंस्वजनेचपरेवापितदौदार्य
मुदाहृतमिति उदारपदेनेतियन्मयापाचिंतितंतत्सर्वंतत्क्षणमेवपूरितवानितिसकथंविस्मर्तव्यः पुनःकी पीतेवसनेयस्य
पीतवसनंवा पुनःकीअनुगताआश्रिताःमुनयःशुकादयःमनुजाःपरीक्षिदादयःसुराःब्रह्मादयःअसुराःप्रह्लादाद २९
यस्तएववराःश्रेष्ठाःवराःवृंदावननिवासिनोवागोपाजनाःपरिवाराःसेवकायस्यतम् अथवा सर्वंवाःश्रीगोपीज
नलक्षणःश्रीराधारूपोवापरिवारःसेवकोयस्यतम् स्वभावोक्तिरलंकारःरसवदलंकारश्च ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनःश्रीराधास्वातंत्र्यमेवाह विशदेति पुनःकीदृशाम् विशदस्यस्वच्छस्यकदंबस्यतलेमूलेमिलितेसंलग्नम् मदर्थंम
दपेक्षयात्रतएवकदंबस्यतलेमूलेगत्वामयासहक्रीडार्थंवानिलायस्थितमितिभावः पुनःकीदृशम् कलेःप्रणय-
कलहस्यकलियुगस्यवाकलुषंसाधारणंव्रजवधूजननंतत्कृतमालिन्यंचशमयंतम् नाशयंतंत्वय्येवममप्रीति-
र्नान्यासुदृत्त्यादिप्रेमवाक्यैरित्यर्थः पुनःकीदृशाम् किमप्यनिर्वचनीयस्तरंगदुरुच्छदनंगःकामोयत्रतयादृशादृष्ट्या
मनसाहृदयेनचमामपिरमयंतंअतएवसकलकलानिसंहरिमेमनःस्मरतीतिसूचितम् कलिःस्यात्कलहेशू

विशदकदंबतलेमिलितंकलिकलुषभयंशमयंतम् मामपिकिमपितरंगदनंगदृशामनसारमयंतम्
७ श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपम् हरिचरणस्मरणंप्रतिसंप्रतिपुण्यवतामनुरूपम् ८

रेकलिरंत्ययुगेष्वपीतिविश्वः कलुषंत्वाविलेनसोरितिच विशावनालंकारः ९ गीतोक्तंसंग्रहेणाह श्रीजयदेवेति
श्रीजयदेवेनकविनाभणितंगीतंसंप्रतिसर्वदेवपुण्यवतांश्रीराधाकृष्णस्मरणपुण्यजनानाम् हरिचरणस्मरणंप्र-
तिअनुरूपंयोग्यंतत्स्यमित्यर्थः नचैतदन्येलभ्यमितिभावः अतिसुंदरंमोहनंव्रजवधूमोहकारिचमधुरिपोर्दै-
त्यशत्रोरमतबसंतशत्रोर्वाश्रीकृष्णस्यरूपंयत्र कलौवहूनांरागिणांशृंगारादिप्रहृष्टानामनायासेनैवश्रीकृष्णस्य

रसिकप्रियायां ८

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० नन्वयं त्वां विहायान्यवधूभिर्विहरति तं किमिति त्वं वारं वारं स्मरसि स एवं गुणवान् विलासी चेत्साह गणयतीत्या
३० दिना हे सखि मम मनः पुनरपि वारं वारं हृष्टे कामम भिलाषं करोति किमहं करोमीत्यन्वयः अनेन मानस्तोधित्य.
मनुग्रहः श्लोक्तः कीदृशो श्रीकृष्णे युवतियुवत्रजबद्धवीयु वलंते वर्द्धमाना तस्या भिलाषो यस्य अतएव मो [illegible]
विना विहारिणि क्रीडाशीले यद्वा पूर्वं विहारिणि नेदानी महत्तदुःखमिति कीदृशम् मनः वामं प्रतिकूलं वि
रक्तानुरागित्वात् वामत्वे हेत्वंतरमाह गणयतीत्यादि तस्य सौंदर्यादीनां गुणानां ग्रामं समूहं गणयति परिसंख्या ।

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च परितोषं दोषं विमुंचति दूरतः युवति
षु वलत्तृष्णे कृष्णे विहारिणि मां विना पुनरपि मनो वामं कामं करोति करोमि किम् १५

ति न तु दोषलेशमपि पश्यतीति तद्गुणस्वभावो यं वामत्वं यस्ते पे त्यर्थः भ्रामं क्रोधं भ्रमाद्विभ्रमादपि नेहते न गच्छति किं
तु प्रति दोषं तद्गुहं चेष्टां करोतीत्यर्थः एतेन श्रीकृष्ण गुण समूह गाने प्यनावकाश लोभान स्वागत इति ध्वनितम् तत्र कार
णमाह ताहशोपि च परितोषं संतोषं वहति किं तु तद्दोषं मामतोन्यनायिका क्रीडासंजातं दूरतः दूरादपि मुंचति त्यज
ति किं तु तद्गुणानेव पश्यतीत्यर्थः तद्यथा अरतिरिय मुपैति मानं निद्रा गणयति तस्य मनो गुणान् दोषान् वि ३०
गलति रजनीनसंगमाशा व्रजति तनुस्तनुतां न चानुरागइति ग्रामः स्वरे [illegible] मं व समर्थे च्छंदे शाहादिरूपक इति विश्वः
भ्राम क्रोध रवौ दीप्ता वितिच वामं सव्ये प्रतीपे वेति कामः स्मरेभिलाषे पि च १५

Dr. Urmila Sharma Collection, Varanasi

एकतालीताले मालवरागे । एकताली त्रिधा प्रोक्ता गीतज्ञास्त्रविशारदैः । रामा च चंद्रिका तद्वद्विपुलेत्यथ लक्षणम्
द्रुतमेकं भवेद्यत्र स तालः खंडसंज्ञितः । रामा तेनैकतालीति कथ्यते नायकोत्तमैः । रागलक्षणं तु पूर्ववदेव । उद्दानी वि
रहोत्कंठिता राधा सखीं प्रत्याह । निभृतेत्यादिना । उत्कंठितालक्षणम् । उद्दाममन्मथमरुज्ज्वरवेपमानो रोमांचकंट-
कितमंगकमुद्वहंतीम् । संवेदवेपथुरयं नो कालिकाकुलांगीमुत्कंठितां वदति तां भरतो मुनींद्रः इति । गीतार्थस्तु हे
सखि मया सह केशिमथनं प्रज्ञास्ताः केशा यस्य स केशी कामः तमप्यात्मसौंदर्येण मथ्नातीति हो नयति केशी चासौ
मथनश्चेतमिति । अथवा नायकसामर्थ्यख्यापनाय केशिमथनपदोपादानं तं केशिमथनं मन्मथमथनं श्रीह-

एकतालीताले मालवरागे । निभृतनिकुंजगृहं गतया निशि रहसि निलीय वसंतम् । चकितविलोकितस
कलदिशा रतिरभसरसेन हसंतम् । सखि हे केशिमथनमुदारम् । रमय मया सह मदनमनोरथभावित

यासविकारं ध्रुवपदम् १

संरमय क्रीडां कारय । कीदृश्या मया । निभृतनिकुंजगृहं गतया एकांतनिविडलताच्छादितमंदिरं प्राप्तया । कीदृशम् । नि
शि रात्रौ रहसि एकांते निलीय तिरोरूपं वसंतं तिष्ठंतम् । तदवलोकनार्थं कुंजमंदिरगतं मां दृष्ट्वा सा राधा मां मा पश्यत्विति कु
तर्कमत्वा तारणाय रहःस्थितमिति भावः । चकितं सत्रपं यथा स्यात्तथा विलोकिता दृष्टाः सकलाः समस्ता दिशो यया येन वा-
तया तं च । श्रीकृष्णाभिसरंतीं यां कृष्णो मार्गे मा पश्यत्विति सत्रपं दृष्टदिक्यरूपतामिति भावः । किंच रतेरुत्साहस्तद्रूपो वे
गः रभसः शृंगारात्मकस्तेन हसंतम् । सुरतकालसमदार्थमत्र स्थितमपि मामियं न पश्यतीति हसंतमिति भावः । ननु म

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० यथोर्क्तिः श्रीकृष्णोनायास्यतीत्यतस्त्राह ज्वदारेंज्वदारस्वभावं अतएवत्वदंकाङ्कितमवक्षदेशस्यतीतिभावः कोदृशपा कंदर्पस्यमनो
३१ रथरक्षातद्युक्तोयोभावः रत्याख्यस्तज्जातयाप्राह्वयावा तारकादिवादित्व कीदृशम् मदनज्वनितविकारसंतापसहितम् पदद्व
येनातेनपरस्परानुरागजनितःशृंगाररसःपुष्टोभवतीतिभावः भाविततोयासवेप्राप्तइतिविश्वः निम्नतंसंम्रतेगुप्तइतियादवः
रत्नसोबेगनत्वाहदस्समरः बिभाबनाविशेषाबलंकारौ १ पुनःकीदृश्याप्रथमसंगमलज्जातलज्जया एतेनानयोर्माधुर्यंतिभ्रायः
प्रसहंरतनत्वंचनायिकालज्जादिगुणोपिसूचितः एनमुहिश्यागताकथमस्याग्रेयास्यमीतिलज्जा क्षणेक्षणेपक्षवतामुपेतित
देवरूपंरमणीयतापाइतिमाघः कीदृशम् पटुनायिकाग्रहरूपानियानिचाटूनितानिमधुरप्रियबचनरूपानितैरनुकूल
मनुग्रहकारकमनुनयपरंवा नेयंचतुरेतिविज्ञायचतुरानुनयःकर्तव्यइतिभावः पुनःकीदृशपा मृदुकोमलंमधुरंकर्णे ९

चाटु प्रथमसमागमलज्जितयापटुचाटुशतैरनुकूलम् मृदुमधुरस्मितभाषितयाशिथिलीकृतजघनदुकूलम् २

मृतंस्मितमीषद्धास्ययुक्तंभाषितंयस्यास्तया कीदृशम् स्मितवचनादिनाशैथिल्यमापादितंजघनस्थितंदुकूलंपटवस्त्रंये
तं न एतेननायकचूडामणिश्रीकृष्णदर्शनादेवहृदबद्धानीवीस्वयमेवस्खलितादबलंबितंवासस्तेनापिगृहीतमितिसूचितम्
उक्तंचरते कांतेतल्पमुपागतेशिथिलितानीवीस्वयंबंधनादिति उक्तंचातिरहस्येश्रीबद्धाग्रेस्फुरता क्षणेप्रचलतःकंपो
दरेमत्स्यवत् धमिल्लकुसुमाकुलोविगलितःप्राप्नोतिबंधंपुनःप्रछन्नोव्रजतस्तनोप्रकटतांश्रोणीतटंदृश्यते नीवाबि
स्खलतिस्थितापिस्व दृढंकामेगितानीतिवजघनंकंदेरथोनागरविहारावली चाटुनरविपोक्तिस्यादितिरत्नमाला रस

पुनः कीदृश्या किसलयशयनेन नवपल्लवरचिततल्पे सख्या श्रीकृष्णेन वा निवेशितया कीदृशम् चिरं ममैवोरसि
रि शयानं सुतं शयनमिति बहुकालालिंगनापेक्षो कीर्तितो भावः पुनः कीदृश्या कृतपरिरंभचुंबनयया एतेन जघनोपश्ले
षणमोक्षचुंबनं च श्रीकृष्णस्य तया कृतमिति भावः तद्यथा पंचसायके जघनकलितकांतश्रोणिरोपरि ह्यारूढानते
यद्दिह नारी स्खलत्केशोत्तरीयेति चुंबनमप्युक्तम् ओष्ठेन कांतस्य मुखोपयुग्मं नियजिह्वां चिततालुमार्गमिति पुनः नी
कीदृशम् परिरभ्यालिंग्य कृतं मदीयाधरपानं येन एतेन लालाटिकमालिंगनादिकमप्युक्तम् यथा श्रमोत्पत्त्यं

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम् कृतपरिरंभणचुंबनया परिरभ्य कृताधरपान
म् २ अलसनिमीलितलोचनया पुलकावलिललितकपोलम् श्रमजलसिक्तकलेवरया वरमदनमदा
इतिलोलम् ४

सक्तमुखं कपोलं नेत्रं ललाटं हृदयं च बाहू सानंदभावस्त्वममीलिताक्षे लालाटिके तत्वविदो वदंतीति कृताधरपान
मिति सुरतप्रेमादिदानेनाप्यायनं ज्ञेयम् ३ पुनः कीदृश्या अलसे आलसे आलस्ययुक्ते निमीलिते मुद्रिते लोचने यस्याः तस्याः
स्तया एतेनांगिकः कामोत्सवः कथितः यथा यत्र मूर्द्धानमारभ्य पादपर्यन्तिकाः क्रियाः अंगेन विहिता यस्मादांगिक
मुच्यते कीदृशम् पुलकानां रोमांचानामावल्या पंक्त्या ललितौ मनोहरौ कपोलौ यस्य तम् एतेन सात्विकभावोदये
न शृंगाररसस्य स्थिरता कथिता भरतोक्तः स्मरणे संगमे चैव प्रियस्यालोकने तथा स्वेदः कंपोथ रोमांचः स्वरभंगोथ

गी० टी० वेपथु वैवर्ण्यमश्रुप्रलया विलसद्भावा विद्यमानाः कीदृश्या श्रमजलेन सुरतानंदस्वेदजलेन सिक्तं युक्तं संपूर्णं वा
३२ कलेवरं शरीरं यस्याः तया एतेन सुरतानंदपूर्तिरुक्ता श्रीहरिं कीदृशम् रतरभसकामगावदतिलोलं चंचलं सतृष्णं वा
प्रचुरश्रेष्ठयोर्वरस्तु विश्वः कायेकलेवरामित्यपि रसवदलंकारः ४ पुनः कीदृश्या कोकिलस्य कलरवो व्यक्तमधु
रध्वनिस्तद्वत्कूजितं शब्दितं यस्याः कोकिलपुंस्त्वपुरुषायितं तान्निषादादिति अनेनकूजिताख्यं वा ह्यरुतमुक्तम्
शीघ्रमपि... कीदृशम् जितो-
तरुक्तं पंचसायके पिकश्चि खिकलहंसप्रायपक्षिवृन्दानां स्तनितमनुकरोतीति ...

कोकिलकलरवकूजितया जितमनसिजतंत्रविचारम् श्लथकुसुमाकुलकुंतलया नखलिखित
घनस्तनभारम् ५

ज्ञातं तं लंघितो वा मनसिजस्य कामस्य तंत्राणां वात्स्यायनादिकृतकामशास्त्राणां विचारः सिद्धांतो येन तम् तत्रैवो
क्तम् आश्लेषं प्रथमं कुर्याद्द्वितीयं चुंबनं तथा तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकम् पंचमं सेवनं प्रोक्तं षष्ठं प्रहरणं तथा
सप्तमं कंदर्पशास्त्रे बंधनं वा चनं तरमिति तत्सर्वं विपरीतं जातमिति भावः उक्तं च रतिचक्रे प्रवृत्तस्य नैव शास्त्रं न च क्रम रति
पुनः कीदृश्या मया श्लथाः शिथिलाः कुसुमैराकुला व्याप्ताः कुंतलाः केशा यस्याः कीदृशं श्रीकृष्णं नखैर्लिखितः क्षतो
घनो निबिडः स्तनभारो येन अत्रलिखितपदेोपादानात्पंकजपत्राख्यं नखक्षतमुक्तम् यथा अस्पष्टैर्मेकस्फुरितो दीर्घ
पाद्भुक्तं पंकजपत्रसंज्ञमिति तंत्रप्रधानशास्त्रयोरिति विश्वः चिकुरः कुंतलो वालः कचः केशाः शिरोरुहः स्मरः भारोभा

स्वलिखितं... ५

CC0. In Public Domain, Digitizagtion by eGangotri

एवंसप्तधालिंगनादिकंबाह्यरतंचोक्त्वेदानींबंधांतरमाहचरणेत्यादिना कीदृशरूपा चरणयोरणितोशब्दाय
मानेमणिखचितोनूपुरोयस्याः एतेनग्रामरिकोनामविपरीतरतेनायिकाकृतबंधविशेषोदर्शितः प्रोक्तंपंच च
सायके चक्रवत्भ्रमतिकुंचितांघ्रिकाग्रामककर्त्तृजघनेसमुत्थितारति कीदृशम् परिपूरितोऽभिपूर्णतांनीतः
सुरतवितानंरतिविस्तारोयेनतम् एतेनग्रामरिकनायककर्त्तृकोबंधउक्तः पुनःकीदृशरूपा पूर्वंमुखराशब्दाय

गार

चरणरणितमणिनूपुरया परिपूरितसुरतवितानम् मुखरविशृंखलमेखलयासकचग्रहचुंबनदानम् ६

मानापश्चाद्विशृंखलात्रुटितमणिगणाशिथिलाचमेखलाक्षुद्रघंटिकायस्याः एतेनप्रेंखोलितनामकंविपरीत
रतमुक्तम् स्वजघनमेवदोलायमानंसर्वत्रभ्रामयेदितिप्रेंखोलोनाम कीदृशम् केशग्रहणसहितंकृतंचुंबनदानंये
नयस्येतिवा इदमपिविपरीतरतमेव तत्रोक्तं शृंगारेचुंबनकार्यंपुंसालिंगनपूर्वकम् विपरीतरतेनार्यासक
चग्रहचुंबनमिति शृंखलाकुमुदेकांच्यांचहस्तेचकचबंधनइतिविश्वः मेखलाखड्गबंधेस्यात्कांच्यांशैलनितंबयोरि
ति ६

Dr. Urmila Sharma Collection, Varanasi

गी० टी० एवंस्वोत्कर्षमुक्त्वा तज्जनितरताधिक्यमाह रतिसुखेत्यादिना पुनः कीदृशया मया रतिसुखसमये सुरतसुखका

२२ लेयोरसोनुरागः सुरतश्रमेण निद्रारूपो वा तदङ्गं शृंगाररूपो वा तेनालसया आलस्ययुक्तया मंथरयावा की

दृशम् ईषन्मुद्रिते मृदाह्लादिते वा मंथरे नेत्रकमले यस्य तम् अनेनोभयोः सुरतानंदो वा भिन्नेति तिध्वनिः त

दुक्तं रतिरहस्ये मूर्छेनामील नंचारणोरतिकालस्य लक्षणमिति कीदृश्या निःसहा असमर्था किं शालयपुष्प

शयने निपतिता तनुलता शरीरलता यस्याः एतेनैव सुरतान्तविरतिरुक्ता यथा नरते अंगस्वेदः श्लथत्वं च के

शवस्त्रादिसंहृतिः जाते च्युतिसुखेनाप्यविरामेच्छा च जायतइति पुनः कीदृशम् मधुसूदने ममाधरपानकः

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् निःसहनिपतिततनुलतया मधुसूदन

मुदितमनोजम् ७ श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् सुखमुत्कंठितगो

प बधूकथितं वितनोतु सलीलम् ८

र्त्रिदैत्यसूदनेवा मुदितानंदं प्रापितो मनोजः कंदर्पो येन उक्तं रतिरहस्ये अवसानेपि च प्रातिरूपचारैरुपस्कृतो स

विश्रंभकथायोगैरतिं जनयते परामिति किंच धुस्रू अजि पवस्ते धातुः अत्रापि पवश्री राधाधरामृतखंडनमिति

दोपम् मधुसूदनपदं दैत्यपरं प्रसिद्धं रसबदलंकारः ७ इदं जयदेवेन कविना भणितं श्रूयत्वतां पठतां सुखं वितनो २२

तु विस्तारयतु अतिशयेन मधुरिपुनिधुवनशीलं श्रीकृष्णसुरतक्रीडास्वभावो यत्र कीदृशम् सुखं नुत्कंठितया

गोपवध्वा श्रीराधया कथितं भाषितं सलीलम् शृंगारविलासलीलासहितम् अनेन व्रजबधूकदंबैर्नाख्यादि

इति श्रीगीतगोविन्द[illegible]

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णोत्कंठया सख्यानीतया राधया तया उत्सारितवधूवृंदो दृष्टः कृष्णो गतिर्मम इदानीं सख्यानीयमानारा
धायुवतिगणवृतं श्रीकृष्णं दृष्ट्वा परां हर्षस्वगतं सखीमाह हस्तेति हे सखि अहं गोविंदं कानने पश्यामि हृष्यामि
च दृष्ट्वा हर्षं करोमि कीदृशम् व्रजसुंदरीगणवृतम् ननु सखीगणवृतं दृष्ट्वा कथं ते हर्ष इत्यत आह मामुद्वी
क्ष्य दृष्ट्वा विलज्जितम् अन्यगोपीगणवृतो हमनया दृष्ट इति संजातलज्जम् अथवा लज्जासहितं यत् स्मितं तदे
व सुधामृतमुज्ज्वलत्वात् स्पृहणीयत्वाच्च तेनामुग्धं सुंदरमाननं मुखं यस्य तम् ललाटत्रिवलीकृत्वा गलिमे

स्त हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलम् मामुद्वीक्ष्य
विलज्जितं स्मितसुधामुग्धाननं कानने गोविंदं व्रजसुंदरीगणवृतं पश्यामि हृष्यामि च १६

गमाह ताहृशाननं पश्यंत्याः कस्यामेतन्मया पायानानंदो भवेदिति भावः किंच युवतिगणवृतोप्यात्मानं सापराधमि
व मन्यमानो मत्तो बिभेतीति मे हर्ष इति भावः पुनः कीदृशम् हस्ता अदर्शनेन भयेन वा स्रस्तः स्खलितो विलासवं
शः क्रीडावेणुर्यस्य तम् अधरामृतपानापराधी वंशोपि मद्भयात् पतित इति ध्वनिः पुनः की अनृजुः कुटिला भ्रूल
ता यासां व्रजवल्लवीनां गोपस्त्रीणां वृंदमुत्सारय स्वपसारयेति तत्दृगंतेन नेत्रप्रांतवीक्षितमवलोकितं यस्य तम् मामा
गतो दृष्ट्वा मद्भयाद् दृगंतचेष्टया अन्यगोपीरपसारयतीत्यर्थः पुनः की अतिशयेन प्रस्वेदे राद्रे गंडस्थले यस्य तम् अनेन
मद्दर्शनादेव गोसानंदो जात इति ध्वनिः सानुकूलश्च नायकः प्रबोधो नामायमलंकारः तल्लक्षणम् प्रतिप्रकाशनं यत्र

Dr. Urmila Sharma Collection, Varanasi

गी॰टी॰ तस्यैवं खमन्निधीयतइतिदंडी लज्जितमिति भावेक्तः मामुद्दीस्येति सर्वत्र १६ सखिधैर्यमावह मिलिष्यत्येव श्रीह
३५ रिरत्याश्वासयंतीमखीप्रत्याह दुरालोकेति हेसखि दुरालोकोदुःखेनआलोकयितुंशक्यःस्कन्ना वे नापि
स्तोकोऽल्पस्तवकोगुच्छोयस्याः सानवकानवाऽशोकलतिकाऽशोकशाखातस्या विकाशःप्रकाशःकिंच
कासारःसरसीतदुपवनेचतयोःपवनोपिकमलाकरसरोवायुरपिमथ्यतिपीडांकरोति मामितिशेषः

दुरालोकस्तोकस्तवकनवकाशोकलतिकाविकाशःकासारोपवनपवनोपिव्यथयति
अपिभ्राम्यद्भृंगीरणितरमणीयानमुकुलप्रसूतिश्चूतानांसखिशिखरिणीयंसुखयति १७

कासारोपवनाम्यांशैसप्तोगंधमांद्यानीति ध्वनिः किंचेयंचूतानामाम्राणांश्रीगोवर्द्धनगिरौस्थितानांमुकुलप्रसू
तिःकुड्मलोपिनसुखयतिनसुखंकरोति किंप्रकाशादृशांयांकरिष्यतीतिनवेद्मि कीदृशी शिखरमौलौवर्त्त
मानाह्रादेवदुःसहेत्यर्थः पुनःकीदृशी भ्राम्यती नांभृंगीनांभ्रमरांगणानांरणितैर्गुंजितैःरमणीयामनोहरा
स्तोकोऽल्पकइतिविश्वः गुच्छस्तवकइत्यमरः कासारःसरसीसरस्यपि इत्यमरः मल्लिकायांशिखरि ३५
णीति आम्रश्चूतोरसालइत्यमरः कुड्मलोमुकुलोस्त्रियामित्यपि हेतुक्तिरलंकारः १७

CC0. In Public Domain, Digitizagtion by eGangotri

सर्गो तेश्रोत्सवप्रतिकविराशिवमान्यास्ते साकूतइत्यादिना केशवो हरिर्वो युष्माकं क्लेशं दुःखं हरतु कीदृशः
नवस्तरुणो नूतनो वा नानामाधुर्योदयात् पुनः मुग्धमनोहरः सुंदरासुंदरः मुग्धायाः राधायाः मनोहरणेन
मङ्गतिर्वा पुनः कीदृशः गमिताकांक्षः गमिता नीता श्रीराधायां कांक्षा अभिलाषो येन किं कृत्वा किं कुर्वन्
गोपीनां निभृतं गुप्तमाशिप्रायं निराल्क्ष्य कांश्चिद्दलेनामतं मनसि चिरं चिंतयन् कीदृशाम् निभृतम् साकूतं साभि
प्रायं स्मितमीषद्धास्यं यत्र आकुलाकुलो अत्यन्तव्याकुलो गलद्धम्मिल्लः केशपाशो यत्र तम् उल्लसितभ्रूवल्लीकं उल्लसि

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकं दर्शितभुजामूलार्द्धहस्तनम् गोपीनां मलीक
निभृतं निरीक्ष्य गमिताकांक्षश्चिरं चिंतयन्नंतर्मुग्धमनोहरो हरतु वः क्लेशं नवः केशवः १८

भ्रूवल्लीकं जंभमानव्याजेनेत्यर्थः अलीके नानिमित्ते दर्शितान्भुजामूलार्द्धे वाला ईइति भावः हस्त स्तनायत्र भुजा
श्चवालाश्च हस्ताश्च स्तनाश्चेति द्वंदः साकूतं समपेक्षोक्तं साकूतं भाववीक्षणं इति मेदिनीकारः निभृतं तु रहस्येस्या
न्निभृतं गुप्तमुच्यत इति धरणिः अलीकं कपटे प्रोक्तमलीकं गुप्तभावकम् अलीकमनिमित्ते च यथाभाषणकइति
हलायुधः धम्मिल्लः केशपाशोस्यादिति वैजयंती रसवदलंकारः १८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

म

गी०टी श्रीराधादर्शनादेवगतक्लेशोथमानसःपुलकोल्लासकृद्विरःक्लेशोहरतुकेशवः वंदेव्रजपतिंदेवंमाधवंवल्लवीप्रियं
३५ यमुनातीरकुंजेषुहृष्यन्नानुसुतारतम् इतिश्रीमत्कृष्णचंद्रसेवकोदीच्यावतंसश्रीशिवदासपंडितात्मजश्रीवनमा
लीन्द्रविरचितायांश्रीवनमालिसंज्ञायांगीतगोविंदटीकायांक्लेशाकेशवोनामद्वितीयःसर्गः यद्यप्रबंधःएवंसर्गो
द्वयेनोक्त्वाश्रीराधोक्तिर्हरोपरा दृतीयेत्वथकृष्णेनतस्यांगुर्वीनिरूप्यते १ श्रीराधायांश्रीकृष्णस्यापिश्रीराधायांगुर्वी इव
रतिमाहकंसारीत्यादिना कंसुखेविषयजन्यमपसारयतिनिजानंदप्रदानेननिजस्वच्छस्वरूपप्रदर्शनेनवामकंसारिः
श्रीकृष्णःसंसारजन्यसकलसुखविस्मारकइत्यर्थः ईदृशोपिश्रीराधांहृदयेश्राधायगोप्यव्रजंतीतिव्रजाधवतिसम्

इतिश्रीगीतगोविंदेक्लेशाकेशवोनामद्वितियःसर्गः२ कंसारिरपिसंसारवासनाबद्धशृंखलाम् राधामाधाय
हृदयेतत्याजव्रजसुंदरीः १९

हास्तएवसुंदरीःसौंदर्यवतीरपितस्याजत्यक्तवान् काद्द्वाम् संसरतीतिसंसारःकारागृहरूपस्तस्यबंधायशृंखलामि
वशृंखलां यथांकश्चिदवरुद्धःकारागृहेबधांसिद्धिंप्राप्यहृदयेतामाधायतद्बलेनशृंखलांनिगडंत्यजतितद्वत् अथवा
संसारवासनाभोगसंस्काररूपातस्याबंधस्तस्यकामपूर्तिकर्त्रीमिवबहिःकश्चिद्वासनापूर्णांवभिलाषंकरोति अथवा
सम्यक्सारःसंसारःप्रणयरसःश्रीकृष्णोवातस्मिन्वासनावंधायशृंखलाबेणीव परमानंदप्रदत्वात् शृंखलापुष्पकटीवद्व
वंधेपिनिगडेचेतिविश्वः संसारःस्यात्तुजगतितथासंसरतेपिसारस्तेपिचक्लेमेइःसंस्कारवासनाप्रोक्तावासनालयरोध ३५
नइतिहलायुधः सुंदरीरमणीरामेत्यमरः शृंखलाकुमुटेकांच्यांवक्षेचकवचवंधनइतिविश्वः १९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्रजसुंदरीत्तसाजेतियद्धक्तंतदेवश्रीकृष्णवेष्टितसंतापमाह इतस्तेति समाधवोमधुप्रियः कलिंदनंदिन्यायमुनायाः
तटांतकुंजेतीरसमीपलतापिहितोदरमंदिरेविषसाद कैन्तर्गनेरणतद्वाणयन्तरेणवाविवक्षेयनूव किंकृत्वा इतस्त
तस्तेषुकुंजेषुतांश्रीराधामनुसृत्यान्विष्य तत्रहेतुः अनंगस्यकामस्ययेवाणाःसंमोहनादयस्तैर्बाव्रणैःक्षतोभिन्नं
विषादयुक्तंमानसंयस्यसः कीदृशः कृतोनुतापः कथंमयापूर्वमेवनस्तुतेत्येवंपश्चात्तापोयेनसः श्लोकद्वयेना
नेनोभयोस्तुल्योनुरागःप्रदर्शितइति कंदर्पोदर्पकोनंगइत्यमरः प्रेवस्वभावोक्तिरलंकारः २० श्रीकृष्णस्तु

इतस्ततस्तामनुसृत्यराधिकामनंगवाणव्रणखिन्नमानसः कृतानुतापःसकलिंदनंदिनीतटांतकुंजेवि
षसादमाधवः २० गुर्जरीरागेमेवताले मामियंचलिताविलोक्यवृतंवधूनिचयेन सापराधतयामया
नमिवारितातिभयेन हरिहरिहतादरतयागतासाकुपितेव २० ध्रुपदम् १

तापमेवगीतेनदर्शयति मामिति गुर्जरीरागमेवतालध्रुपदेतितल्लक्षणंपूर्ववत् हरिहरीतिमहत्कष्टंसाराधाह
तादरतयाअनादरेणकुपितेवगाता ननुकुपितेवागतेतित्वयाकथंज्ञातमित्यतआह वधूनिवयेनगोपस्त्रीसमूहे
नवृतंवेष्टितंमांविलोक्यदृष्ट्वेयंवलिता मनुसागच्छेन्नाकिमितित्वयानविवारिता सापराधतयाअपराधोराधांविहा
यान्यवधूक्रीडारूपस्तद्युक्ततयामयाअतिभयेनातित्रासयन्नीत्यानानिवारिता मात्राप्युतिरलंकारः हरिहरिकष्टंतु ते विरहः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० किंच साराधा चिरं चिरकालं बिरहेण वियोगेन किं करिष्यति किं बदिष्यति मम दोषमदोषं वा वदिष्यति नन्व
३६ न्यगोपवधूनिकरं विहाय कोपं तस्यामाग्रहस्तत्राह किंजनेनेति श्रीराधां विना मम गोपवधूनिचयेनान्यज
नसमूहेन वापि जनेन किंम् तद्विरहे धनेन तज्जनितविचित्रभोगाभरणादिना किम् ननु धनमंतरा गृहसौख्यं
नस्यात्तत्राह गृहेण किं मम गृहेण किं तद्वियोगे सैव गृहमित्यर्थः ननु गृहं बिना सुखं कथं स्यात्तत्राह तद्विरहे
गृहसुखेन किम् सैव मम सुखरूपेति भावः इयं स्मृत्यात्यावस्थोक्ता २ एवं तां बिना धनादीनां दुःसहप्रदत्व
मुक्त्वा इदानीं कुपितायास्तस्या आननचिंतनं मे जीवनमिति दर्शयति चिंतयामीति अहं तदाननं चिंतया

किं करिष्यति किं बदिष्यति सा चिरं बिरहेण किं जनेन धनेन किं मम किं गृहेण सुखेन २ चिंतयामि तदा
ननं कुटिलभ्रूरोषभरेण शोणपद्ममिवोपरिभ्रमताकुलं भ्रमरेण ३ तामहं हृदि संगतामनिशं भृशं रमया
मि किं बनेनुसरामि तामिह किं वृथा विलपामि ४

मि स्मरामि कीदृक् रोषभरेण कोपातिशयेन कुटिले वक्रे भ्रूवौ यत्र किमिव नपरिभ्रमता संचरता भ्रमरेणाकु
लं शोणपद्ममिवारक्तकमलमिव अनेन कोपारक्तमुखं पद्मसादृश्यम् भ्रूवौ भ्रमरोपमा चेति शोणः को वारं
कणदछविरिसमरः एतेन माधुर्यमुक्तम् ३ तामेवमाधु र्यं तामाह अहं तां राधां न विरं वारं भृशमति
शयेन रमयामि क्रीडयामि कीदृशीम् हृदि हृदये संगतां सन्निहिताम् किमिह बनेनुसरामि तस्या अनुसर
णं करोमि इह बने वा किं वृथा विलपामि किमिति वृथा विलापं करोमि हृदयसन्निहितत्वात न विरहेन इं बने

Dr. Urmila Sharma Collection, Varanasi

तोहृदिविन्यस्यापराधंक्षमापयति तन्वीति हेतन्विविरहक्षणांगि तवहृदयनस्मयमनाविरोपयेयवि
न्नमाकलयामिजानामि सहजापराधमयेमयिकिमेतत्खेदमिमुद्वेगावस्थोक्ता यथा यस्मिन्नस्यमस्यंवा
स्यात्तत्रहर्षायकिंचनेत्युद्वेगइति किंच सापराधेनमयातवप्रार्थनाप्युक्तातत्रबेद्मीति त्वंकुतोहृदयान्निर्गतासितत्र इत्याह
वेद्मि तेनहेतुनातेनुनयामिअन्वेषणंनकरोमि यद्वा नुवितर्केतेसंबंधेषष्ठी एतेनविलापावस्थोक्ता कस्मिं
गारे वेश्ममीतिमनोयस्मिन्नितिति ५ संप्रतिभावनयालक्षीकृत्स[redacted]तांप्रत्याह इत्युपसइति पुरतोग्रेगतागतयाता

तन्विखिन्नमसूयया हृदयंतवाकलयामि तन्नवेद्मिकुतोगतासिनतेनतेनुनयामि ५ इत्युपसेपुरतोगतया
तमेवमेविदधासि किंपुरेवससंभ्रमंपरिरंभणंनददासि ६ तम्पतामपरेकदापितवेदर्शनंकरोमि देहिसुंद
रिदर्शनंमममन्मथेनदुनोमि ७

यातमेवविदधासीतिइत्युपसे हेसुंदरिपुरेवसर्वमिवमेममसंभ्रमेसादरंपरिरंभमालिंगनंकिमितिनददासिपुरा
अग्रे अर्थभावः अंतर्गहेर्बहिर्मःनासहसैवादर्शनाकथंनवेदिति ६ पुनश्चध्यानेनप्राप्तामिवमत्वाक्षमापय
ति तवेदर्शनंविप्रियंकदापिकदाचिदपिनवारोमिनकरिष्यामिइति अपरमपराधंक्षम्यतांक्षमस्व इयमुन्माद ७
वस्थोक्तापुनर्गतविवेकः कथयति ममदर्शनंदेहियतोहंमन्मथेनकामेनदुनोमिसंतप्तोभवामि अपरा
धवाहुल्यान्ममेतिषष्ठी अथवा मन्मथोमामेवदहतुनतवामिति त्वदर्थमेवजीवनमितिस्नेहपराकाष्ठादर्शि
ता अत्राप्युन्मादावस्थोक्ता अन्यस्मिंस्तदितिभ्रांतिरुन्मादोविरहोद्भवइति भ्रमोत्रालंकारःसंभ्रमःस्नेहहर्षयोरि

गी॰टी॰ गीतार्थसंग्रहेणाह वर्णितमिति स्वार्थेकः जयदेवकेन उदं हरेश्चरितं वर्णितम् कीदृशेन प्रणतेन हरिपरायणेन
न पुनः कीदृशेन किंदुबिल्वं नामजयदेवगोत्रं कुलं ग्रामो वास एव समुद्रस्तत्र संभवो यस्य तादृशेन रोहिण्याः प्या
३७ वसाः रमणेन चंद्रेणेव यथा समुद्रादुत्पन्नः रोहिणीरमणश्चंद्रस्तथा किंदुबिल्वोत्पन्नो जयदेव इति चंद्रपक्षे
वसाः रमणेन चंद्रेणेव यथासमुद्रादुत्पन्नः रोहिणीरमणश्चंद्रस्तथा किंदुबिल्वोत्पन्नो जयदेव इति
रोहिणी प्रसिद्धा सुंदरी रोहिणी प्रोक्ता चंद्रभार्या च रोहिणी रोहिणी नंदभार्यायां च वसुदेवांगनापि चेति विश्व
प्रकाशः तस्मिन्नेतारूपोलंकारः ८ श्रीराधां स्वापराधमुक्त्वा मदनं प्रसादहृदासादि हेनं गोंगाकेशानत्रि सहर
वर्णितं जयदेवकेन हरेरिदं प्रणतेन किंदुबिल्वसमुद्रसंभवरोहिणीरमणेन ८ हृदि विशलताहा
रोनायं भुजंगमनायकः कुवलयदल [redacted] श्रेणी कंठे न सा गरलद्युतिः मलयजरजो नेदं भस्म प्रियार
हिते मयि प्रहर न हरभ्रांत्यानंग क्रुधा किमु धावसि २१
भ्रांत्या श्रीकृष्णमेणमपि न प्रहर मा प्रहारं कुरु किंच क्रुधा क्रोधेन किमिति धावसि कीदृशे मयि प्रियारहिते
श्रीराधाविरहिते तद्विरहाद्देवाहं संतप्तस्त्वमतमारणं किमिति करोषीति भावः हरभ्रमोपि न सप्रियासहिते
हंज्ञे पारहित इति भ्रमबीजमपि निरस्यति हृदये विशाललतायामृणालस्य हारस्तद्विरहशांत्यै धृतो न भुजंगमना
यकः सर्पराजो वासुकिः किंच या कुवलयदलानां नीलकमलपत्राणां पंक्तिस्तापशांत्यै धृता सा गरलद्युति ३७
र्विषकांतिर्न किंचायं मलयजरजश्चंदनरेणुर्नेदं भस्म विभूतिः तद्विरहवशात्सर्वं वा वैपरीत्यं संजातमिति भाक
भ्रांतिनामायमलंकारः स एवायमित्युन्मादः २१

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कामो मां ताडयिष्यतीति भयेन कुसुमविशिखायैव दैन्यं करोति पाणाविति हे मनसिज
मदन अमुं चूतसायकमाम्रमंजरीं पाणौ मा कुरु किंच चापं धनुर्मा आरोपय क्रीडयालीलयानि
तरां जितं विश्वं येन तत्संबुद्धिः मूर्छितानां जनानां घातेन मारणेन किं पौरुषं पुरुषार्थः कलितवापौ- ग्री
रुषमपि तव तस्याः श्रीराधाया एवमग्रीहःरूः [redacted] त्रेवेतः प्रसरंतो येकटाक्षा एवाशुगा बाणा

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय क्रीडानिर्जितविश्व मूर्छितजनाघातेन किं
पौरुषं तस्या एव मृगीदृशो मनसिज प्रेंखत्कटाक्षाशुगश्रेणीजर्जरितं मनागपि मनो नाद्यापि
संधुक्षते २२

तेषां श्रेणी त्रिःपंक्तिभिर्जर्जरितं खंडखंडेनीतं मम मनोद्यापि मनागीषदपि न संधुक्षते न स्वस्थं भवति
किंच पिष्टपेषवन्मनसिजस्यैतदनुचितमिति भावः किंच लीलया जितं विश्वं येन तस्य जनेषु प्रहरणे
यशोहानिर्नच पुरुषार्थ इति ध्वनिः सायकः शरखड्गयोरिति विश्वः अथास्त्रियां धनुश्चापाविसमरः
आशुगो मारुते बाण इति विश्वः प्रेंखनामालंकारः २२

Dr. Urmila Sharma Collection, Varanasi

गी०टी० ननु श्रीराधाकटाक्षादिस्मरणादेव तव दुःखं को वै कामस्यापराधस्तत्राह भ्रूपल्लवमिति किमि
३८ त्यव्ययं संदेहे त्वमपि वा तस्यां श्रीराधायां स्मरेण कामेनास्त्राण्यर्पितानि स्थापितानीति तर्कया
मि किंवा व्यर्थमर्पितानि तत्कटाक्षैरेव जगज्जितमिति ध्वनिः कीदृशानि निर्जितानि जगन्ति यैस्ता
नि किंच तैरेवास्त्रैर्जगत्त्रयं जित्वा तस्यामेव दत्तानीति भावः किमित्यन्यत्र न स्थापितानि तत्राह

भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण तस्यामनंगजयजंगमदेवता
यामस्त्राणि निर्जितजगंति किमर्पितानि २३

हे अनंगेति अनंगस्य कामस्य जयाय गमनशीलदेवतायां तद्वशीकरणाधिष्ठात्र्यामिति सूचितम्
तानि कानीत्यपेक्षायामाह भ्रूपल्लवमेव धनुः नीलस्निग्धत्वात् अपांगतरंगितानि गतागतकटाक्षा
बाणाः श्रवणपालिः कर्णप्रांत एव गुणः प्रत्यंचा इति रूपकोपमालंकारः २३ ३८

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं श्रीराधांगविलासस्मरबाणरूपाणि मां व्यथयंतीति कामस्तु निमित्तमात्रमेव तमपि विहाय
भावनयाश्लिष्यंतीमिव श्रीराधां संबोध्याह भ्रूचापइति हे तन्वि कृशांगि तव भ्रूचापे भ्रूरूपे
धनुषि निहितोर्पितः कटाक्षविशिखः कटाक्षरूपो बाणो मम मर्मव्यथां मर्मपीडां तावत्प्रथमंतु गो

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां श्यामात्मा कुटिलः करोतु कब
रीभारोपि मारोद्यमम्

निर्मातु करोतु बाणस्य प्राणापहरणमेवोचितमिति भावः किंच कबरीभारोपि वेणीसंचयोपि
कंदर्प्पनिवासत्वान्मारोद्यमं वियोगिनां मारणाय कामस्योद्यममुपायं मत्प्राणहरणे वा करो
तु तत्र हेतुः श्यामात्मा कुटिलश्च योंतर्मलिनः कुटिलश्च भवति सोन्यवधाय प्रवर्त्ततइत्युचितमे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सद्यः २

गी० टी० वांगम्यथाजनकत्वात् किंच अयंविंवाधरोविम्बफलछतेरधरोपिमोहंमूर्छीतनुतेविस्ता
२९ रयतु विंवायाः वुद्धिहारित्वंप्रसिद्धमेवसद्योवुद्धिहराविंबेति एतदपियुक्तम् तत्राप्ययंरागवा
नुरागआरक्तताउद्वेगोवातद्वान् योरागवान्सःपरवंतारणायाहंकरोत्येव किंच सद्वृत्तःसाधुव
र्तुलःस्तनमंडलःकुचायोममप्राणैःकथंकिमितिक्रीडतिप्राणनाशंकरोति सद्वृत्तस्यपरप्राण

मोहंतावदधंचतच्चितनुतेविंवाधरोरागवान्सद्वृत्तस्तनमंडलस्तवकथंप्राणैर्ममक्रीडति २४

पाडनमनुचितमिति विरोधनामायमलंकारः विन्निस्वस्तोमरेंन्द्रारइतिविश्वः रूपामंनिंदितकल्पा
योरितिधरणिः आत्मादेहमनोव्रह्मस्वभावधृतिवुद्धिधितिविश्वप्रकाशः कवरीकेशपाशास्यमरः
मारोमतौविसेनंगोपिचविंवंफलेविंवायाःप्रतिविंवेचमंडलइतिवरागोनुरक्तोमात्सर्येइतिच चरिते २९
वर्तुलेवृत्तमितिशाश्वतः २४

Dr. Urmila Sharma Collection, Varanasi

इदानींतस्याःस्मरस्यचकोप्यपराधस्तदंगसंगाभावान्मेचेतसिदुःखमितिनायकनायाग्रेस्थितोदृष्टातामा
ह तानीतिस्पर्शसुखानितदंगस्पर्शसंभवानितानिपूर्वमनुभूतान्येव एतेनत्वगिंद्रियसुखमुक्तम् किंचतस्याः
दृशः चक्षुषोविभ्रमाविलासास्तरलाश्चंचलाः स्निग्धाः प्रेमगर्भितास्तएवमयानायिकायामनुभूताः
पूर्वंये एतेनचक्षुर्विषयसुखमप्युक्तम् किंच तस्यावक्त्रांबुजसौरभंमुखपद्मामतसौगंध्यंतदेवपत्पू
र्वमनुभूतम् एतेनघ्राणलाभउक्तः किंच गिरांवचसांयक्तिभावः सएवकीदृशाः सुधास्यंदीअमृतद्रवः ५

तानिस्पर्शसुखानितेचतरलास्निग्धाः दृशोविभ्रमास्तद्वक्त्रांबुजसौरभंसचसुधास्यंदीगिरांवक्रिमा
साविंबाधरमाधुरीतिविषयासंगोपिचेन्मानसंतस्यांलग्नसमाधिहंतविरहव्याधिःकथंवर्धते २५

एतेननायिकायाःशब्दमाधुर्य्यमुक्तम् किंच साविंबाधरमाधुरीविंबसदृशास्योष्ठस्यमाधुरीमधुरतासैवयापू
र्वमनुभूतातस्याः एतेनलावण्यमाधुर्य्यमुक्तम् इत्येवंप्रकारेणस्पर्शादिपंचानांविषयाणांसंगोपिसांनिध्येपि
तस्यांश्रीराधायांमानसंममचमनःलग्नसमाधिप्राप्तैकाग्र्यंचेत्तथापिहंतखेदेमहत्कष्टेवाविरहव्याधिर्वियो
गरोगःकथंकिमितिवर्द्धते अत्रश्चायमलंकारः रूपरसगंधस्पर्शशब्दाश्चविषयाइत्यमरः २५

गी०टी० संभ्रमा शिबमानात्ते तिर्यक्कंधेति मधुसूदनस्येदृग्रनाम्ना कस्य मधुपानकर्तुर्बीकटाक्षोर्मयः कटा
४० क्षसिंधुतरंगाः वो युष्माकं क्षेमं मन्नोष्टं ददतु प्रयच्छंतु कीदृशाः राधामुखेंदौ राधामुखचंद्रस्य उद्दिष्ट
स्पंदं चलनं तेन प्रेम्णा वकंदलिताः प्रवृद्धाः कीदृशो संमुग्धमधुरे सुष्ठु मुग्धं तन्मधुरं यत्र कादृशाः वं
शाद्रुच्चलत्सु बेणो निर्गच्छत्सु गीतिस्थानेषु गानपदेषु [redacted] कृतावधानेर्दृत्तचेतोभिर्ललनालक्षैः
गोपवधूसमूहैर्न संलक्षितान् ज्ञाता दृष्टा वा कादृशस्य तिर्यक्कांत्रे मंगललितः कंठो यस्यावि दृशोपेत लो

तिर्यक्कंठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्गीतिस्थानकृतावधानललनालक्षैर्न संलक्षिता, संमुग्धे
मधुसूदनस्य मधुरे राधामुखेंदौ मृदुस्पंदं कंदलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः २६ इतिश्रीगीतगोविंदे

मुग्धमधुसूदनो नाम तृतीयः सर्गः ३

लक्ष्मयले मोलिः शिखिशिखासमूहो मुकुटीकृतो यत्र तल्लौ चंचलौ उत्तंसौ यस्य कर्मधारयः रूपकालं
कारः गीतिगानमुने समस्त्यमरः उत्तंसः कर्णपूरोपि सुंदरे नायकेपि वेति धरणिः कंदलं तु नवांकुरः उर्मिः
पीडालयोत्कंठेतिव २६ श्रीराधिकाबियोगाधिव्याकुलं व्रजमोहनम् भजामि परमानंदं अश्वगालास ४०
हृतं इति श्रीमल्लक्ष्मवंद्रसेवकोटीव्यावतंसश्रीशावदासपंडितात्मजयवनमालिभट्टविरचितायां वनमा
लिसंजीवन्यां श्रीगीतगोविंदटीकायां मुग्धमधुसूदनो नाम तृतीयसर्गः समानत्रबंधः ७

CC0. In Public Domain, Digitizagtion by eGangotri

तृतीयेविरहावस्थाकृष्णस्योत्कंठाप्रियांप्रति चतुर्थेविरहावस्थातस्यास्तंप्रतिवर्ण्यते १ रः कामोधि
कोपस्याः साराधिकातत्सखीवासंतीमाधवंश्रीकृष्णंप्रत्याहवक्ष्यमाणमुक्तं कीदृशम् प्रेमभरेणप्रेमा
धिक्येनोद्भ्रांतंचेष्टाशून्यंतद्ध्यानानिष्ठंवाउद्विग्नंवा एतेनोद्वेगावस्थाअन्यक्रियामदंचेष्टाचसानुरागता
चोक्ता कीदृशम् यमुनायाःतीरवानीरनिकुंजेवेत्रलतागृहेमंदंस्वैरंअमंदंसवेगंवाआसीनम् क
थंमदनुग्रहंकरिष्यतीतिभावः यमुनातीरवानीरनिकुंजपदैः कृतांतनगिनीदाहाधिकान्वेषणोकामा

यमुनातीरवानीरनिकुंजेमंदमास्थितम् प्राहप्रेमभरोद्भ्रांतंमाधवंराधिकासखी १

धिकताक्रमेणसूचिता मंदः खलेमंदगतेमूर्खेइतिविश्वः वानीरंवेतसेप्रोक्तं नांबुकइतिश्रा स्वतः रसवद
नदक्षिणकर्णपूरे संस्तूयमानः सुरचारणाद्यैः कार्णाटरागःशिखिकंठनीलः तालल्लक्षणंपूर्वमेवोक्तम् अ
लंकारः अर्थांसारथोकः १ कार्णाटरागोएकतालीताले रागलक्षणम् कृपाणपाणिर्गजदंतपत्रमेकंवहं
त्रचनापिकालक्षणम् वासकसज्यासमुत्कंठास्वाधीनभर्तृकातथा कलहांतरितावापिविप्रलब्धाप्रोषित
रिका खंडितावोषितावापि नायिकाचाष्टसंमता तत्रसमुत्कंठितालक्षणंभरते यस्याः समुचितोप्यंघ्रिः
वासीनैवहत्ववनः तास्मरानलसंतप्ताविरहोत्कंठितामतेति १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰टी॰ सम्युक्तं गीतेन दर्शयति निंदतीत्यादिना हे माधव मधुप्रिय सा तव विरहे विश्लेषे दीना दुःखिता अतएव दाहकत्वात्
५१ चंदनं इंदुकिरणं च निंदति अधीरं बहु खेदं कष्टमनुविंदति प्राप्नोति त्वद्विरहे दाहकोपि दाहकत्वेन ज्ञात इति ध्व
निः किंच चंदनपर्वतवायुं सर्पनिवासस्य संसर्गेण साविषमिव कलयति मन्यते कीदृशी कामबाणभयात्त्रास
तः स्वभावेन प्रियं प्रतिनयतीति भावना ध्यानं तेन त्वयि लीना लग्ना कामबाणा मामेव दहंतु न मम प्रियमिति ध्यानं क
वचत्वेन करोतीति भावः शंबरारिर्मनसिजः स्मरः धीरस्तु कुंकुमे स्वल्पे तु धैर्यवतीति विश्वः गरलं तु विषे वा

क: र्णाटरागे एकतालीताले निंदति चंदनमिंदुकिरणमनुविंदति खेदमधीरम् व्यालनिलयमिलने
न गरलमिव कलयति मलयसमीरम् सा विरहे तव दीना माधव मनसिजविशिखभयादिव भावनया त्वयि ९
लीना १ ध्रुपदम् अविरलनिपतितमदनशरादिव भवदवनाय विशालम् स्वहृदयमर्मणि वर्म करोति सजलनलिनी

नेगरलं त्रिमूलकन्दस्याधि व्यालोभुजंगमे क्रूरे श्वापदे दंतिनीति विश्वः उत्प्रेक्षोपमालंकृती १ हे कृष्ण भवतोरक्षणाय ज
लसहितं कमलनीपत्रसमूहं स्वस्य हृदयरूपे मर्मस्थाने विशालं विस्तीर्णं वर्म कवचं करोति कस्मादिव अविरलं निरंत
रं यो निपतितो मदनशरः कामबाणस्तस्मादिव पूर्वं त्वयि लीनाप्यत्राति मलग्नमाना हृदये त्वद्रक्षणार्थं कवचं करोती ५१
ति भावः अनेन स्नेहाधिक्यं दौत्यनिपुणता चोक्ता उत्प्रेक्षालंकारः अवनं रक्षणे प्रीतावितिविश्वः २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यां

किंच कुसुमशय्यां तवपरिरंभसुखायालिंगनसुखायव्रतमिवकरोति कीदृशाम् कुसुमविशिखस्यकामस्यशरणांत
ल्पमास्तरणंयत्र अनल्पविलासकलाभिःबहुतरक्रीडाभिःकमनीयंसुंदरम् व्रतफलपरिपाकेनत्वयावरूपेणतव्यमि
भिध्यति [illegible] तमस्त्रीइसमरः दीपकालंकारः ३ व्र
तमस्त्वेदानीमतिसाहसमाचरतीतिकथयति वहतीत्यादि सान्द्रामुखकमलंवहतिधारयति प्रेमाश्रुणासहज

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् व्रतमिवतवपरिरंभसुखायकरोतिकुसुमशय
नीयम् ३ वहतिचवलितविलोचनजलधरमाननकमलमुदारम् विधुमिवविकटविधुंतुददंतदलन
गलितामृतधारम् ४

शीतलेनच कीदृशाम् वलितेत्वन्मार्गावलोकनायप्रसारितेलोचनेएवजलपूरोज्वलदौमेघौ यत्र एतेनेर्ष्यादयोमडलंच
सूचितम् किमिवविधुंचंद्रमिव कीदृशंचंद्रम् विकटैःकरालैर्विधुंतुदस्यराहोर्दंतैर्दलनेनखंडनेनगलिताप्रच्युतामृत
स्यधारायत्र अत्रमुखंविधुनानेत्रजलममृतधारयासहोपमा अत्रविधुंतुदशब्दकामःक्षीणवलःदंतैस्तन्मुखंदलतीतिध्व
निः विकटःसुंदरेप्रोक्तोविशालविकरालयोरितिविश्वः तमस्तुराहुःस्वर्भानुःसैंहिकेयोविधुंतुदश्चसमरः ४

Dr. Urmila Sharma Collection, Varanasi

किंच हे कृष्ण सा राधा रहसि एकांते कुरंगमदेन कस्तूर्या भवंतं विलिखति एतेनानुरागमालिन्यमुक्तम् कीदृशम् कामरूपं ४
गी॰टी॰ किंच तव करे शरं धृत्वा झषमकरं मत्स्यं कंदर्पवाहनं विनिधाय प्रणमति नमस्करोति कीदृशम् नवचूतं नूतनाम्रांकुरम्
५२ तव पूजनं कृत्वा त्वामेव याचत इति भावः यथा देवतापूजनं कुर्यात् दद्याद्बलिभुजे बलिं लिखेत्कांतप्रतिकृतिं पावयेत्कुक
मारिकामिति वचनम् अथवा कोप एव प्रणामः श्रीकृष्ण एव प्रणामं करोत्विति तं प्रेरयतीति भावः मृगनाभिर्मृगमदः
कस्तूरी गंधशेखर इति हारावली ५ किंच उन्मादावस्थामेवाह प्रतिपदमिति सा प्रतिपदं प्रतिचरणं इदमेवेदं निगद

विलिखति रहसि कुरंगमदेन भवंतमसमशरभूतम् प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ५ प्रति
पदमिदमपि निगदति माधव तव चरणे पतिताहम् त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ६
ध्यानलयेन पुरः परिकल्प्य भवंतमतीव दुरापम् विलपति हसति विषीदति रोदिति चंचति मुंचति तापम् ७

ति अतिशयेन विलपति हे माधव मधुप्रिय तव चरणे अहं पतिता त्वामेव नमस्करोमीत्यर्थः किंच इति सुधानिधिश्चंद्रोपि
त्वयि विमुखे पराङ्मुखे सति मयि सपदि शीघ्रं तनुदाहं शरीरतापं तनुते विस्तारयति विरोधालंकारः ६ किंच उन्मादा
वस्थामुक्त्वा किलकिंचितेनाह ध्यानेत्यादिना ध्यानलयेन चिंतापरत्वेन भवंतमतीव दुरापं अतिशयेन दुःप्रापं पुरो न
ग्रे परिकल्प्य कृत्वा शोकेन विलपति प्रेम्णा हसति स्नेहाधिक्येन विषीदति रोदिति विरहेण वंचति गच्छति त्वदन्वेष ५२
णाय अनुरंजनेन तापं दुःखं मुंचति त्यजति शोकरोषाश्रुहर्षादिः संकरः किलकिंचितमिति दीपकालंकारः ७

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतार्थसंग्रहेणाह श्रीजयदेवेति श्रीजयदेवभणितं कथितमिदमधिकमतिशयेन परिचयात्मनसा चित्तेन नटनीयं
पठितव्यम् तदाह हरिविरहेण श्रीकृष्णविरहेण व्याकुलाया बल्लवयुवति गोपयुवतिः श्रीराधा तत्सखीवचनं पठनीयम्
गीतमेव सर्वं विधास्यतीति भावः ८ एवं सा त्वां विना कुत्रापि आनंदं लभत इति प्रलपति आवासेति हे कृष्ण त्वद्विरहेण
आवासो गृहं विपिनायते अरण्यमिवाचरति किंच प्रियसखीमाला बल्लभसहचरीसमूहोपि जालवद्बंधनत्वेन प्रती

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम् हरिविरहाकुलबल्लवयुवतिसखीवचनं पठ
नीयम् ८ आवासो विपिनायते प्रियसखीमालापि जालायते तापोनिःश्वसितेन दावदहनज्वालाक
पा लापयते सापि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि यमायते विरचयन् शार्दूलविक्रीडितम् ९

यते तापोपि विरहोद्भवसंतापो निःश्वसितेन दावदहनज्वालावलीवाचरति किंच हंत कष्टं त्वद्विरहेण सापि
हरिणीरूपायते कानने शार्दूलत्रस्ता मृगीवाचरति परिभ्रमति हा कष्टं कथं वा कंदर्पोपि कामोपि यमायते
त्वद्विरहेण कृतांतवदाचरति एतेन कामस्य संतापकर्तृत्वमुक्तम् किं कुर्वन् शार्दूलस्य व्याघ्रस्य विक्री
डां विरचयन् कुर्वन् मृगीमरणं व्याघ्राद्भवति तद्वदत्रापि एतेनोद्वेगावस्था व्याध्यवस्था चोक्ता तल्ल विक्रीडितं
क्षणम् अभीष्टसंगमाभावाद्व्याधिः संतापलक्षणः शार्दूलो राक्षसे व्याघ्रे पशुभेदे चेति विश्वः ९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰टी॰ तदेवगीतेनाह देशाखरागेएकतालीताले रागलक्षणम् आस्फोटनाविःकृतरोमहर्षो निपुणसंबद्धवि
५२ शालबाहुः प्रांशुः प्रचंडद्युतिरिंदुगौरो देशाखरागः किलमल्लमूर्तिरिति तालक्षणमुक्तमेव ध्रुप
दम् हेकेशवसाराधिकातवविरहेसतिकृशातनुरितिहेतोःस्तनविनिहितंस्तनधृतमपिचारुहारंसुंदरमपिल
यात्तमपिहारंभारंमनुते तद्धारणसमर्थाल्पयाकर्त्तव्येतिभावः १ विरहजनितव्याधिमाह साचंदनलेपं

देशाखरागेएकतालीताले स्तनविनिहितमपिहारमुदारंसामनुतेकृशतनुरितिभारम् राधि जपं
काविरहेतववकेशव ध्रुपदं १ सरसमसृणमपिमलयजपंकम् पश्यतिविषमिववपुषिसशंकं २
म श्वसितपवनमनुपमपरिणाहम् मदनदहनमिववहतिसदाहम् ३

सरसमसृणं आर्द्रं चिक्कणमपिकर्पूरादिमिश्रितंवादेहेसशंकाशंकासहितंविषमिवगरलमिवपश्यति एते
नजीवितायामतिसाहसंकरोतीतिध्वनिः मसृणःकर्कशोऽस्निग्धइतिमेदिनीकारः पंकःकर्दमपापयोरितिवि
श्वः २ किंचसातवविरहेश्वसितपवनंश्वासवायुंमदनदहनमिवकामाग्निमिववहतिधारयतिविरहवायोः
तिदाहकत्वात् कीदृशम् अनुपमपरिणाहंउपमारहितःपरिणाहोदैर्घ्यंयत्र कीदृशम् सदाहंदाहसहि ४३
तम् पदद्वयेनदाहः श्वासाधिक्यंचसूचितं ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच हे कृष्ण सा नयननलिनं नेत्रपद्मं जलेन आदिशि दिशि तदागमनकांक्षया विकिरति क्षिपति कीदृशम् अ
श्रुसमूहैः सहितम् कीदृशम् विगलितनाल मिवगलितदंडमिव तापबाहुल्यात् दृक्संशोषणाभावः सूचित
इति किंच नवदागमनेच्छया नयनपद्मैर्दिग्मंडनं करोतीतिभावः विरोधालंकारः उद्वेगावस्थेयम् ४ किं
च सा नयनविषयं नेत्रगोचरमपि किशलयतल्पं पल्लवशय्यां विहितहुताशविकल्पं कृताग्निसंदेहं कल
यति स्पर्शं न जानातीत्यर्थः एतेन दृष्टं स्पृष्टं च सद्वस्त्वपि शरीरे त्वद्विरहे सा सुखप्रदं न जानातीति ध्वनिः उद्वेगा ना
वस्था विरोधालंकारश्च ५ किंच सा सायं संध्यासमये करतलेन कपोलं गंडस्थलं न सजति कीदृशम् अलो

दिशि दिशि किरति सजलकणजालम् नयननलिनमिव विगलितनालम् ४ नयनविषयमपि किश
लयतल्पम् कलयति विहितहुताशविकल्पम् ५ त्यजति न पाणितलेन कपोलम् बालशशिनमि
वसायमलोलम् हरिरिति हरिरिति जपति सकामम् विरहविहितमरणेव निकामम् ७

लं निश्चलम् दिवसस्तु महता कष्टेन नीतः रात्रिः युगशतोपमा कथं नेतव्येति भावः कमिव प्रतिपच्चंद्रमिव अ
र्द्धकरतलाच्छादने मुखस्य बालचंद्रसाम्यं सूचितं सायमिति मुनयस्त्र जडतावस्थेयम् यत्र ध्यायति निःसंगे जड
तासा प्रकीर्तितेति ६ किंच सा निकामम् अतिशयेन सकामं सातिशयं हरिरिति वारं वारं जपति आवर्तयति न तु त्वां
हरिं मत्वा स्मरति किं तु त्वां नंदसूनुमेव जानाति केव विरहे तिष्ठते न गुणकीर्तनाद्यवस्थोक्ता ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० गीतार्थसंग्रहेणाह श्रीजयदेवेत्यादि इत्यनेन प्रकारेण श्रीजयदेवेन भणितमुक्तं श्रीराधासखीगीतं श्रोत्रादीन्
५५ केशवपदे प्रतिसुखयतु कीदृशम् केशवपदे वैकुंठे श्रीवृंदावने वा प्रसुपनीतं प्रापितमुपनीयमानं वा के
शवस्य पदे वैकुंठे वा स्थाने निकुंजगृहे वा पदं स्थानोपवाकैचपिसेनिधिमवसाययोरिति विश्वः ८ इदानीं वि
रहव्याधिसंतप्ता ध्रुवं मरिष्यतीति सूचयन्नाह सेति सा राधा रोमांचितदेहा भवति सीत्करोति सीत्कारं करो
ति विलपति विलापं करोति उत्कंपते सकंपा भवति ताम्यति ग्लानियुक्ता भवति ध्यायति ध्यानं करोति

श्रीजयदेवभणितमिति गीतम् सुखयतु केशवपदमुपनीतम् ८ सा रोमांचति सीत्करोति विलप
त्युत्कंपते ताम्यति ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्छत्यपि एतावत्यतनुज्वरे वरतनुर्जीवेन्न
किं ते रसात्स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः २८

उद्भ्रमति भ्रांतिं प्राप्नोति प्रमीलति नेत्रप्रमीलनं कृत्वा सुखमनुभवति पतति शय्यायां गच्छति उद्याति अभ्यु
द्गमनं करोति मूर्छति मूर्छां प्राप्नोति एतैः क्रियापदैरभिलापदुःखगुणकीर्तनवियोगग्लानिसुखभ्रांतिस
मागमाक्षपगमन उद्वेगमूर्छाक्रमेणोक्ताः हे स्वर्वैद्यप्रतिम अश्विनीकुमारतुल्य एतावत्येतावन्मात्रे अतनु
ज्वरे कामे यदि त्वं वरतनुः सुकुमारांगी प्रसीदसि प्रसन्नो भवसि तर्हि ते तव रसात् शृंगाररसात् औषधात् वा
किं न जीवेत् अपि तु जीवेदेव अन्यथा प्रकारांतरेण तस्या हस्तकः वैद्यानां कृपाविशेषः त्यक्तः न जीवेदे
घो व यथा त्यक्तकृपाविनुःपोवैरागिणां तकस्तथाऽस्यास्त्वमित्यर्थः हस्तकः कृसनस्ययोरिति वैजयंती हे त्यक्ति

५५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संकृतिशिथिलप्रयत्नमुन्नयंती स्मरेत्याह हे दैवतवैद्य देववैद्य हृद्य मनोहर त्वं स्मरातुरां कामसंतप्तां राधां विमुक्तबाधां स्वकृपापीडानकुरुषे न करोषि यदा तदोपेंद्रवज्रादपि कठिनोसि यथेंद्रो वज्रेण वृत्रं हतवांस्तथा त्वं बध्नासीति ध्वनिः ननु औषधाद्याधनदानादपि व्याधीनां प्रतीकारः कर्तव्यः

स्मरातुरां दैवतवैद्यहृद्य त्वदंगसंगामृतमात्रसाध्याम् विमुक्तबाधां कुरुषे न राधा
मुपेंद्रवज्रादपि दारुणोसि २९

किं मयेत्याह हृद्यं सुंदरं त्वदंगसंग एवामृतं जीवनोपायस्तेन साध्यां प्रतिकार्यां हृद्यमुक्तमत्र हृद्यं मनो हरं प्रोक्तं हृद्यं च हृदयप्रियमिति २९

Dr. Urmila Sharma Collection, Varanasi

गी॰टी॰ नन्वन्यैः शीतलोपचारैः कामशांतिः कर्त्तव्या किं मदनुग्रहेणेत्यत आह वैपरीत्यं कंदर्पेति आश्चर्यम
होस्याश्चेतश्चित्तं चिरं चिरकालं चंदनादीनां चिंतासु स्मरणेष्वपि किं पुनर्दृष्टेषु संताम्यति ग्लानिं ता
४५ पं वा प्राप्नोति त्वद्विरहे अस्य दाहकं दाहकेन प्रतीयत इति भावः नन्वीदृशी सा कथं जीवतीत्याह हे

कंदर्प्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमःकमलिनीचिंतासु संता
म्यति किंतु क्लांतिरसेन शीतलतनुं त्वामेकमेव प्रियं ध्यायंती रहसि स्थिता कथमपि
क्षीणं प्राणिति ३०

रा॥ द्व

क्लांतिरसः संतापावलोकनरसस्तेन हे विभो किंतु त्वामेवैकं प्रियं वल्लभं ध्यायंती क्षणं क्षणमात्रं प्राणिति
जीवति कीदृशी रहस्येकांते क्षणमपि स्थिता कीदृशी क्षीणा कृशांगी कीदृशं त्वाम् शीतला तनुर्यस्य त ४५
म् क्षीणेति वक्षोनेति क्वचित्पाठः इनः सूर्यप्रभावितिविश्वः संतापसंज्वरः इत्यमरः विरोधोपमालंकारः
३०

CC0. In Public Domain, Digitizagtion by eGangotri

नन्वेतावत्कालं जीवितायेपि न मरिष्यति किं मदनुग्रहेणेति तत्राह क्षणमिति यया श्रीराधया पुरा संग-
दशायोरहएकांतेतेतवबिरहः क्षणमपि न सेहे न सोढा कीदृश्या नेत्रनिमेषेण खिन्नया प्राप्तदुःखया
असावेवंभूता श्रीराधा रसालद्रुमस्यांगान्याम्रद्रुमस्यांगां पुष्पितायां पुष्पितशिखरो विलोक्य चिरं विरहेण चि-

क्षणमपि बिरहः पुरा न सेहे नयननिमीलनखिन्नयायया ते श्व·सिति कथमसौ र-
सालशाखां चिरविरहेण विलोक्य पुष्पिताग्राम ३१

रकालवियोगेन कथं केन प्रकारेण श्वसिति जीवति श्वासमात्रेण जीवनेन त्ववयवादिप्रचलनमिति भावः
पुष्पितायामिति वसंतागमेन हृल्लासमोहयोरुत्पन्नत्वादिति ध्वनिः श्वसतीति परमसाहसाचरणमिति सूचितम्
विरोधालंकारः ३१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संप्रति श्रीराधावलंबनाय मंक्षावलंबनाय वा कविवाक्येन सखी श्रीकृष्णबाहुं स्तौति दृष्टीति गोपत

गी०टी नोः श्रीकृष्णस्य बाहुः भवतः श्रीराधालक्षणस्य चश्रश्रूषो: सखी भूते श्रेयांसि विरहव्याधिनाशकानि

५६ कल्याणानि तनोतु विस्तारयतु कीदृशस्य कंसद्विषः देत्यवैरिणः सखीपक्षे श्रीराधाविरहेणसुखवै

रिणः इति वा बाहुपदे श्रीराधालिंगनार्थमिति भावः कीदृशः दृष्ट्या व्याकुलस्य दुःखितस्य गोकुल

दृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्द्धनं बिभ्रद्वल्लववल्लभाभिरधिकानंदाच्चि

रंचुंवितः दर्प्येणेव तदर्प्पिताधरतटी सिंदूरमुद्रांकितो बाहुर्गोपतनोस्तनोतु भ

वतः श्रेयांसि कंसद्विषः ३२

स्य गोसमूहस्यावनं पालनं स एव रसो रागो वीर्यं वा तस्मात् गोवर्धनपर्वतमुद्धृत्य चिरं सप्ताहं विभ्रत् रधस्य की

दृशो बाहुः बल्लववल्लभाभिर्गोपसुंदरीभिरधिकानंदाद् अतिहर्षाद् अधरे रासरसाद्गोवर्द्धनोद्धरणसमये वा ५६

चुंवितः पुनः कीदृशः दर्प्पेण कंदर्प्पगर्वेणेव ताभिरर्प्पिता दत्ता अधरतट्य एव सिंदूरस्य मुद्राः सिंदूरचिह्नानि

तैरंकितः अधरलोहितत्वात्संभोगचिह्नांकित इत्यर्थः तया श्रीराधयानुरागेन चिह्नित इति वा सखीपक्षे ३२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तंवंदेपरमानंदमाधवंजन्नवत्सलम् श्रीराधासखीवाक्येनप्रेम्णाचपरिपूरितम् इतिश्रीमत्कुल
चंद्रसेवकोदीच्यावतंसश्रीशिवदासपंडितात्मजश्रीवनमालिनाविरचितायांश्रीवनमालिसंज्ञी
विमागीतगोविंदटीकायांस्निग्धमधुसूदनोनामचतुर्थःसर्गः ४ पंचमेप्रेमजनितेतद्विश्लेषविचेष्टि
तम् निशम्यप्रेषयामासतत्सखींचतदंतिकं १ संप्रतिश्रीकृष्णनियुक्तासखीराधामाह अहमिति

इतिश्रीगीतगोविंदेचतुर्थःसर्गः ४ अहमिहनिवसामियाहिराधामनुनयमद्व
चनेनचानयेथाः इतिमधुरिपुणासखीनियुक्तास्वयमिदमेत्यपुनर्जगादराधां २२

इत्येवंमधुरिपुणाश्रीकृष्णेननियुक्ताप्रेरितासखीपुनःश्रीराधांस्वयमेत्यगत्वाइदंवक्ष्यमाणंजगादोवा
च इतीतिकिम् हेसखित्वंयाहिगच्छइहकुंजेदुःखश्रवणाद्गंतुमशक्तोहंनिवसामितत्सतीशांकरिष्या
मि ननुसामानवतीस्वयमेवगत्वाप्रार्थ्यताम् कृतापराधेनमयासम्यक्वक्तुंनशक्यते अतएवत्वंम
द्वचनेनानुनयशांत्वयमत्समीपेचानयेथाःआनयस्व विभावनालंकारः २२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० टी० वराडीरागेरूपकताले ॐपदम् अत्राभिसारिकेयंतस्याःलक्षणम् लज्जांहित्वासमाकृष्ययौवनेनमदेनवा
५७ अभिसारयतेकांतंसाकीर्तिताभिसारिकेति रागलक्षणम् विनोदयंतीदयितंसकेशीसुकंकणाचामरचाल
नेन कर्णेदधानासुरपुष्पगुछंबरांगणेयंकथितावराडीति काललक्षणंप्रागेवोक्तम् श्रीकृष्णस्यबिरहोद्दिकमा
ह वहतीत्यादि हेसखिराधेतवविरहेवियोगेवनमालासीदतिदुःखितोभवति वनस्यजलस्यवामालास्तीः
ति अनेनत्वांविनोद्वेगावस्थेतिध्वनिः कस्मिंसति मदनंकामंउपनिधायसमापवर्तिनंकृत्वामलयसमी

वराडीरागेरूपकताले बहतिमलयसमीरेमदनमुपनिधाय स्फुटतिकुसुमनिकरेबिर
हिहृदयदलनाय तवविरहेबनमालीसखिसीदति ॐपदम् १ दहतिशिशिरमयूखेमरण
मनुकरोति पततिमदनविशिखेबिलपतिविकलतरोति २

रेमलयानिलेवहतिसति किंच विरहिणांवियोगिनांहृदयदलनायमर्मपीडनायकुसुमनिकरेपुष्पसमूहे ४
स्फुटतिविकशतिसति त्वयाधरामतेनसंजीवनीयइतिममप्रार्थना विशेषोक्तिरलंकारः १ नंदकिशोर
स्यावस्थांतरंसखीराधांप्रत्याह दहतीत्यादि हेराधेश्रीकृष्णःशिशिरमयूखेचंद्रेदहतिसति [redacted]
मरणमनुकरोतिमरणवद्दुःखमनुभवति अनुमरणमपितुच्छीकरोतिइतिवा किंच मदनविशिखेकामबाणे गीतगोविंद ५०
पततिसति अतिशयेनविकलतरोव्याकुलोपिबिलपतिविलापंकरोति त्वद्विरहेकामोपितस्यबाणैःप्रहर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निशि २

किंच मधुपसमूहे भ्रमरनिकरे ध्वनति गुंजति सति श्रवणमपिदधाति हस्ताभ्यां कर्णौ वाछादयति
एतेन श्रवणयाति धैर्यं करोति किंच वलितविरहे संदा प्रवियोगाग्रो निशि "रात्रौ" मनसि हृदये रुजं। रात्रौ २
तत्कृतां पीडामुपयाति प्राप्नोति दिवसस्तु त्वमार्गावलोकनेन कथं चिन्नीतो रात्रिर्नैव गच्छतीति दीर्घ

नि
ध्वनतिमधुपसमूहे श्रवणमपिदधाति मनसि वलितविरहे निशि रुजमुपयाति २ व
सतिविपिनविताने स्यजति ललितधाम लुठति धरणिशयने बहु विलपति तव नाम ध

पीडाध्वनिता ३ किंच विपिनविताने वनविस्तारे समूहे वा बसति तिष्ठति ललितं सुंदरं धाम गृहं त्यजा-
ति नैतादृशं स्थानं त्वामंतरा सुखलेशं इति भावः धामशब्दवाच्यान् सर्वान् त्यजतीति ध्वनिः किंच शय्यादि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० कंविहायधरणिशयनेभूमितल्पेलुठतिवारंवारंतवनामावर्त्तयतिच त्वच्चरणालंकृतभूमौसर्वांगे
५८ श्लेषतद्गतिभावः क्षामदेहेगृहेबस्त्रेचेतिविश्वः ४ कविजयदेवविरहिणांवियोगिनांविलसितेन
विलासेनैवंभणितिसाति हरिःश्रोतृणांमनस्सु दयतुहृदयंप्राप्नोतु कीदृशो मनसिसुकृतेनपुन्य०

भणितिकविजयदेवविरहिविलसितेन मनसिरभसविभवेहरिरुदयतुसुकृतेन
५

हर्षस्य
निचयेनसुष्टुकृतेनगीते नवारभसस्यविभवेपूरे तत्साहवेगयोंप्रोक्तोरभसइतिहलायुधः स्वभावो ५८
क्तिरलंकारः ५

Dr. Urmila Sharma Collection, Varanasi

किंच त्वत्प्राप्तये तस्योत्कंठामाह पूर्वमिति हे सखि राधे माधवः श्रीहरिस्तस्मिन्नेव निकुंजमन्मथमहाती
र्थे निकुंजवरकामतीर्थे भूयो वारं २ त्वत्कुचकुंभयोः परिरंभो गाढालिंगनं मतं वांछति कुंभपदं रतिजलधित
रणायेति भावः किं कुर्वन् पुनस्त्वामेव नान्यामिह तीर्थे ध्यायन् अनिशं निरंतरं तव आलापा एव मंत्राः परम
सिद्धिप्रदा मंत्रास्तेषामावलीपरंपरां जपन्नावर्त्तयन् त्वामिह देवत्वेनावर्त्तयन्निति स्नेहातिशयः सूचितः ती

पूर्वं यत्र समं त्वया रतिपते रासादिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः
ध्यायंस्त्वामनिशं जपन्निह तवैवालापमंत्रावलीं भूयस्त्वत्कुचकुंभनिर्भरपरिरंभामृतं वांछ
ति ३४

त्वया

र्थप्रभावमाह यत्र निकुंजसिद्धतीर्थे पूर्वं प्रथमं सार्द्धं रतिपतेः कामस्य सिद्धयः कामसुखानि त्वया आसादिताः प्रा
प्ताः एतेनात्र संगौ कामदृष्टप्रयत्नेन सेव्यत इति ध्वनिः स्वभावोक्तिरलंकारः ३४ एवं स्वानुरागश्रवणप्रसन्नां तां
आश्लिष्य प्रति सखी प्रेरयति रतिसुखेत्यादिना गीतस्य गुर्ज्जरीरागः रूपकतालश्चोभयोर्लक्षणं पूर्वमेवोक्तं ध्रुव

CC0. In Public Domain, Digitizagtion by eGangotri

गी० टी० स्यापि हे नितंविनिश्चयुनितंबयुक्ते तस्मादुत्कर्षप्रदर्शनायनितंबवतीतिध्वनिः हृदयेशं तवहृदयानु
४९ वर्त्तिनंतंश्रीकृष्णंअनुसरअनुगच्छगमनायअभिसारायविलंबनंनकुरुमाकुरुयावद्वनमालीयमुनातीरेव
नेतिष्ठतितावदेवानुसर कीदृशे रतिसुखसारेरतिसुखंसुरतसुखमेवसारोयत्र त्वदागमनकांक्षयाभिसारे
त तिष्ठंम् कीदृशंतम् मदनमनोहरवेशंकामस्यमनोहरोवेषःशृंगाराकारोयत्र कीदृशे धीरोमंदःसमीरोवा

गुर्जरीरागेएकतालीताले रतिसुखसारेगतमभिसारेमदनमनोहरवेशम् नकुरुनितंबिनिगम
नविलंबनमनुसरतंहृदयेशम् धीरसमीरेयमुनातीरेवसतिवनेवनमाली गोपीपीनपयोधरम
र्दनचंचलकरयुगशाली ध्रुपदम् १०

युर्यत्र त्वद्विरहनिवारणायधृतावनमालेतिध्वनिः यमुनातीरेएवधीरसमीराश्चांशैत्यमंद सौगंध्यान्युक्तानि धीरो
मंदइगतेधीरेइतियादवः प्रेखोनामालंकारः कीदृशोवनमाली गोपीनांपीनपयोधराणांवर्तुलस्तनानांमर्दनेन ४९
चंचलंचपलंयत्करयुगलंहस्तयुगलंतेनशालीशोभमानःवशीकृतयुवतिसमूहोवा १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृदुबेणुं मृदुशब्दयुक्तं बेणुं वादयते कीदृशम् नामसमेतं हे राधे हे बल्लभे हे प्राणेश्वरि इति यत्त्वन्नाम तद्युक्तम्
वाद्यमानाद्वेणोस्त्वन्नामैवाविर्भवतीति भावः रामकली असावरी धनाश्री इति नामरागत्रयेन युक्तं वा कीदृशं नाम
कृतः संकेतो यत्र तादृशम् यदि त्वन्नामसमेतो बेणुर्वाद्यते मया तर्हि त्वयागन्तव्यमिति सूचितम् किंच हे तनु
अत्र वार्थे नद्योर्ह्रस्वः तेन तव तनुसंगतपवनचलितमपि रेणुं बहु मनुते आसादरेण धन्येव हुश्लाघ्यमात्मानं मन्यते
वा यदा वायुनाप्यागतं रेणुमपि धृत्वा धन्योऽहमिति मन्यमानस्तदा त्वदंगसंगेनानंदो भवितेति किं वक्तव्यमिति भावः

नामसमेतं कृतसंकेतं बादयते मृदुबेणुम् बहु मनुते तनु ते तनुसंगतपवनचलितमपि रेणुम् २
पतति पतत्रे बिचलति पत्रे शंकितभवदुपयानम् रचयति शयनं सचकितनयनं पश्यति तव पंथानम् ३

२ किंच सर्वकरणवृत्तिरपि त्वय्यर्पितास्तेनामेवाह पततीति पतत्रे पक्षिणि पतति वृक्षाद्वृक्षांतरं गच्छति स
ति किंच वृक्षात्पत्रे विचलति सुकंपमाने सति स श्रीकृष्णः शयनं शय्यां रचयति त्वत्सुरतसंभोगार्थं निर्मांती
त्यर्थः तव पंथानं मार्गं च चकितनयनं कदागमिष्यतीति सभयनेत्रं यथा स्यात्तथा दिशः प्रतिपश्यति कीदृशं
पंथानम् शंकितभवदुपयानम् शंकितं भवत्या उपयानं समीपागमनं यत्र तादृशम् सर्वनाम्नः वृत्तौ पुंवद्भावः

७

Dr. Urmila Sharma Collection, Varanasi

गी०टी मुप्रसन्नामालस्याह मुखरेत्यादि हेसखिराधेमंजीरंनूपुरंत्यज कीदृशम् मुखरंशब्दयुक्तम् अधीरंचगम
५० नस्चकमित्यर्थः कीदृशम् केलिषुसुरतक्रीडासुलोलंचंचलम् कस्मिवरिपुमिव किंच कुंजंकुंजमंदि
रंचलगच्छ कीदृशम् सतिमिरपुंजम् अंधकारसमूहयुक्तम् सहासामालस्यगमनायोपायमाह नील
निचोलंनीलवस्त्रंशीलयपरिधेहि एवंसहतत्रिष्टितकौशलेनसखीराधामशिक्षयदितिभावः मंजीरोनू
पुरोस्त्रियामित्यमरः निचोलःप्रछदपटइत्यपि ॥ नन्वलंकारत्यागेनशोभानस्यादित्यतोकिंकोशोभासप
त्रिमाहोरसीत्यादि हेपीतेदाहोत्तीर्णकनकगौरांगि हेसुकृतबिपाकेपूर्वजन्मार्जितपुन्यफले मुरारेःश्रीह

मुखरमधीरंत्यजमंजीरंरिपुमिवकेलिसुलोलम् चलसखिकुंजंसतिमिरपुंजंशीलयनीलनिचोल
म् ॥ उरसिमुरारेरुपहितहारेघनइवतरलबलाके तडिदिवपीतेरतिबिपरीतेराजसिसुकृतबिपाके ५

राजसिबि रस्योरसिवक्षसिराजिष्यसि बर्त्तमानसमीपेइतिवत् कदा रतिविपरीतेपुरुषायितनायिकारतिकालेसुरतांते
वा कीदृशे उरसिउपहितहारे समर्पितमुक्ताहारे आलिंगनायापसारितहारेवा पुनःकीदृशेउरसि घनइवमेघ
सदृशे कीदृशेघने तरलाश्चंचलाबलाकाःबकपंक्तयोयत्र केवतडिदिव यथानानाबर्णबिचित्रचमत्कार
वतीतडित्घनस्योपर्य्यधःस्फुरंतीराजतेतथात्वमपीतिध्वनिः तत्रहारोस्मराधानांबलाकमेघतडितामनुक्र
मेणसाम्यम् बलाकाबकपंक्तौस्याइत्युत्काविश्वाकंटिकाइतिबिश्वःशाकः कीदृशेतेस्यादौपरिणामेचउर्गला

CC0. In Public Domain, Digitizagtion by eGangotri

एवं नायकायितरतोत्कंठां कारयित्वा पुनस्तस्यास्तदुत्कंठां जनयितुमाह विगलितेत्यादि हे पंकजनयने कमलाक्षि कि
शलयशयने नवपल्लवतल्पे जघनं घटय आरोपय कीदृशम् विशेषरसावेशेन गलितं स्खलितं वसनं नीलवस्त्रं यत्र
पुनः कीदृशम् परिहृता दूरीकृता रसना क्षुद्रघंटिका यत्र नीलांबुदसुंदरश्रीनंदकिशोरदर्शनेन स्खलितवसनरसनमि
ति ध्वनिः अत एवापिधानं आवरणशून्यम् किंच हर्षनिधाने परमानंदस्थानम् कमिव निधिमिव नायकस्याभीष्ट
निधिमिव यथा निधिरुद्घाटितो मुखाय सन्नवति तद्वत् जघने कटेरधोभाग इति हारावली निधाने निधिगोह्ययोरिति हे

विगलितवसनं परिहृतरसनं घटय जघनमपिधानम् किशलयशयने पंकजनयने निधिमिव
हर्षनिधानम् ६ हरिरभिमानी रजनिरिदानीमियमपि याति विरामम् कुरु मम वचनं सत्वररचनं
पूरय मधुरिपुकामम् ७

मे ६ एवं शिथिलप्रयत्नो राधां प्रति रजनीच्छेदमुपायमाह हरिरित्यादिना हरिः कामतापहरो ऽभितः सर्वतः सर्वा
त्मनैव वा त्वामेव मानयतीत्यभिमानी यद्वा अभिमानीय तत्स्पर्शेनातिशयेन प्रेम्णाभिमानवानतः मधुर्वसंतो रिपुः शोभकत्वे
नयस्य तस्य मधुरिपोः कामं कामाभिलाषं पूरय पूर्णं कारय रिपुः पीडितः प्रियस्त्वया सहायेन बन्धीकृतो ऽनविष्यती ७
ति भावः किंच संप्रतीयं रजनी रात्रिर्विराममवसानं याति यास्यति अपि यावद्यातितावन्मम वचनं सत्वररचनं त्व
रान्वितगमनसहितं कुरु रतिमानातिकृच्छित्यावत्तदाभी राधा रतिपूर्णेः अत्राभिसारिका नायिका तल्लक्षणं म
दनानलसंतप्ता याभिसारयति प्रियमिति एवं सुरतसमये समुपस्थिते गमनविलंबनमयुक्तमिति भावः सब

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी णा नार्थसंग्रहं मंगलत्वेन योजयति श्री इत्यादि हे हरिभक्ताः श्रीजयदेवे परमरमणीयं निरूपम मनोहरं भणति
कथयति सति हरिं नमत नमस्कुरुत कीदृशा भक्ता हरिसेवा चिंतनादि रूपा येन कीदृशं हरिम् प्रमुदितं प्रकर्षेण
५१ तं नंदितं हृदयं यस्य तं पुनः कीदृशम् अतिशयेन सदयं दयया युक्तम् पुनः कीदृशम् सुकृतैः पुन्यराशिभिः सुक
विज्ञिर्वा प्रार्थनाये सुंदरं वा वस्तुतो क्तिरलंकारः ८ एवं नानोपायैरनतिसरतीं श्रीराधां पुनः सख्याह विकि
रतीत्यादिना हे कांते त्वत्पदाभ्यावज्ञाकृत बहुमेनैव तव प्रियो वल्लभः श्रीकृष्णो मदनस्वत्वाद्धिरहेण कदनं पीडनं

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् प्रमुदितहृदयं हरिमतिसदयं नमत सुकृत
कमनीयम् ८ विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते प्रविशति मुहुः कुंजं गुंजन्मुहुर्बहु
ताम्यति रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लांतः कांते प्रियस्तव वर्तते ३५

तेन क्लांतः संतप्तो वर्तते संतप्तमेवाह मुहुर्वारं २ त्वदागमनचिंतया श्वासान् संतापनिश्वासान् विकिरति विक्षिपति मुहुः
पुरोग्रे आशा दिशा ईक्षते पश्यति केनापि मार्गेण कुंजं गतागमिष्यतीति मुहुः कुंजं लतामंदिरं प्रविशति कीदृशं कुंजं गुं ५१
जं तो भ्रमरा यत्र तत् गुंजत् तत्राप्यलभमानो मुहुस्ताम्यति अतिग्लानिसंतप्तो भवति इत्येवंविधोपि त्वदालिंगनाय शय्यां
विविधकिसलयपुष्पतल्पं रचयति तस्मिन् कृत्वानागतेयमिति विज्ञाय त्वदागमनाय मुहुः परितः आकुलं व्याकुलं यथा
ईक्षते एतेन त्वय्यनुरागातिशयः प्रोक्तः दीपकालंकारः ३५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हेमुग्धेस्वकार्यंविद्धि अधुनासंप्रतित्वद्वाकेनसमंसांद्रतिग्मांशुःसूर्यः समग्रंसामस्त्येनअस्तंगतोदर्शनंप्राप्तः अथवा
समग्रमधुनाखिलमधुसमूहेनेतिवाकेन किंच गोविंदस्यश्रीकृष्णस्यमनोरथेनश्रीराधागमिष्यतीतिवांछयासमंसार्द्ध
तमअंधकारःसांद्रतांस्निग्धतांप्राप्तम् निविडांधकाराभिसरणोपयोगमित्यर्थः एषादीर्घामदभ्यर्थनाआग्रहगम्यतामि-
तिमदीयाप्रार्थना कादृशी कोकानांचक्रवाकानांकरुणस्वनेनकरुणरसाश्रयविरहकूजितेनसदृशी यथाचक्रवा-
कानांकरुणस्वनोनानाप्रकारःश्रूयतेतथामदीयाः पुनःपुनर्वाग्गजवंतीसर्वेदृश्यमितिभावः तत्तस्माद्विलंबनंगमना

त्वद्वाकेनसमंसमग्रमधुनातिग्मांशुरस्तंगतोगोविंदस्यमनोरथेनचसमंप्राप्तंतमःसांद्रताम् कोकानां
करुणस्वनेनसदृशीदीर्घामदभ्यर्थनातन्मुग्धेविफलंविलंबनमसौरम्योभिसारक्षणः ३६ आश्लेषादनु
चुंबनादनुनखोल्लेखादनुस्वांतजप्रोद्बोधादनुसंभ्रमादनुरतारंभादनुप्रीतयोः अन्यार्थंगतयोर्भ्रमान्मिलि
तयोः संभाषणैर्जानतोर्दंपत्योरिहकोनकोनतमसिव्रीडाविमिश्रोरसः ३७

यविफलंहस्तगतसौख्यप्रतिबंधकमित्यर्थः अतोसावभिसारक्षणःअभिसरणसमयोरम्योगमनायमनोहरःसहो
क्तिलंकारः यथासहदीर्घाममश्वासैरिमाःसेमतिरात्रयइतिदंडी ३६ अभिसारस्यफलमेवसख्याह इहनिविडेतमसि
दंपत्योर्नायकयोर्व्रीडाविमिश्रोलज्जासमन्वितःकोनकोनरसःशृंगाररसोभिसारस्यतोप्रथयति अपितुसर्वोपिरसोभ
वत्येव कीदृशयोः सुरतमुद्दिश्यपार्श्वव्याजेनसुरतंप्रतिगतयोः कीदृशयोः भ्रमात्संभ्रमतःपरिभ्रमणतोवासांद्रतमसिमिलि
तयोःसंगतयोःपरस्परालापैःस्वरभंगाद्यालापैर्वासुरताभिप्रायंजानतोःकीदृशयोः आलिंगनचुंबननखक्षतकामोद्बो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धकामोद्दीपकसुरतास्तैः क्रमादैतैरत्र पश्चात्प्रातयोर्ध्वध्वानंदयोस्तनयोरित्यर्थः आश्लेषादिक्रमं बिनैव प्रीतयो

गी·टी· धकामोद्दीपकसुरतास्तैः क्रमादैतैरत्र पश्चात्प्रातयोर्ध्वध्वानंदयो स्तनयोरित्यर्थः आश्लेषादिक्रमं बिनैव प्रीतयो

रितिवा ३७ पुनरपितांत्वरयितुं कृष्णोत्कंठामाह सभयेति हे सुमुखि सुंदरि सुजनाः सुंदरावधिः सखी कृष्णस्त्वां

५२ पद्मान्कृतार्थतां जन्मसफलत्वं समुपेतुं प्राप्नोतु कीदृशीं त्वाम् तिमिरे अंधकारसहिते पथि मार्गे सभयचकितं

भयसहितं चकितं यथा तथा शृंगाररससंभ्रमेण दृशौ नेत्रे बिन्यस्यंती क्षिपंती अनेन दृशोरलौकिकसौंदर्यं

सभयचकितं विन्यस्यंती दृशौ तिमिरे पथि प्रतितरु मुहुः स्थित्वा मंदपदानि वितन्वताम् कथ

मपि रहः प्राप्तामंगैरनंगतरंगिभिः सुमुखि सुजनाः पद्मपदस्त्वामुपेतु कृतार्थताम् ३८

कथमपि महता कष्टेन गेः

मुक्तम् कीदृशीम् मुहुर्वारंवारं प्रतितरुं प्रतिवृक्षं स्थित्वा दृष्ट्वा जेन त्रिपागमनं मम लक्ष्मा ... प दानि मंद

६ शनैः वि त न्वतीदधंती पुनः कीदृशीम् कामलतरंगैः रहः एकांतं गृहं प्राप्तां प्रांगुमुखवीतं यधुकारे प्रकाशा वहु ५२

त्वत्वमक्रैरसवदलंकारः ३८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं कविराशिषमाशास्ते राधेति देवकीनंदनश्चिरं चिरकालं त्वामवतु रक्षतु देवकीति यशोदानाम तथ
था द्वेनाम्नी नंदभार्यायाः यशोदा देवकी तथेति पद्मपुराणे कीदृशः राधामुग्धमुखारविंदस्य मधुपस्तदधराम
तपानकर्त्ता पुनः कीदृशः त्रैलोक्यस्य मौलिस्थली मुकुटस्थानं वृंदावनं तस्य नेपथ्योचितमलंकारयोग्यं नीलर
त्नं इंद्रनीलमणिरूपामरूपम् अथवा त्रैलोक्यमौलिस्थली श्रीराधा तदलंकरणमिति कीदृशः भूभारावतारां
तकः समर्थः अवनिभारांतकारा यावतारा ये राजानस्तेषामंतको नाशक इति वा कीदृशः स्वच्छंदं स्वाधीनं

राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलिस्थली नेपथ्योचितनीलरत्नमवनीभारावतारांतकः स्वच्छं
दंब्रजसुंदरीजनमनस्तोषप्रदोषश्चिरं कंसध्वंसनधूमकेतुरवतु त्वां देवकीनंदनः ॥२९॥ इति श्रीगीत
गोविंदे साकांक्षपुंडरीकाक्षो नाम पंचमः सर्गः ५

नां ब्रजसुंदरीजनानां मनस्तोषे चित्तप्रीतौ प्रदोषो रात्रिमुखं ब्रजवधूमनोरंजकश्चंद्रः रात्रिमुखे नार्यः प्रहृष्टा भ
वंति पुनः कीदृशः कंसस्य ध्वंसने मारणे धूमकेतुः पिशुनग्रहः कंसमुखं ध्वंसयतीति स्वसौदर्योदिनाम कंसध्वंस
न एव धूमकेतुरिति वा अनेन नायकवीरादयो गुणाः कथिताः कंसासुरे सुखध्वंसनकारकेपीति यादवः धू
मकेतुः स्मृतो वह्नौ विनाशस्यापि सूचक इति हलायुधः अलंकारेपि नेपथ्यं न दाशरणेपि त्रिलोचनः मुग्ध
सुंदरमूढपोरिमुमाः ॥२९॥ श्रांतासि लेकमलनयने हरमस्यागतासि सिंधुसूपं कल्पयस्व गोमाधवी नाम निकुंज इत्थं
राधां मधुरवचनैः श्रोत्रपीयूषपूरैराश्वास्यार्थी चिरपरिधितं प्रेमबानंदमस्तु हरिरिति इति श्रीगीतगोविंदमकरंदे

Dr. Urmila Sharma Collection, Varanasi

गी॰टी॰ सेवकोदीच्यावतंसश्रीशिवदासपंडितात्मजश्रीवनमालीभट्टविरचितायांवनमालिसंज्ञाविम्रांटीकायां
पुंडरीकाक्षोनामपंचमःसर्गः ५ षष्ठेकामप्रारब्धासविश्रांराधांविलोक्यताम् मवेदयत्सहचरीश्रीकृष्णं
५३ मनाह्ममम १ एवंकृष्णाभिसरणेनिरूप्यतांलतामंदिरेस्थापयित्वातच्चरितंकृष्णंप्रमाह अथेति अथैसमंत
रंभं गत्वा सखीगोविंदेविषयीकृत्यतच्चरितंश्रीराधाचरितंप्राहोवाच किंकृत्वा लतामंदिरेचिरकालमनुरक्ता
मासक्तांतांदृष्ट्वा की अनंगे. नतांतुमशक्तांचलितुमसमर्थांकीदृशे मनसिजेनकामेनमंदेव्यथितहृदये मन
सिजोमंदस्तुह्णोयस्मादितिवा मंदःखलेमंदगतौमूर्खेस्वैराल्परोगिनोरितिविश्वः हेतुर्जितालंकारः ध॰

रमनु अथतांगंतुमशक्तांचिरंक्तांलतागृहेदृष्ट्वा तच्चरितंगोविंदेमनसिजमंदेसखीप्राह ध॰ गुणक
रीरागेरूपकताले पश्यतिदिशिदिशिरहसिभवंतंतदधरमधुरमधूनिपिबंतम् नाथहरेसी
दतिराधावासगृहे ध्रुपदम् १

सत्युक्तंगीतेनप्रथयति पश्यतीत्यादिना गुणकरीरागेरूपकताले रागलक्षणम् रतोत्सुकांकांतकृतप्रतीक्षामा
लापयंतीम्दुपुष्पतल्पां रक्तलतःप्रेरितदृष्टिमात्रांगुणकरींतांमुनयोवदंति तालःपूर्ववत्ध्रुवस्यापि वासकसज्जा
प्येयम् वासवेश्मनिसुकल्पिततल्पेयासमागमविधिंविदधाना बसतिप्रियसमागमलज्जातामिहाकलयवासकसज्जा
प्यामिति हेनाथहेहरेराधावासगृहेनिकुंजमंदिरेत्वद्विरहात्सीदतिदुःखिताभवति दुःखमेवाह सारहस्येकांतेभवंतं
त्वामेवदिशिदिशिसर्वदिक्षुपश्यतिविलोकयति कीदृशंत्वाम् तदस्याः योधरस्तदेवमधुरत्वात्मधूनिअमृतानिपि

बंतंधरमोहमितिसादरेणपानंकुर्वंतम् एतेनास्याध
रमधु[illegible]मधुरत्वादपानमेवेतिनावकः त्वदधर
इतिद्योतितंत्वदृष्टोऽस्यवाचकः १

CC0. In Public Domain, Digitizagtion by eGangotri

ननुसात्वकुतोनायातितत्राह त्वदभिसरणरभसेनरसोत्साहवेगेनचलंतीकियदंतव्यमितिवारम् २ गाढंतस्थिः
ततिमूर्छयाअनेनत्वयैवतत्रगंतव्यमितिभावः कीदृशी कियंतिपदानिचलंतीत्वद्दर्शनार्थनाधिकंगंतुंपारयती
त्यर्थः तर्हिकथंजीवतितत्राह सातवरागानुलेखनेनइहतवगुणानुकथनेनवापरंकेवलंजीवति जीवनहेतुरन्यो नी
नं नास्तीत्यर्थः कीदृशी विहितांकुरांविशदाःशुभ्राविशाकिशलयमृणालसत्त्ववलयाःकंकणानियया बलयःकं
कणेपिविश्वःपल्लवःस्यात्किशलयमित्यमरः मणालंबिशमित्यपि कलाकेशाकलासुचेतित्रिलोचनः २ मुकुरवी

त्वदभिसरणरभसेनचलंतीपततिपदानिकियंतिचलंती २ विहितविशदबिशकिशलयवलयाजी
वतिपरमिहतवरतिकलया ३ मुकुरवलोकितमंडनलीला मधुरिपुरहमितिभावनशीला ४
त्वरितमुपैतिनकथमभिसारम् हरिरितिवदतिसखीमनुवारम् ५ श्लिष्यतिचुंबतिजलधरकल्पम्
हरिरुपगतइतितिमिरमनल्पम् ६

रम् २ वीक्षितोवर्हावतंसकुंडलकंकणादीनांमंडनस्यालंकारस्यलीलाविलासोयया तामेवाह मधुरिपुरहमिति
भावनेध्यानेशीलंस्वभावोयस्याः भ्रांतिनामायमलंकारः ४ एवंत्वत्संगंविनानतस्याविरहतापशांतिरित्याह हरिःका
मतापहरोपित्वरितंशीघ्रमभिसारंसुरतस्थानंकथंनोपैतिस्वयमेवकुतोनागच्छतिइतिसखींप्रतिअनुवारंवदति ५
रु अनुलक्षीकृत्यभ्रमेणस्वयमेवाह हरिरुपागतःप्राप्तइतिअनल्पंगाढंतिमिरमंधकारंमेघतुल्यंश्लिष्यत्यालिंगतिचुंब
तिच स्निग्धनीलत्वाच्चश्रीकृष्णसमानमिति ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच भवति त्वयि विलंबं विनिविलंबं कुर्वति सति गतलज्जा सा विलपति रोदिति कीदृशी वासकशय्या सुरतकुल
गी०टी० संधाना कल्प्य सम्भूहे सत्यो श्रान्तेश्रे हे पिमे दिनाकारः ९ गीतसंग्रहमाह श्री जयदेव कवेरुदितं भणितमिदं गीतर
५४ सिकजनं श्रीराधाकृष्णशृंगाररसांतःकरणं अतिशयेनानंदितं तनुतां विस्तारयतु ८ गीतार्थश्लोकसंग्रहेणाह वि
पुलेति हे कितव धूर्त्त वंचकेति वासा मृगाक्षी मृगानयनी ध्यानेनाशंका सती तवामंदकंदर्प्यचिंताकोटिकामस्मरणं

भवति विलंबे विनिविगलितलज्जा विलपति रोदिति वासकसज्जा ९ श्रीजयदेवकवेरिदमुदितम् र
सिकजनं तनुतामति मुदितम् ८ विपुलपुलकपालिः स्फीतसीत्कारमंतर्जनितजडिमकाकुव्या
कुलं व्याहरंती तवकितव विधायामंदकंदर्प्पचिंतां रससजलनिधिमग्नाध्यानलग्ना मृगाक्षी ४१

विधाय कृत्वा रसजलनिधौ शृंगाररससागरे मग्ना बभूवेति शेषः रससागरनिमग्नचेष्टितमाह विपुलाप्रचुरा पुलकानां रोमां
चानां पालिः पंक्तिर्यस्याम् पुनः कीदृशी स्फीतः समृद्धः सीत्कारो यत्र तं यथा स्यात् तथा अंतश्चित्ते जनित मुत्पादितं जडिमा जाड्यं मनं गवि
कारं यथा काकुर्याकुलं ध्वनिविकारविशेषेणाकुलं यथा तथा व्याहरंती भावनया तवकंठेरोमुन्मोचनासक्तं विचार्य वि ५४
येष्वथवा क्वं वदतीत्यर्थः भ्रमोत्थे हेवालंकृती ४१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्यानलग्नमेव दर्शयन्नंगेत्यादि हे हरेण घावरतनुः सुंदरांगी अस्त्यां गां वेति छेदः त्वया बिना निशां रात्रिं नेष्यति कथं
मयि ष्यति किंच सा अंगेषु कस्तुरणादि आभरणमलंकारं बहुशो वारम् २ करोति पत्रे पि संचारिणि चलिते सति त्वां
प्राप्तमागतं परिशंकते वितर्कयति त्वामागतं मत्वा त्वां शय्यां शयनीयं वितनुते रचयति आकल्पसंगमेमयारुदंकर्त

अंगेषाभरणं करोति बहुशः पत्रे पि संचारिणि प्राप्तं त्वां परिशंकते वितनुते शय्यां चिरं ध्या
यति इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशतव्यासक्तापि विना त्वया वरतनुर्नैषा नि
शां नेष्यति ४२ संकल्पो मानसी इतिरित्यादि

अमिति ध्यायति चिंतयति इत्यनेन प्रकारेण आकल्पो भूषणं विकल्पस्तर्कः शय्यारचना व बहुविलासशतमेतेषु व्यास
[redacted]क्तापि तल्पं च शयनीये स्यात्तल्पमट्टिकलत्रयोरिति विश्वः आकल्पो वेषे नेपथ्यमित्यमरः तर्को विकल्पः शी
काचेति संकल्पः कर्म मानसमित्यपि ४२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० टी सर्गांतेकविराशिषमाशास्ते किमिति गोबिंदस्यगिरो वाण्योजयंति कीदृश्याः संध्याकालीनातिथिस्वागतादि
५५ स्तुतिबचनंगर्भेषुयासां ताः केचिन्नंदग्रामस्याराधायाबचनंत्र्यध्वगमुखाकुल्वानंदतिहर्षंप्राप्नुवंतिमुकुंदार २ व
चनमेवाह हेभ्रातःपथिकमांडारस्मिमारूहिभांडारवटेकिंविश्राम्यसि विश्रामंमाकृथाः विश्रामाज्ञावेहेतुमाह

किंविश्राम्यसिकृष्णयोगिनवनेभांडारस्मिमारूहिभ्रातर्यासिनदृष्टिगोचरमितःसानंदनंदास्पदम्
राधायाबचनंतदध्वगमुखान्नंदंतिकेचि[illegible]न्मुकुंगोविंदस्यजयंतिसायमतिथिप्राज्ञास्यगर्भागिरः ५३

कृष्णस्ययोगिनःस्वनेसंयोगमंदिरे किंच आनंदसहितंनंदगृहंकिमितिइतोनयासि तच्चदृष्टिगोचरंसंनिहितमे
व शून्यगृहस्यागेनमहत्फलातिथ्येनचकृतार्थोनभविष्यतीतिभावः व्याजोक्तिरलंकारः ५३ ५५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यावन्नमासाद्यतुनवांगसंगलावद्दथैवाथपरिश्रमोस्याः ध्यानेनकिंहंतमुहुःसरस्याल्लछोपश्चाम्यत्यनुपानसाध्ये
ति १ इतिश्रीमत्कृष्णचंद्रसेवकोदीव्यावतंसश्रीशिवदासपंडितात्मजश्रीवनमालिभट्टविरचितायांवनमालिसंज्ञि
विम्यांश्रीगीतगोविंदटीकायांवासकसज्ज्याख्यावर्णनेषष्ठःसर्गः ६ अभिसारिकाभिसरणप्रस्तुहमलिनद्युतिः श्रो
स्त्राभिसारंकलयत्विंद्रहजतासप्तमे १ एवमुनयोरनुरागंनिरूप्यरसांतरंप्रकटयन्चंद्रदर्शनराधाविरहमाह श्र

इतिश्रीगीतगोविंदेमहाकाव्येवासकसज्जावर्णनेषष्ठःसर्गः ६ अत्रांतरेचकुलटाकुलवर्त्म
पातसंजातपातकइवस्फुटलांछनश्रीः वृंदावनांतरमदीपयदंशुजालैर्दिक्सुंदरीवदनचंदनबिंदुरिं
दुः ४४

त्रांतरेत्यादि अत्रांतरेऽस्मिन्कृष्णविलंबे इंदुश्चंद्रोंशुजालैः किरणसमूहैः वृंदावनांतरमध्यमदीपयत्प्रकाशित
वान्कामदीपिंचकारेतिवा कीदृशः दिशएवसुंदर्योनायिकास्तासांवदनेचंदनस्यबिंदुस्तिलकः अथवा दिक्सुंदरीश्री
राधातद्वदनेचंदनबिंदुः कीदृशः स्फुटाव्यक्तालांछनस्यकलंकस्यश्रीःशोभायस्य कीदृशइव कुलटाकुलस्याभिसारि
कासमूहस्यवर्त्मपातेनसंकेतमार्गप्रतिरोधनेनसंजातमुत्पन्नंपातकंयस्य तादृशइव इंदुःकुमुदबांधवश्चंद्रमाः चिह्न
लक्ष्मचलांछनमित्यपि किरणोस्रमयूखांशुरिति ४४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी एवंविप्रलंभरसमुक्त्वाविप्रलंभहेतुंप्रपंचयति प्रसरतीति साराधोच्चैरत्यर्थंपरितापंश्रीकृष्णाऽनागमनवि
५६ रहदुःखंचकार कीदृशम् विरचितः कृतो विविधोनानाप्रकारोधूर्त्तशठवंचककासीत्येवंरूपोगुणकीर्त्तनरूः

प्रसरतिशशधरबिंबेविहितविलंबेचमाधवेविधुरा विरचितविविधविलापंसापरि
तापंचकारोच्चैः ४५

पोवाविलापोयत्र कद्दृशीनायातोधूर्त्तइतिविधुराविह्वला कस्मिन्सति शशधरबिंबेचंद्रमंडलेप्रसरतिनिर्गच्छ
ति माधवेराधाधरप्रियेबसंतप्रियेवाविहितविलंबेकृतविलंबेचसति ४५ ५६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वं यथा श्रीकृष्णः किं गृहेन धनेनेति कृतवान् तथा श्रीराधापि कृतवतीति निरूप्यते किंचोक्तं विलापमेवद
र्शयति कथितेति विप्रलब्धा नायिका यं प्रेष्य दूतीं स्वयं गत्वा संकेतेनागतः प्रियः यस्मात्तेन विना दुःस्थाविप्र
लब्धा तु सा मतेति गौडामालवरागे प्रतिमंठताले इहास्मिन्समये निजनिर्वाने होकरताडनेन कंजनं प्रतिशरणे
यामि कंजलं वा प्रविशामि किं विशिष्टा हं सखीजनवचनैः श्रीकृष्णः शीघ्रं स्वयमेवागमिष्यतीति वंचितापृता॥

गौडामालवरागे प्रतिमंठताले कथितसमयेपि हरिरहह न ययौ वनम् ममविफलमिदममल
रूपमपि यौवनम् यामि हि कमिह शरणं सखीजनवचनवंचिता १ ध्रुपदम् यदनुगमनाय नि
शि गहनमपि शीलितम् तेन मम हृदयमिदमसमशरकीलितम् २

ता वंचनमेवाह अहह इति विदेहरिः कथितसमयेपि निविडांधकाररूपे संकेतास्थ्ये वा वनं न ययौ नाजगाम
तदागमनं विना इदं मम यौवनममलं सुंदररूपं स्वरूपमपि विफलं निरर्थकम् ध्रुपदम् कः पावके चमस्खेवं
सुखं शीर्यं न लेभु चेति विश्वः शरणं गृह रक्षित्रोरित्यमरः विरोधोक्तिरलंकारः १ किंच यस्य श्रीकृष्णस्यानुगम
नाय अन्वेषणाय सुरतेन संतोषयितुं निशि रात्रौ गहनमपि निर्जनवनमपि मया शीलितं सेवितमनुभूतं वा ते
न श्रीकृष्णेन निमित्तभूतेन मम देहहृदयमसमशरेण कामेन वा णेन कृष्णागमनाशावा तकीलितं वद्धं ७

Dr. Urmila Sharma Collection, Varanasi

गी०टी० एवंश्रीकृष्णेनवंचितायाममममरणमेववरंश्रेष्ठंमरणेबिरहानलाभावात्. किंच अहंकिमितिविषहामिबिरहा
नलंसहामि कीदृशपदम् अतिवितथकेतनाअतिशायेनवितथंमिथ्याभूतंगृहंशरीरंवायस्याः कीदृशी. अचेतना
५१ श्लो· ज्ञानशून्याश्रीकृष्णागमनप्रत्याशारहितत्वात् वितथत्वन्तेयथार्थहेमःकेतनंलांछनेशृंगोगोत्रेगेहोपमंत्रणइति॰
विश्वः चेतनंरूपदेशोऽस्यास्साशायांचचेतनमित्यपि विरोधोक्तिरलंकारः ३ किंच अहहेत्याश्चर्येमधुरमधु.

ममरणमेववरमतिवितथकेतना किमितिविषहामिबिरहानलमचेतना ३ मामहहविधु
रयतिमधुरमधुयामिनी कापिहरिमनुभवतिकृतसुकृतकामिनी ४ अहहकलयामिवलया
दिमणिभूषणम् हरिविरहदहनवहनेनबहुदूषणम् ५

यामिनीमनोज्ञावसंतरात्रिःपरमानंदप्रदापिमांविधुरयतिविह्वलयति कापिकृतसुकृतकामिनीकृतपुण्य
पुंजाकांताहरिंश्रीकृष्णमनुभवतिभुंक्तेभजतेवा अथवा कापिमादृशीसुकृतंश्रीकृष्णालिंगनादिपुण्यंययाता
दृशीकामिनी इदानींनताहमिविधाहमितिक्लेशमेवानुभवामीतिभावः इयमुन्मादावस्थासंभवति ४ किंच
अहहइतिखेदेःहंवलयादिमणिभूषणंकंकणाद्यलंकारंकलयामिधारयामि कीदृशम् हरिविरहदहन ५०
वहनेनकृष्णबियोगवह्निधारणेनबहुदूषणमतिशयपापाचारम् प्रियदर्शनेस्त्रीणांशृंगारसाफल्यमिति
भावः ५

CC0. In Public Domain, Digitizagtion by eGangotri

तद्दूषणमेवाह नकेवलं हरिविरहो दहति खकरकृतास्मगपिमाला हृदि कृताप्यतनुशरलीलया तं गवाण विलासेन मां दहति कीदृशी पुष्पवत्कोमलदेहाम् कीदृश्या अतिशयेन विषमं दारुणं शीलं स्वभावो यस्या वज्र दपि अतिकठोरेति भावः पुष्पं प्रसूनं कुसुमं सुमनो मगजीवनमिति रत्नाकरः ६ इहनिकुंजे हं तदागमनायन निवसामि किं वसाम्येवतथापि मधुसूदनो मम माधरपानकर्त्ता मां चेतसा चित्तेनापि न स्मरति कीदृश्यहम् गणिता

कुसुमसुकुमारतनुमतनुशरलीलया स्रगपि हृदि हंति मामतिविषमशीलया ६ अहमिहनिवसामि नगणितवनवेतसा स्मरति मधुसूदनो मामपि न चेतसा ७ हरिचरणशरणजयदेवकविभारती वसतु हृदि युवतिरिव कोमलकलावती ८

परिसंमोताः श्रीकृष्णान्वेषणाय वनेन [illegible] सालतायया ७ किंच हरीति हरिचरणौ शरणं [illegible] तीवाणीसरस्वती [illegible] मो हृदि वसतु कव कामिनीयुवतिरिव कीदृशी सुकुमारांगी चतुःषष्टिकामकलाकुश लावा आरम्भविशेषणं वा कोमलकलायुक्ता यथा युवतिःप्रणयकलहादिना शोभावती भवति तद्वदत्रापि भारती कोमलसुखोच्चारणादिनेति भावः ८

Dr. Urmila Sharma Collection, Varanasi

गी०टी० एवंविप्रलब्धाहरौनानाशंकांजनयंतीतर्कमाह तदिति कांतःश्रीकृष्णःसंकेतीकृतमतिदारुणस्थलंसंपादितःमेजुर्मनोहृ
रःवंजुललताकुंजेवेतसलतामंदिरेयद्यस्मात्क्रीडार्थंनागतःतत्तस्मात्किंवाकामापिकामिनीकामातुरांकमनायोवाभिम
५८ तःसन्मुखंगतोवा किंवाःबलाकेलिभिर्व्रजयुवतिहास्यादिक्रीडाभिर्वशोयंत्रितः किंवाबंधुभिर्मित्रैःकार्यांतरेप्रेरितः
स्वयंविचार्यहेत्वंतरमाह अथवाकारिणिनिबिडांधकारेवनोपांतेवनसमीपेप्यर्णेनिकटेवाभ्राम्यतिउपांतेवापावः
कादृशःक्लांतमद्वियोगेनदुःखितंमनोयस्य पुनःकीदृशः मनागप्यल्पमपिपथिमार्गेप्रस्थातुंमार्गंतुमक्षमःअसम

तत्किंकामपिकामिनीमभिसृतः किंवाबलाकेलिभिर्बद्धोबंधुभिरंधकारिणिवनेप्यर्णेकिमुद्भ्राम्यति कांतः त्न
क्लांतमनामनागपिपथिप्रस्थातुमेवाक्षमःसंकेतीकृतमंजुवंजुललताकुंजेपियन्नागतः ४६ अथागतांमा
धवमंतरेणसखीमियंवीक्ष्यविषादमूकाम् विशंकमानारमितंकयापिजनार्दनंदृष्टवदेतदाह ४७

र्थः ततोविलंबइतिभावः वितर्कैःसमयेक्षेपेकिमुसंकीर्यतेवुधैरितिधरणिः ४६ एवंबहुविधावितर्कयंतीसखीमाह अथे
ति अथानंतरंइयंराधाहृष्टवत्स्वदृष्टार्थमिव एतद्वक्ष्यमाणंसखीमाहउक्तवती। किंकृत्वामाधवमंतरेणश्रीकृष्णंविनागतांवीक्ष्य
दृष्ट्वा कीदृशीम् विषादमूकांदुःखातिशयेनवक्तुमसमर्थाम् कीदृशीम् जनार्दनंकयापिनायिकयारमितमितिविशंकमानाशं
कांप्राप्ता जनार्दनस्यविरहिजनसंतापकत्वमुचितमितिच्छायार्थः अर्दधातुर्हिंसार्थेजनानर्दयतीति ४७ ५८

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टार्थं गीतेनाह स्मरेति वसंतरागे एकतालीताले रागालक्षणमुक्तमेव हे सखि कापि युवतिर्व्रजवधूर्मधुरिपु
णाश्रीकृष्णेनसहविलसति क्रीडातीति कीदृशी अधिकगुणामत्तो धिकाः रूपकुलशीलसौंदर्यादयोगुणायस्यामधिलाममं
दिरागमनोत्कण्ठितमपि श्रीकृष्णस्वगुणैराकृष्यान्यत्रनीतमितितद्गुणाधिक्यंसूचितम् कीदृशी स्मरसमरेकामसंग्रामेउचि
तोयोग्योबिरचितः कृतोवेषोलंकारस्रक्चंदनसंभोगादिर्ययासा विदग्धमुग्धस्वच्छंदविवेतितिध्वनिः अथवास्मरसमरोचितो
बिरचितः कृतः श्रीकृष्णेनवेषोयस्याःसा अलंकारविधानेनैवकृतस्मरसंग्रामायाश्चिह्नमाह गलितकुसुमैः पतितपुष्पैर्द

वसंतरागे एकतालीताले स्मरसमरोचितविरचितवेषा गलितकुसुमदरविलुलितकेशाकापिमधुरिपुणा
विलसतियुवतिरधिकगुणा ध्रुपदम् हरिपरिरंभणवलितविकारा कुचकलशोपरितरलितहारा २ विचलद
लकललिताननचंद्रा तदधरपानरभसकृततंद्रा ३

रंबिलुलिताइषच्चलिताःकेशायस्याः १ पुनःकीदृशी हरिपरिरंभणेनश्रीकृष्णालिंगनेनवलितोजातोविकारोनंगोवे
धोयस्याः कीदृशी कुचकलशयोरुपरितरलितश्चंचलोहारोमुक्ताहारोयस्याः तरलितइत्यनेनालिंगनंसूचितम् कल
शशब्देनानंगोत्सवायमंगलस्थूलत्वंचेतिध्वनिः २ कीदृशी विचलद्भिः कंपमानैरलकैश्चूर्णकुंतलैर्ललितोमनोहर
आननचंद्रोमुखमेवचंद्रोयस्याः कीदृशी तस्यश्रीकृष्णस्याधरपानरभसेनवेगेनकृतातंद्रासुरतसुखानुभवरूपा चक्षु
र्निमीलनंवाययाएतेनतदधरामृतपानेनैवमूर्छितेतिध्वनिः रसमोद्वेगनत्माहइसमरः ३

Dr. Urmila Sharma Collection, Varanasi

गी०टी० पुनः कीदृशी हे धूर्त लुंठक वंचक ज्ञातोसीति कथयन् शिरःकंपनेन क्रीडावशेन वा चंचलाभ्यां चपलाभ्यां कुंडलाभ्यां ललि च
५९ तौ सुंदरौ कपोलौ यस्याः कीदृशी मुखरिता शब्दायमाना रसना क्षुद्रघंटिका यत्र जघने तस्मात् गतागतेन लोला चंचला यस्याः
सा इत्येतैः पदैः सुरतविपरीततोक्तेति भावः ४ पुनः कीदृशी स्वयं पुरुषायितमाचरंत्यधःस्थितस्य दयितस्य बहुलसस्य निरी
क्षणेन स्वपुरुषायितविस्मरणेन तदाचरणेन वा यद्धसितं तेन लज्जिता संजातलज्जा कीदृशी बहुविधं शिखि कलहं

चंचलकुंडलललितकपोला मुखरितरसनजघनगतिलोला ४ दयितविलोकितलज्जितहसिता ब
हुविधकूजितरतिरसरसिता ५ विपुलपुलकपृथुवेपथुभंगा श्वसितनिमीलितविकसदनंगा ६

सादीनां नानाप्रकारकूजितं यत्र ताद्दशेन रतिरसेन क्रीडारसेन रसिता संजातरसा हृष्टेत्यर्थः एतेन तस्या रसनिमग्नत्वमिति भावः
रसितं शब्दितं हृष्टइति विश्वः ५ पुनः कीदृशी विपुलः प्रचुरः पुलको रोमांचः पृथुर्महान् वेपथुः कंपस्तस्य भंगास्तरंगा यस्याः सा निमी०टी०
सुरतांबुधौ रोमांचकंपयोस्तरंगसाम्यम् कीदृशी श्वसितः सुरतायासजनितो निश्वासः निमीलितपरमाह्लादजनितं नेत्रं ताभ्यां ५९
विकसदाविर्भवदनंगः कामो यस्याः सा। अन्योन्यग्रिथौ युसंसर्गं प्राप्य विकाममेति तद्दशा पि इति भावः निमीलितेत्यनेनव्यु
तिकालः संसूचितः ६

पुनः कीदृशी सुरतश्रमजलकणान्तरेणाधिक्येन सुभगं मनोज्ञं शरीरं यस्याः सा इत्यनेन सात्त्विकगुणोदयः सूचितः कीदृशी
सुरतश्रमाज्जृम्भणशीला कुसुममालिग्पोरसि वक्षःस्थले पतिता निःसहत्वेचातुर्येनाच्छादितमितिभावः कीदृशी रतिरणे सुरत
संग्रामे धीरा चतुरा कुशला वा स्थिरा मंदा वा परिपतितोरसा तिहंसलीलकोबंधश्चकथितः नारीपदद्वयं दत्वा कांतस्योरु
गोपरि कटिमांदोलयेदाशु बंधो यं हंसलीलक इति धीरः पंडितमंदयोरितिविश्वः सुमनाः सुंदरश्चेते लवलेशकणाणव इत्य
मरः ७ श्रीराधावर्णितं हरिरमितं सर्वजनपावनत्वेन निरूपयन् प्रार्थयते श्रीजयदेवेति श्रीयायुक्तेन जयदेवेन भणितं क ५६
थितं यद्धरेः रमितं विपरीतरतौ क्रीडितं कलेः कलुषं वासनात्मकं परदारादिरूपं वान्यत् अंतरायरूपं वा पापं रिशमितं सर्वेषां

श्रमजलकणभरसुभगशरीरा परिपतितोरसि रतिरणधीरा ७ श्रीजयदेवभणितहरिरमितम् कलिकलुषं जनयतु
परिशमितम् ८ विरहपांडुमुरारिमुखांबुजद्युतिरयं तिरयन्नपि वेदनाम् विधुरतीवतनोति मनोभुवः सुहृदये हृदये मद
नव्यथाम् ४१

तिं जनयतु करोतु अन्यत्रौपचारिकं रमणं श्रीराधायाः पारमार्थिकमितिभावः ८ चंद्रदर्शनक्लेशेन स
खीं प्रति वृत्ते विरहेति अयि इति खेदे अयं विधुश्चंद्रो मम हृदये सुहृदिव श्रीकृष्ण इव अतिमदनव्यथां तनोति अतिकामपीडां
विस्तारयति कीदृशः मनोभुवः कामस्य सुहृन्मित्रं अथवा मदनस्य व्यथां करोति मम कावार्त्ते तिभावः कीदृशः विरहेन वि
योगेन पांडुवत् मुरारिमुखांबुजं सदृशा द्युतिः समानकांतिः कीदृशः वेदनां ज्ञानं तिरयन्नपि हरन्नपि वेदना ज्ञानं दुःखयो
रितिविश्वः अये क्रोधे विषादे च संबुद्धौ स्मरणे चेति विश्वः तिरोतर्द्धौ तिर्यगर्थे इति वा विधुः सुधांशुरित्यमरः पीडा बाधा व्य
थादुःखमित्यमरः ४१

ता ३

गी० टी० पूर्वोक्तं गीतेन कस्याश्चिद्विपरीतरतमुत्कामसखी तस्या एव नायककृतां क्रीडामाह समुदितेति ध्रुव रागतालानां लक्षणमु
क्तमेव स्वाधीनभर्तृकेयम् तस्याः लक्षणम् यस्यारतिगुणाकृष्टः पतिः पार्श्वं न मुंचति विचित्रविभ्रमासक्ता स्वाधीनभर्तृ
६० कायथेति हे सखि अधुनाऽस्मिन्नेवावसरे यापूर्वं मधुरिपुणा रमितामेव विजयी व्रजयुवतिपूगजयेनानंगजयेन वासक ८
लसौंदर्यादिगुणजयेन वा निःशंककृतकलक्षणो मुरारिः श्रीकृष्णो यमुनापुलिनवने कृष्णातीरवने रमत इति विरोधोक्तेः
किं रमते पितृनमद्विरहाग्नि संतप्तो यमुनातीरवनं सेवत इति भावः कीदृशे वने समुदित न पचितो मदनः कामो यत्र

गुर्जरीरागे एकतालीताले समुदितमदने रमणीवदनेचुंबनवलिताधरे मृगमदतिलकंलि
खति सपुलकं मृगमिव रजनीकरे रमते यमुनापुलिनवने विजयी मुरारिरधुना ध्रुपदम्

कीदृशे वने रमणीयायास्तवैव वदनं पुरा भिवादनं यत्र कीदृशे वने चुंबनाय बलितोनुकूलीकृतः पुरा तवैवाधरो यत्र
तत्रैव वने रमणीवदने व्रजयुवतिमुखे ध्यानप्राप्ते तन्मुखे वा सपुलकं रोमांचसहितं यथा मृगमदतिलकं तवध्यानेन
तस्याः साक्षाद्वालिंगपलिखति कीदृशे वदने समुदितः समुचितो मदनः कामो यत्र कीदृशे चुंबनेन वलितश्चिबुक·
मृदुरसे कोचित अधरो यत्र कस्मिन्कमिव रजनीकरे चंद्रे मृगमिव मुखस्य चंद्रसाम्यं मृगस्य तिलकसाम्यम् वलि ६
तसेविते विस्पष्टं चुंबनाकुंचने पिचेति विश्वः यमुनातु यमस्वसा समरः १

CC0. In Public Domain, Digitizagtion by eGangotri

पुनरपि तामेव वर्णयति घटयतीत्यादि कुचयुगगगने स्तनद्वयोत्तुंगे अमलमुज्वलं मणिसरं मुक्ताहारं तमेव तारक
पटलेन नक्षत्रसमूहं घटयति योजयति आकाशस्थाने आमत्र निर्मिति कीदृशे सुघने निबिडे समांसले वा पुनः की-
दृशे मृगमदरुचिरूषिते कस्तूरीदीप्तिलिप्ते कुचयोराकाशस्य मृगमदलिप्तयोः पयोधरत्वेन मणिसरस्य नक्षत्रस
मूहत्वेन च साम्यमित्यस्येत्तारूपकालंकारः कीदृशे नखपदं नखक्षतं तदेव शशी तेन भूषिते लंकृते नखचिह्नसा

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते मणिसरममलं तारकपटलं नखपदशशिभूषिते
२

ईंदुसाम्यम् तद्यथा सायके अर्द्धेंदुशशांकाशामिंदासिते रीर्द्धेंदुसंज्ञं कथितं समासादिति घनः सांद्रे दृढे दार्ढ्ये विस्तारे लोहमुद्गरे
ति विश्वः अग्निभेदो स्याहार्यांश्च गगनस्तो च रुचिः स्त्रियामिति धरणिः नक्षत्रे चाक्षमध्ये च तारकाप्यचेति विश्वः सुघनं निबिडे
प्रोक्तं विशाले दृढसारक इति वैजयंती हारो मणिसरो मुक्ताकांचनादिविनिर्मितश्च समूपिच समूहे पटलः पुंजामेदपातिभेषे
२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क

गी०टी० किंच घनेति श्रीकृष्णः संप्रतिध्यानेनतवसमाने तस्याश्चिकुरे जाताविकबचनं केशेषु कुरबकं कुसुमं श्रेणिमम्लान॰
६१ पुष्पं रचयति रचनाविशेषं करोति कीदृशे मेघसमूहवत्मनोहरे अन्यथा सहासमणमाश्लोक्य किमर्थं खेदं प्राप्स
सीतिध्वनिः कीदृशम् चपलावत् विद्युद्वित्सुषमा शोभा यस्य तत् यथा मेघे विद्युद्भाति तथा चिकुरे कुसुमानी

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने कुरबककुसुमं चपलासुषमं रतिपतिमृगकानने २

तिभावः कीदृशो रतिपतिः कामः स एव मृगः तस्य वने यथा कानने मृगास्तथा चिकुरे कामस्तस्याः करचरणादिषु॰
कामः किमु वक्तव्यमिति पुनः कीदृशे तरलितानि चंचलीकृतानि तरुणानामाननानि श्रीकृष्णस्य वा येनयास्मि ६१
न्वा २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच जितेति श्रीकृष्णस्तस्यामृदुभुजयुगले कोमलबाहुयुग्मे मरकतवलयं इंद्रनीलमणिखचितकंकणमेव भ्रमर
समूहं वितरत्सर्प्पयति एतेन मरकतवलयस्य भ्रमरसमूहत्वेन भुजयुगलसौरभ्याधिक्यं सूचितमिति कीदृशे जितमभि
भूतं निजसंमर्द्दनेन गौरवतया वा बिसशकलं मृणालसमूहो येन कीदृशे हिमादपि शीतले विरहसंतापहारित्वात् की
दृशे करतलमेव कमलिनीदलं यत्र कंकणे वलयो मत इति: ४ किंच रतीति श्रीकृष्णः रतेः सुरतशृंगारस्य वा गृहे जघ

जितबिसशकले मृदुभुजयुगले करतलनलिनीदले मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ४
रतिगृहजघने विपुलापघने मनसिजकनकासने मणिमयरसनं तोरणहसनं विकिरति कृतवासने ५

नेनितंबे मणिमयरसनं मुक्तामयीं मेखलां विकिरत्सर्प्पयति कीदृशाम् तोरणस्य बंदनमालिका याहसनं निंदनमृयत्र
राज्ञि सिंहासनोपविष्टे वंदनमालिका वध्यत इति भावः कीदृशे विपुलापघने महत्तरसमांसले पुनः कीदृशे कामस्य
सुवर्णासने एतेन गौरवत्वमतिशयेन सूचितमिति कीदृशे कृते कामेन वासनं निवासो वसं वा सुगंधो वा यत्र श्रोणिप
तिकोवयवो जघनो थकलेवरमित्यमरः वासनं बसने वाथस्याने याने च धूपन इति विश्वः ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० टी० किंच चरणेति श्रीकृष्णश्चरणपल्लवे यावकभरणं अलक्तकपूर्णं जनयति करोति तस्याल्लवदक्षो नार्थम् कीदृ-
६२ शे हृदि योजिते नंदसूनुना सुन्दरामतिशयेन तव प्रेमातिशयाय स्वहृदयं प्रापिते हृदि तच्चरणं धृत्वा यावकं स्वयत्न

चरणकिसलये कमलानिलये नखमणिगणपूजिते बहिरपवरणं यावकभरणं जनयति हृदि योजिते ६

सर्थः कीदृशो हृदि कमलायाः लक्ष्म्याः श्रीराधाया निलये मंदिरे कीदृशो नखा एव मणिसमूहास्तैः पूजितेऽलंकृते
कीदृशम् बहिर्भूतमपवरणमावरणं यस्य स्पृहामि सर्थः अलक्तकालंकारेण तवानुरागो बहिः स्फुरं जनित इति ६२
भावः ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच हे सखि खलार्थे हलं धारयतीति तस्य सहोदरे भ्रातरि निर्दयं न खलु हतकर्तुः सहोदरे सदृशो कामपि नापि कां
लां दृशी सुदृशां शोभनं याहं मम एः मतिशायेन रमयति स तिरिह बिटपोदरे धूर्ते लतानिकुंजे अफले निःप्रयोजनं बिर
संरसरहितं यथा तथा चिरं बहुकाले किं अवसं किमर्थमुषितासि बद कथय मौनं त्यक्त्वा तत्संतोषार्थं गमनं प्रति

रसंत्र

रमयति सुदृशां कामपि सुदृशां खलहलधरसोदरे किमफलमवसं चिरमिह बिंदसखि विटपोदरे ७ इह
रसनणे नेकृतहरिगणने मधुरिपुपदसेवके कलियुगचरितं न वसतु दुरितं कबिनृपजयदेवके ८

सानुकूल वाक्यं कथयेत्यर्थः बिटपो ह्येलवणे धूर्ते मूर्खके च दिरेपि चेति बिश्वः ७ गीतफलमाह इहेति इहकाव्य
कर्त्तरि कवीनां नृपे कविराजे जयदेवके कलियुगस्य चरितं दुरितं पापं न वसतु न तिष्ठतु कीदृशे रसस्य श्रीराधाकृष्णशृंगा
वर्णनं रस्य नणनं कथनं यत्र कीदृशे कृतं हरेर्गुणनं सौंदर्यादिपरिसंख्यायेन कीदृशे मधुरिपोः श्रीकृष्णस्य चरणसेवके

मधुकलनपरंवृंद ८

Dr. Urmila Sharma Collection, Varanasi

गी० टी० एवमन्यव्रजयुवतीरमणोत्कर्षं शङ्कित्वा संजातनिर्वेदा दूतीमाश्वासयन्त्येवाह नायात इति हे सखि हे दूति दौत्यकर्मकु
६२ शले यदि निर्दयो मद्दयाशून्यो त एव शठो धूर्त्तः कुण्ठितानुरागो निगूढापराधो वा नायातो नागतस्तर्हि त्वं किं दूयसे वृथा सं
तप्यसे किंच बहुवल्लभो पि स्वच्छन्दं रमते अनागमने हेतुमाह बहुवल्लभो बह्वीनां वल्लभः प्रियो वल्लभो वल्लभजायस्येति वा
तदानयने तव किं दूषणं को ऽपराधो सामर्थ्यात् ननु तत्तुल्यागोदमुदितामिवाह पश्याद्येति इदं मच्चेतः प्रियस्य व

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम् पश्याद्य प्रि
यसंगमाय दयितस्याकृष्यमाणं गुणैरुत्कंठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥८॥

ल्लभस्य श्रीकृष्णस्य संगमाय मिलनाय आलिंगनाय वा अद्य शीघ्रं स्वयमेव वा यास्यतीति पश्य जानीहि कीदृशम् दयित
स्य प्रियस्य गुणैः सौंदर्यादिभिराकृष्यमाणं वशीकृतम् पुनः कीदृशम् उत्कंठया प्रियदर्शनेच्छया या आर्तिर्मनःपीडा त
स्या भराद् आधिक्यादिव स्फुटत् बहुधा भवत् द्विधा भवदिति वा अपरमपि वस्त्वन्तरसंकुले स्थाने स्थितं वस्तु सांकर्याद् द्विधा
भवति स्फुटति अनेकधा भवति च एतेन श्रीकृष्णगुणानां प्राणहारित्वमुक्तमिति भावः नातः परं त्वया तदानयनायासः क ६३
र्त्तव्य इति ॥८॥

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रगतमपिचेतःसंतप्तमेवनविघ्यतातथाह अनीति अक्रीडितायास्तुदुःखंसमुचितमेवक्रीडितायाःक्लेशोपप्लव
नंमद्वियोगाश्रुजलेनमालिनाहेसखियावनमालिनारमिताक्रीडितासाकिशलयशायनेनमदुपल्लवतल्पेननत
पतिनसंतप्तान्नवतिअपितुन्नवसेवकुतःसंयोगानंतरंविरहत्राकयानुभूतरसोतिदुःखप्रदोन्नवतासरमितावने
रारूपमागता कीदृशेनवनमालिना अनिलेनवायुनातरलंचंचलंपल्लवलयंकमलंतद्वन्नयनेनेत्रेयस्यतेन अस्मिन्
गीतेसंभोगवियोगौज्ञातव्यौ रागतालध्रुपदंपूर्ववत् १ किंच विकशितेतियारमितावनमालिनेतिसर्वत्रयोज्यम् सामन

देशाखरागेरूपकताले अनिलतरलकुवलयनयनेन तपतिनसाकिशलयशयनेन सखियारमितावनमालिना
ध्रुपदम् १ विकसितसरसिजललितमुखेन स्फुटतिनसामनसिजविशिखेन २ अमृतमधुरतरमृदुवचनेनज्व
लतिनसामलयजपवनेन ३ स्थलजलरुहरुचिकरचरणेन दहतिनसाहिमकरकिरणेन ४

सिजविशिखेनकामवाणेननस्फुटतिविदीर्णान्नवतिअपितुन्नवसेवेत्यादि [redacted] पूर्ववत्एवंसर्वत्रयोज्यम् कीदृशेनवनमा
लिना विकशितंप्रफुल्लंयत्सरसिजंकमलंतद्वल्ललितंमनोहरंमुखंयस्यतेन २ किंच अमृतेति अमृतादतिमधुराणिमनो
ज्ञानिमृदुतराणिअतिशायेनकोमलानिवचनानिभाषणानियस्यतेनरमितापिसा मलयजपवनेनचंदनवायुनानज्वल
तीतिपूर्ववत् संभोगेवियोगेचज्वलत्येव अनेननायकस्यप्रियवचनादयोगुणानिरूपिताः ३ अपिचस्थलजलरुहा
णांस्थलकमलानांजलकमलानांचरुचिरिवदीप्तिर्येषांतादृशाःकरचरणायस्यतेनश्रीहृष्णेनरमितायासा हिमकरकिर
णेनचंद्रकिरणसमूहेननदहतिअपितुदहत्येव जलरुहंकामस्यबाणस्तेनैवध्वनितम् ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी०
६५

किंच सजलेति सजलजलदस्य सोदकमेघस्य समुदयस्तद्वद्रुचिरेण मनोहरेण वनमालिना रमिता सा हृदि विरह
स्मरेण न दलति अपितु विदीर्णहृदया भवत्येव अनुक्रीडितायाः कथं विरहस्तत्राह विप्रयोगसमयत्वात्सजलेक्ष
णेन श्रीराधाविरहाकुलीकृष्णस्याश्रुपात इति भावः ५ किंच कनकनिकषस्य सुवर्णतेजनपाषाणस्य रुचिरिव रुचिर्दी
प्तिर्यस्य तादृशं शुचि निर्मलं वसनं वस्त्रं यस्य तेन वनमालिना या रमिता सा परिजनहसनेन सखीजनपरिहासवाक्येन
न श्वसिति अपितु निश्वासं करोतीति वसनमिति श्रीराधांगदीप्तिसादृश्यपीतांबरधारणं न तु मंडनार्थमिति भावः

सजलजलदसमुदयरुचिरेण दलति न सा हृदि विरहभरेण ५ कनकनिकषरुचिशुचिवसनेन श्व
सिति न सा परिजनहसनेन ६ सकलभुवनजनवरतरुणेन वहति न सा रुजमतिकरुणेन ७

तद्यथा पीतांबरं किमिति नंदसुतो बिभर्त्ति नीलांबरं किमिति भानुसुता बिभर्त्ति मन्ये दिनेपि निजजीवनधारणार्थं
मालिंगनं कलयतो वसनछलेनेति शृंगारः शुचिरुज्ज्वल इत्यमरः शुचिः शुद्धेनुपहत इति विश्वः निकषः कषपट्टि
केति हारावली ६ किंच सकलभुवने चतुर्दशलोके ये जनास्तेभ्योपि वरेण सुंदरेण श्रेष्ठेन वा तरुणेन च सकलभुव
नैयः श्रीराधाख्यो जनो वरः श्रेष्ठस्तरुणो वा यस्य तेन वनमालिना या रमिता सा रुजं पीडां न वहति न धारयति अपितु
धारयत्येव कीदृशेन अतिकरुणेन दयातिक्रांतेन निर्दयेनेत्यर्थः कीदृशी सा अतिकरुणरसेनोपलक्षिता वा अ ६५
स्यां संभोगो वियोगश्च निर्बाहितः करुणस्तु रसे दृश्ये रूपायां करुणामतेति विश्वः ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवभणितं यद्वचनं गीतरूपं तेन अनेन हरिर्मनोहरः संतापहारी वा श्रृण्वतां गायतां श्रीराधायाश्च पिहृदयं
प्रविशतु प्रवेशं प्राप्नोतु ८ एवं सखीवचनेन विस्मृतप्रियदोषा मलयानिलमुपालभते प्रार्थयते च मनोभवेति हे मनो
भवानंदप्रद चंदनानिलमलयसमीर त्वं प्रसादं प्रसादं कुरु रे स्माक्षेपसंबोधने दक्षिणवामतां प्रतिकूलं मुंचदा॰ ६

श्रीजयदेवभणितवचनेन प्रविशतु हरिरपि हृदयमनेन ८ मनोभवानंदनचंदनानिल प्रसीद रे
दक्षिणमुंचवामताम् क्षणं जगत्प्राणनिधाय माधवं पुरो मम प्राणहरो न विध्यसि ९

हे संवारय हे जगत्प्राण विश्वप्राणभूत माधवं श्रीकृष्णं क्षणं क्षणमात्रं पुरोऽग्रे निधाय कृत्वा मम प्राणहरो न विध्यसि प्रा
णोत्क्रमणसमये श्रीकृष्णदर्शनमतिदुर्लभमिति जगतां प्राणहेतुस्त्वमत उचितं न वेति भावः वामे सव्ये प्रतीपे च दक्षिणे
चातिसुंदर इति विश्वः धए

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० पूर्वमलयानिलस्यप्राणिहं तत्त्वंविज्ञायोपालब्धःसंप्रतिसर्वानेवोपालभते रिपुरिवेति अयंसखाग्निःसहसम्यग्वा
६५ सोऽवस्थानेरिपुरिवशत्रुरिवममममनोदुनोतिसंतापयति किंच हिमानिलःस्वभावशीतलोपिशिखीवाग्निरिवदु
नोतिदहति किंच सुधारश्मिश्चन्द्रोपिविषमिवप्राणहन्ता नायमेतेषामपराधःकिंतुतस्मिन्श्रीकृष्णगतेदूरंप्र

रिपुरिवसखीसंवासोयंशिखीवहिमानिलोविषमिवसुधारश्मिर्यस्मिन्दुनोतिमनोगते
हृदयमदयेतस्मिन्नेवंपुनर्वलतेबलात्कुवलयदृशांवामःकामोनिकामनिरंकुशः ५०

स्थितेसतिएतेतथाविधाजाताइति एवंतस्मिन्नदयेनिर्दयेममहृदयंचेतः बलाद्गत्वलतेपुनःपुनर्वार्यमाणम
पिप्रसरतिवलेनातिनिवेशात्समर्थः तत्रहेतुः कुवलयदृशांनीलोत्पलाक्षीनांनिकामनिरंकुशात्स्वसमर्थःस्वेच्छाचारी ६५
किंच वामःक्रूरश्च शिखीमयूरेदहनेशिखीस्याद्ब्रह्मचारिणीति हलायुधः ५०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वं मलयानिलादयः शत्रुत्वेन ज्ञाता इदानीं तानेव मित्रत्वेन याचते बाधामिति हे मलयानिल चंदनवायो परमशीत
ला अथयोपि मम बाधां पीडां विधेहि कुरु किंच इतस्ततो विलोक्याह हे पंचबाण पंचबाणेति संबोधनं सुकरहिंसा
र्थमिति हे कामपंच निर्ज्ञाणो मम प्राणान् गृहाण तानेवाह संमोहनः शोषणश्च दहनः शोषण एतस्तथा उच्चाटनश्च का
मस्य बाणाः पंचप्रकार्तिताः ननु कथं गृहे प्रतिनयामि तत्राह यथा पुनर्भूयो गृहान् नाश्रयिष्ये न यास्यामि श्रीनंदात्म
जं विना मलयानिलादयोपि संतापका एवेति भावः तेभ्योऽप्याधिकमप्राप्ताच्छूर्या याचते हे कृतांत भगिनि यमुने तेन वत्स

बाधां विधेहि मलयानिल पंचबाण प्राणान् गृहाण न गृहान् पुनराश्रयिष्ये किं ते कृतांत भगिनि क्षम
मया तरंगैरंगानि सिंच मम शाम्यतु देहदाहः ५१

मः प्रार्थना। सा किं यतस्त्वं यमभगिनी तरंगैः कल्लोलैर्मे मांगानि सिंच क्षीणत्वात्सिंचनमेवाप्लावनमिति ध्वनितं तेन सिंचने
न मम देहदाहः विरहाग्निजनितो देहसंबंधी दाहः क्लेशः शाम्यतु देहदाहः सोढुमशक्यः अतो मरणं भवत्विसर्थः यमुना
तु यमस्वसेत्यमरः पीडा बाधा व्यथा दुःखमित्यमरः कामः पंचशरः स्मर इत्यपि ५१ सगीतेकविराज्ञिपि ब्रूते प्रातरि
साद्रिना सखीवचनैः श्रान्ति मलज्जमानो श्रीराधां हृष्ट्वा श्रीकृष्ण एव जपदेवापदेशेन नाम्न इति तद्ये प्रकटीभूतो ना
म्यथा कविः कथं प्रभ्रान्नुभूतमिव वर्णयेत अयं नंदात्मजो जगदानंदायास्तु कीदृशः श्रीराधामुखस्मेरेण पद्म

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी॰ नेनस्मेरमुखो बहिर्भूतदंतच्छविः किंकृत्वा श्रीराधायाश्च किंतं विलोक्य दृष्ट्वा कीदृशाम् व्रीडयाकाकमोञ्जूतयावंच
६६ लंचपलमंचलं बसुप्रदेशो यत्र व्रीडेतिमानससंबंधो गाव्यंजकेतिभावः पुनश्च किंकृत्वा नयनयोरंचलमाधाय श्री
चलेन श्रीराधानयनेवा समाच्छाद्येत्यर्थः कस्मिन्सति सखीवृंदे दत्तच्छंदं हसति सति किंदृष्ट्वा प्रातः प्रभाते च्युतं
स्पोरोवक्षोनीलनिचोलं नीलकंचुकाद्दत्तं संवीतपीतांशुकं परिकलितपीतांबरं वक्षयोश्च किंतं च विलोक्य श्री
थवा राधायाः संवीतपीतांबरं कृष्णस्य नीलनिचोलमिति वस्त्रविपर्यासं दृष्ट्वेति योजना ५१ इति श्रीमत्कृष्णच

प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं राधायाश्च किंतं विलोक्य हसति स्वैरं सखीमंडले व्रीडाचंच
लमंचलं नयनयोराधाय राधानने स्मेरस्मेरमुखोयमस्तु जगदानंदाय नंदात्मजः ५१ इति गीतगोविंदे नाग
५२ रनारायणो नाम सप्तमः सर्गः अथ कथमपि यामिनीं विनीय स्मरशरजर्जरितापि सा प्रभाते अनुनयवचनं वद
तमग्रे प्रणतमपि प्रियमाह साभ्यसूयम् ५२

इसेव कोदीक्षावतंस श्रीशिवदासपंडितात्मज श्रीवनमालिभट्टविरचितायां श्रीगीतगोविंदटीकायां वनमा
लिसंजीविन्यां नागरनारायणो नाम सप्तमः सर्गः ७ अथ सेपादपतितं विलोक्य हृदयेश्वरं नु पालंभं बहुविधं राधा
प्रेम्णा समब्रवीत् अथ शास्त्रोमंगलार्थः सा राधा कथमपि कष्टं यामिनीं विनीय रात्रिं नीत्वा साभ्यसूयं सेर्ष्यं यथा तथा
प्रियं श्रीकृष्णमाह कीदृशी स्मरशरैः कामबाणैर्जर्जरिता विद्धापि कीदृशं प्रियं प्रभाते प्रातःकाले नुनयाय स्वापराध
क्षमापनाय विनयं सांजलिं कृतापराधमपि मां क्षमस्वेति पुनरप्येवं वचनं करिष्यमाणं सादि वदंतं कीदृशं अग्रे प्रणतमपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र खंडितेयं नायिका तल्लक्षणम् उल्लंघ्य समयं यस्याः प्रियश्चान्योपभोगवान् भोगलक्ष्मांकितः प्रातरागच्छे
त्साहि खंडितेति भैरविरागो यतिताले भैरविरागलक्षणम् सरोवरस्थे स्फटिकस्य मंडपे सरोरुहैः शंकरमर्चयंती
तालप्रभेदप्रतिपन्नगीता गौरीतनुस्त्रीमतु भैरवीयमिति तालध्रुवयोर्लक्षणं पूर्वमेवोक्तम् अस्मत्सख्याबचनमेवाह
या रजनीति हरिहरातिक्रुचिसागंतां खेदे हे माधव मायाः कपटरूपायाः धवः स्वामी हे कपटचूडामणे विरहिजनदुःख
दत्वान्माधवेति हे वसंतेति वा याहि मे त्रपथ्यादितो गच्छ किंच हे केशव प्रशस्तचिकुर सुंदरशिखामणे प्रियागृहं याहि
भैरविरागे यतिताले रजनिजनितगुरुजागररागकषायितमलसनिमेषम् वहति नयनमनुरागमिव स्फुट
दै मुदितरसाभिनिवेशम् याहि माधव याहि केशव मा वद कैतववादम् तामनुसर सरसीरुहलोचन या तव हरति वि
षादम् ध्रुवपदम् १

कोपावेशेन पुनरुक्तिः किंचोपालंभांतरमाह हे सरसीरुहलोचन कमलनयन या तव विषादं मनस्तापं हरति दूरीक
रोति तां प्रियामनुसर गच्छ कपटवाक्यं मा वद धूर्तवादमेवाह हे श्रीकृष्ण नयनं स्फुटं यथास्यात्तथानुरागमिव वहसि धारय
सि कीदृशम् रजनिजनितेन गुरुणा गरिष्ठेन जागरणस्य रागेण कषायितम् आरक्तीकृतम् कीदृशम् अलसेनालस्येन निमे
षः पक्ष्मचपलं यस्य पुनः कीदृशम् उदितः कथितः रसस्यान्यनायिकाविषयशृंगाररसस्याभिनिवेशो यस्य अथवा प्रियबि
शेषणम् कीदृशं प्रियम् रजनिजनितो यो गुरुर्जागरो जागरणं तेन कषायिते ईषद्रक्ते लोचने यस्य तम् कीदृशम् अ
लसो निमेषो निमेषः स्वरूपं च यस्य पुनः कीदृशम् उदितः प्रकटितः रसस्य शृंगाररसस्याभिनिवेशः परतंत्रता येन १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० पुनरपिप्रकारांतरेणोपालंभमाह कज्जलेति हेकृष्ण तवारुणंरागेनारक्तंदशनस्यवसनमधरस्तनो: शरीरस्यानु
रूपंतनोतिविस्तारयति कीदृशम् कज्जलेनांजनेनमलिनंरूपामंयद्विलोचनंतस्यचुंबनेनविरचितंकृतंनीलिम्नोरू
६७ रूपंयस्य स्वभावमलिनस्यतवमालिन्यकरमितिध्वनि: २ किंच हेप्रियतवेदंवपु:रतिजयपत्रंत्वंसुरतवि
त पंडपामहपंयस्य ... स्मरसंगरेसुरतसंग्रामेखराणांतीक्ष्णाणांनखानांक्षतैर्जनितारेखायत्र क
जयपत्रमनुहरतिसदृशंकरोति कीदृशम् स्मरसंगरेसुरतसंग्रामेखराणांतीक्ष्णाणांनखानांक्षतैर्जनितारेखायत्र क

कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपम् दशनवसनमरुणंतवकृष्णतनोतितनोरनु
रूपम् २ वपुरनुहरतितवस्मरसंगरखरनखरक्षतरेखम् मरकतशकलकलितकलधौतलिपेरिव
रतिजयलेखम् ३ चरणकमलगलदलक्तकसिक्तमिदंतवहृदयमुदारं दर्शयतीवबहिर्मदनद्रुमन
वकिसलयपरिवारम् ४

स्याइवमरकतशकलेनीलमणिखंडेकलितानिर्मितायाकलधौतस्यसुवर्णस्यलिपिर्न्यासपंक्तिस्तस्याइव ३ किंच
चरणेति तवेदंहृदयंमदनद्रुमस्यकामवृक्षस्यहृदयांतर्गतस्यनवकिसलयपरिवारंनूतनपल्लवसमूहंबहिर्दर्शयतीव
प्रकटयतीव कीदृशम् चरणकमलादन्यस्त्रीपादपद्मात्गलताद्रवताऽलक्तकेनसिक्तमुक्षितम् अन्योपिहृदन्त:सि ६७
क्तमूल:सन्यत्नेनप्रकटयतिइतिध्वनि: कीहृशंउदारंमनोहरम् ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं वैदग्ध्यमवलंब्योपालंभमाह द्रागिति नवदधरतं तवाधरे स्थितं दन्तपदं कस्याश्चिद्दत्तं दन्तक्षतं मम
चेतसि चित्ते खेदं संतापं जनयति अन्यदीयकरजक्षतव्रणस्तावके वपुषि मां पीडयतीति भावः तदेवाह तवा
ध्येतद्वपुरधुना मया सह अन्नेदं कथंकथं घटयति एतेनादोषं दर्शितं नायकेनापि कायाः कथितम् ५ अन्नेदमु
क्त्वापुनर्दोषमाह बहिरिति देहकृष्णत्वं निश्चितं तव मनोपि चित्तमपि बहिरिवाति न्यायेन मलिनं तन्न विष्यति व
पुषः रूपामलत्वादिति भावः कथं त्वया ज्ञातमित्यत आह कथमिति अथान्यथा माह नोऽजनमनुगतमनुसृतं

दन्तपदं नवदधरगतं मम जनयति चेतसि खेदं कथयति कथमधुनापि मया सह तव वपुरेतदन्नेदम् ५
बहिरिव मलिनं मलिनतरं तव कृष्णमनोपि भविष्यति नूनम् कथमथ वंचयसे जनमनुगतमसंशरज्वरदूनम् ८
६ भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम् प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ७

त्वदेकशरणं तदनावेकथं वंचयसि प्रतारयसि कीदृशम् असमशरज्वरेण दूनं संतप्तम् तस्मात्तदस्तीति भावः ६ पुनर
पि कूरत्वेनोपालंभमाह भ्रमतीति भवान् अबलाकवलाय युवतीनां ग्रसनार्थं अकवलाय सुखाय वा [illegible] वनेषु भ्रमति
अत्रास्मिन्नर्थे किं विचित्रमाश्चर्यं न किमपीत्यर्थः तत्र हेतुमाह पूतनिकैव पूतनैव वधूवधे दयारहितं बालचरित्रं बालचेष्टि
तं प्रथयति ख्यापयति न केवलं पूतनैवान्यापि खंडितापि च तल्लक्षणम् निद्राकषायकलुषीकृततारनेत्रो नारीनखव्रण
विचित्रविचित्रितांगः यस्याः कुतोपि गृहमेति पतिः प्रभाते सा खंडितेति कथिता कविभिः पुराणैरिति भरते बालेन त्वयाक
ठिनाहतानहरणेन कोमलांगी ग्रासे किं चित्रमिति भावः ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतार्थे दुर्लभत्वेन कथयति श्रातिति हे विबुधाः हे श्राह्रस्य क्रीडारसं विभावना चतुराः हे विबुधाः पंडिताः इदं जयदेव
गी०टी० शीतार्थे दुर्लभत्वेन कथयति श्रातिति हे विबुधाः हे श्राह्र स्य क्रीडारसं विभावना चतुराः हे विबुधाः पंडिताः इदं जयदेव
वर्णितं कथितं रसासुरतेन वंचिता या खंडितमात्मानं मन्यमाना युवतिः श्रीराधा तस्या बिलापं प्रातरांमनन खेहतशि.
६८ थिलावलोकनत्वरसंगादिपरिदेवनं श्रृणुत कीदृशाम् लयतो मोतादपि ब्रह्मानंदादपि उरापंडुः प्रापेनेदं सुखं तत्रात्मा
तिभावः कीदृशाम् सुधामधुरम् अमृतादपि मिष्टं गरिष्ठं वा ८ गीतार्थं श्लोकेन संगृह्याह तवेदमिति हे कितव धूर्तत्व.

श्रृणुत सुधामधुरं विबुधा विबुधालयतोपि दुराप
श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापम् प्रियापादालक्तकछुरितमरुणछाय. हृदय म् मम
म् ८ तवेदं पश्यं सा प्रसरदनुरागं बहिरिव लज्जां जनयति ५७
घप्रख्यातप्रणयभरभंगेन कितवत्वदालोकः शोकादपि किमपि लज्जां जनयति ५७

प्रख्यात प्रेमातिशयस्य भंगेन नाशेन शोकादप्यधिकमप्यनिर्वचनी
यां लोकस्तव दर्शनं प्रख्यातो दत्तवमममापि प्रणयभरस्य प्रेमातिशयस्य भंगेन नाशेन शोकादप्यधिकं रितंप्रि
यांलज्जांजनयति कीदृशामम तवेदमीदृशं हृदयं मनश्चाधरं चापि यायाबल्लभायाः पादालक्तेन मावकेन छुरितंप्र ६८
छितं पश्यंसाः अतएवारुणछायम् अरुणारक्ता छाया दीप्तिर्यस्य तादृशाम् गम्येहृतेबहिर्वाह्यप्रसरच्छिरोदनुरा
मिवरागोप्यरुणोवर्ण्यते ५२

CC0. In Public Domain, Digitizagtion by eGangotri

श्लोकेन कविः सर्गांते मंगलमाचरति अंतरिति कंसरिपोः श्रीकृष्णस्य वंशीरवो वोयुष्माकं श्रेयांसि कल्याणानि वि तेन
पोहयतु ददातु कीदृशः कुरंगीदृशां हरिणाक्षीणामंतर्मोहनेन मौलिघूर्णनं शिरोधूननं मिलन्मंदारस्य पारिजातपुष्पस्य वि
श्रंसनं पतनं यस्मात्सः कीदृशः स्तब्धानां सौंदर्यादिगुणैर्गर्विष्ठानां कामिनीनामाकर्षणं वशाकरणं हठहिर्षणं मंत्रोत्साहक
रचैसेवमादिसाधनमेव महामंत्रो यस्य सः कीदृशः दृप्यद्भिर्दर्पयुक्तैर्दैत्यैरिंद्रयमानाज्ञप्तलभ्यमानात् दिविषदोदेवास्तेषां
दुर्वारादुःखापदस्तासां ध्वंसो नाशकः ५४ विलक्षणालक्ष्मीः शोभा यस्याः सा श्रीराधा तस्याः पतिः श्रीकृष्णसंज्ञकः ५५

अंतर्मोहनमौलिघूर्णनमिलन्मंदारविस्रंसनस्तब्धाकर्षणदृष्टिहर्षणमहामंत्रः कुरंगीदृशाम् दृप्यद्दानवदूयमा
नदिविषद्दुर्वारदुःखापदांभ्रंशः कंसारिपोर्व्यपोहयतु वः श्रेयांसि वंशीरवः ५४ इति श्रीगीतगोविंदे विल
क्षणलक्ष्मीपतिर्नामाष्टमः सर्गः ८ तामथ मन्मथखिन्नां रतिरसभिन्नां विषादसंपन्नाम् अनुचिंतितह
रिचरितां कलहांतरितामुवाच रहः सखी ५५

इति श्रीमल्कृष्णवंद्यसेवकोदीच्यायतंस श्रीशिवदासपंड्यात्मज श्रीवनमालिभट्टविरचितायां वनमालिसंजिवन्यां
श्रीगीतगोविंदटीकायां विलक्षणलक्ष्मीपतिर्नामाष्टमः सर्गः ८ निर्व्याजमतिहर्षसंयुक्ताप्युत्कापि परुषं वचः अनुतप्ता
सहचरीवाक्यात्मानवमेनवत् अथेति मंगलमनंतरं यावद्दृष्टएकांते तां श्रीराधां सख्युवाचोक्तवती कीदृशीम् मन्मथ
खिन्नां कामसंतप्ताम् कीदृशीम् रतिरसभिन्नां सुरतशृंगाररसेन विदारिताम् अतएव विषादसंपन्नां उद्वेगयुक्ताम् की
दृशीम् अनुचिंतितं ध्यातं हरिचरितं कृष्णविलासो यया ताम् कीदृशीम् कलहांतरितां प्रीतिकलहेन व्यवहिताम् ५५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० टी० कलहांतरितेयम् यापादपतितं कांतमात्मनो गुणगर्विता निरस्य पश्चात्तपति कलहांतरिता तु सा गुर्जरीरागे रूपक
६९ ताले रागतालध्रुवपदलक्षणं पूर्वमेवोक्तम् हरिरिति अयि हे मानिनि माधवे मधुप्रिये श्रीकृष्णे मानं मा कुरु संयोगविलं
बनं माकार्षीरित्यर्थः यतो मधुपवने वसंतवायौ वहति सति हरिः सकलमनोहरः कामतापहरो वा त्वामभिसरति स्वयमेवागच्छ
ति हे सखि अस्मिन्वने त्रैलोक्ये वैकुंठे वा श्रीकृष्णालिंगनसंगमादपरमुत्कृष्टमधिकं सुखमस्ति अपितु न किंचिदित्यर्थः अस्माद
न्यत्कुत्सितं सुखमिति भावः १ अधिकसुखमेव प्रपंचयति तालेति हे राधे त्वं कुचकलशौ स्तनघटौ किमर्थं विफलीकुरुषे

गुर्जरीरागे रूपकताले हरिरभिसरति वहति मधुपवने किमपरमधिकसुखं सखि भवने माधवे मा कुरु मानि
निमानमये ध्रुवपदं १ तालफलादपि गुरुमतिसरसम् किं विफलीकुरुषे कुचकलशम् २ कति न कथितमि
दमनुपदमचिरम् मा परिहर हरिमतिशयरुचिरम् ३

निःफलं करोषि श्रीकृष्णकरसमर्पणाभावादित्यर्थः कीदृशम् तालफलादपि तालफलापेक्षया काठिन्यस्थौल्याभ्यां वर्तु
लत्वेन चातिगुरुमधिकम् कीदृशम् अतिसरसमतिरसप्रदं श्रृंगाररससहितं वा रतिविरामेऽपि सरसोत्पादकमित्यर्थः ता
लफलं मद्दर्शनमादकमिमं त्वदवलोकनमात्रेणेति भावः २ इदमचिरं सांप्रतं अनुपदं प्रतिपदं कतिवारं किं न कथितम् ह
रिं मा परिहर मा त्यज कीदृशम् अतिशयरुचिरमतिमनोहरम् कीदृशं हरिं अचिरं विलंबासहम् कीदृशम् अनुपद्यते ६९
स्त्रीसमूहैरन्विष्यत इत्यनुपदम् ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंश्रुत्वाऽङ्कमुखीमिवाह किमितीति किमर्थं विषीदसि संतापं प्राप्नोषि विकला विगतकला गतकौशला विह्वला
वा सती रोदिषि संप्रति दुःखं रोदनं व्यर्थमिति सकला सर्वा युवतिसभा तरुणीसमाजस्त्वत्त्वां विहसति विगतकौशलां
त्वामुपहसतीति भावः ४ हे सजलेति नलिनीपत्रसहितानि जलानि तैः शीतलितमाश्रितं शयनं यया तत्संबुद्धिः अनेन
तापाधिक्यं सूचितमिति भावः अथवेहस्तोशयने हरिमागतमवलोकय नयने सफलय सफलीकुरु किमर्थं मानाग्रहे
णविरहसंतापमनुभवसीति ध्वनिः ५ हे राधे त्वं मनसि गुरुखेदं महद्दुःखं किमिति जनयसि उत्पादयसि तस्मान्मम वचने

किमिति विषीदसि रोदिषि विकला विहसति युवतिसभा तव सकला ४ सजलनलिनीदलशीतलशाय
नेहरिमवलोकय सफलय नयने ५ जनयसि मनसि किमिति गुरुखेदम् शृणु मम वचनमनीहितभेदम्
६ हरिरुपयातु वदतु बहुमधुरम् किमिति करोषि हृदयमतिविधुरम् ७

समाणं शृणु कीदृशम् अनीहितोऽनाकांक्षितो भेदो वैरस्यं विरहो वा यत्र यदि न करोषि तदा वचनमपि तावच्छृणु इति
६ वचनमेवाह हरिरिति हरिर्मनोहरमुपयातु तव समीपमागच्छतु किंच बहुमधुरं सानुनयवचनं वदतु त्वं हृदयं
मनोऽतिविधुरमतिविकलं किमिति करोषि मानाग्रहेण तथापि सौंदर्यसारः स खिन्नेन दुःखेन तस्यापराधास्पृहणीयत्व
र्त्तिः तस्याश्च कृष्णप्रणयानुबंधस्तस्याप्तिमानिकधनेषु मानइति ७

Dr. Urmila Sharma Collection, Varanasi

हेसो २

गी॰टी॰ ७० श्रीजयदेवेन भणितमुक्तं हरिचरितं रसिकजनं श्रीराधाकृष्णभक्तिभावनाचतुरं सुखयतु आनंदयतु कीदृशम् अति
ललितं शृंगारहासस्निग्धमधुरत्वादादिगुणयुक्तम् शृंगारप्रचुरचेष्टा यत्र तद्ललितं विदुरिति ८ गीतार्थसंग्रहश्लोकेनाह
स्निग्धेत्यादि हे विपरीतकारिणि विरुद्धविधायिनि तव तौ स्त्वय्येतत्कृत्यमेव किं तत् श्रीखंडचर्चा चंदनचर्चार्पितवा वि
षमिव गरलमिव दहति किंच शीतांशुश्चंद्रस्तपनः सूर्य इव संतापको भवति किंच हिमं शीतलं हुतवहोग्निरिव दाहको

श्रीजयदेवभणितमतिललितम् सुखयतु रसिकजनं हरिचरितम् ८ स्निग्धे यत्परुषासि यत्प्रणमति स्त
ब्धासि यद्रागिणि द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये युक्तं तद्विपरीतकारिणि तव श्रीखं
डचर्चा विषं शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ५६

भवति किंच क्रीडामुदः केलिप्रमोदा यातनास्तीव्रवेदनाप्रदाः कुत एतद्विपरीतम् तस्मिन्प्रिये कृष्णे प्रणमति नमस्कु
र्वति सति यत्त्वं परुषासि कठिनासि यत्स्तब्धासि स्निग्धे सानुरागे सगर्वासि यद्रागिणि सानुरागे प्रिये द्वेषस्थासि असंतु ७०
ष्टासि यदुन्मुखे आलिंगनाय सन्मुखे विमुखतां पराङ्मुखतां यातासि ५६

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्गोते तद्धृदयस्यास्मैमंगलमाचरति सांद्रेति वयंश्रीगोविंदस्यचरणकमलमशुभस्कंदायनक्तिप्रतिबंधकदुरितनाशा
यवंदामहे कीदृशम् स्वछंदंस्वेछयामकरंदवत्सुंदरं व यथास्यादेवंगलंत्याःस्रवंत्यामंदाकिन्याःआकाशगंगायामेदुरंस्निग्धंकी
दृशम् सांद्रोनिबिडोहर्षोयेषांतइंद्रादयोदिविषदोदेवास्तेषांवृंदैःसमूहैरमंदादरादत्यादरादासमंतान्नम्रैर्नम्रीभूतैर्मुकुटेंद्रनी
लमणिभिःसंदर्शिताइंदिंदिराभ्रमरायत्रतादृशम् ५७ इतिश्रीमत्कृष्णचंद्रसेवकोदीच्याग्वतंसश्रीशिवदासपंडितात्मजश्रीव
नमालिनद्विरचितायांवनमालिसंज्ञायांश्रीगीतगोविंदटीकायांकलहांतरितावर्णनेमंदमुकुंदोनाममनवमःसर्गः ९

सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिःसंदर्शितेंदिंदिरम् स्वछंदंमकरंद
सुंदरगलन्मंदाकिनीमेदुरंश्रीगोविंदपदारविंदमशुभस्कंदायवंदामहे ५७ इतिश्रीगीतगोविंदेकलहांत
रितावर्णनेमंदमुकुंदोनामनवमःसर्गः ९ अत्रांतरेमसृणरोषवशामसीमनिःश्वासनिःसहमुखीं [redacted]
सुमुखीमुपेत्य सव्रीडमीक्षितसखीवदनांप्रदोषेसानंदगद्गदपदंहरिरित्युवाच ५८

दशमेत्वथनिश्वासम्लानबिंबाधरद्युतिम् राधामुपेत्यकुपितांहरिरूचेसुधामुखीम् तत्कोपशांत्यैनिपुनःस्वदंडस्वमुखप्रदम्
ततस्त्यदूवगोविंदोवक्रूरूप [redacted] मवर्णयत् सांप्रतंश्रीकृष्णोराधामनुनयन्नाहअत्रेति अत्रांतरेअस्मिन्नेवावसरेप्रदोषेरा
त्रिमुखेवासुमुखींराधामुपेत्यकोपहरत्वात्प्रहरोवाहरिःआनंदसहितं [redacted] गद्गदपदं [redacted] रसावरुद्धकंठ [redacted] यथास्यात्तथाइति
वक्ष्यमाणमुवाच कीदृशीम् मसृणस्यकर्कशस्यरोषस्यक्रोधस्यवशामधीनाम् कीदृशीम् असीमोःदीर्घोयोनिःश्वास
स्तेननिःसहंविरहदुःखसहनाक्षमंमुखंयस्यास्तांकीदृशीम् सव्रीडंसलज्जमीक्षितंसखीवदनंययातांताम् ५८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० देशवराडीरागेऽष्टतालीताले ध्रुपदंरागरूपम् आरब्धागमनमुद्रानिद्राघूर्णायमाननयनयुग्मासुखशायिनिनिजदयि
७१ तेदेशवराडीमवेहीरीति लघुद्रुतौलघुश्चैवाष्टतालीप्रकीर्त्तिता तालरूपम् हर्युक्तंगीतेनाहवदसीति हेप्रियेवह्निमेत्वंपदि
किंचिदपिसरोषंसप्रमादंवावदसितदातवदन्तरुचिकौमुदीदन्तप्रकृतिज्योत्स्ना तिघोरंअतिनीमंदरतिमिरंसाधसाधकारंअ
पराधांधकारंवाहरतिनाशयति हरतीत्यनेनमुखेहास्यंप्रार्थितम् किंच तववदनचंद्रमामुखचंद्रः स्फुरदधरसीधवेप्रकाशाव

दंतरुचिकौमुदीहरतिदरतिमिरमतिघोरम् स्फुरदधरसी
देशवराडीरागेऽष्टताले वदसियदिकिंचिदपि मुदीहरतिदरतिमिरमतिघोरम् प्रियेचारुशीलेमुंचमयिमानमनिदानम् सपदिमदनानलोदह
धवेतववदनचंद्रमारोचयतिलोचनचकोरम् प्रियेचारुशीलेमुंचमयिमानमनिदानम्
तिममभानसंदेहिमुखकमलमधुपानम् ध्रुपदम् १

अनेनश्रीराधाधरामृतंप्रार्थितम् एवंगम्भीरार्थमुक्त्वा
उक्ताधरामृतार्थंमल्लोचनचकोरंरोचयतिराधयतिनेत्रपक्षिणंकरोति अनेनश्रीराधाधरामृतंप्रार्थितम् एवंगम्भीरार्थमुक्त्वा
छितमाह हेचारुशीलेसुंदरस्वभावेमयिमानंमुंचत्यज अनिदानमकारणम् अन्ययुवतिजनकारणरहितंवा चारुशीलायेने
तद्धर्ममितिगूढाभिप्रायेणोपालंभइतिभावः कीदृशंमयि प्रियेवह्निनेचारुशीलेमनोहरस्वभावइतिवामानात्यागोदोषमाह
मदनानलःकामाग्निरकालेममभानसंदहति नायंमानसमयइतिभावः अतःसपदिशीघ्रंमुखकमलमधुपानंचदेहिप्रयच्छ
अनेनसन्मुखीकरणंप्रार्थितम् १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमप्रसन्नां दृष्ट्वा [redacted] सानुकूलदंडमुपदिशन्नेवाह सत्यमेवासीति हे सुदति शोभनदशने सत्यमेव यथार्थे यदि म
यि कोपिनी क्रोधवत्यसि तदा खरनखरशरघातं तीक्ष्णनखनाराचघातं देहि अनेन नखप्रहारदानेन सुरतमेव ध्व २
नितम् अयमेव परो दंडः किंच सापराधस्य बंधनमपि युक्तमेव भुजबंधनमेव घटय कुरु नेत्यादिना किंच रदख
डनं जनय विरचय एतेन दंडातिशयः प्रोक्तः यथा दयिता वाक्पाशस्य कृतो यमपरो विधिः जीवयत्यर्पितः कंठे भाव
सपवर्जितः येन तव सुखसमूहो भवति तद्विधेहि २ एवंकृतदंडाप्रसादं ह त्वमसीति हे प्रिये त्वं मम जीवनं प्राणोसि

सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातम् घटय भुजबंधनं जनय रदखंडं येन
वा भवति सुखजातम् १ त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नम् भवतु भवतीह म
यि सततमनुरोधिनी तत्र मम हृदयमतियत्नम् ॥

त्वां विना मम जीवनमपि दुर्लभमिति भावः त्वं मम भूषणमलंकारोसि त्वां विना भूषणमप्यभूषणमेव. भूषणं त्वदंगमे
व एतेनालिंगनविधिः प्रार्थितः किंच भवजलधौ संसार[redacted]समुद्रे त्वमेव मम रत्नमसि त्वज्जन्म रत्नाकरे त्वमेव मया रत्नं ल
ब्धमिति भावः किंच इक्तेन यथा कश्चिद्रत्नाकरे प्रविश्य महद्रत्नं प्राप्य सुखी भवति तथा त्वज्जन्मरत्नाकरे त्वां प्राप्याहमिति
दूरत्वदेकजीवने मयि भवती पूज्या सतते निरंतरमनुरोधिनी अनुकूला भवतु तत्र प्रसादे मम हृदयं अतियत्नमतिशय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० एवंखदंडमुक्त्वासंप्रतिसुरतोत्सवानुकारिलोचनानुरागंवर्णयन्नाह नीलेति हेतन्विरूपांगिनीलनलिनाभंनीलोत्पल
सदृशमपितवलोचनंकोकनदरूपमतिरक्तंकमलसदृशंधारयति मांप्रतिरोषारुणत्वंधत्ते एतेनसरागावलोकनंप्रा
७२ र्थितमितिध्वनिः यदिदंचक्षुःकृष्णंरूपामंकृष्णमांवाकुसुमशरस्यकामस्यबाणत्वेनबाणोस्य सावारंजयसिताप
युक्तंकरोपितदेतच्चक्षुरनुरूपंयोग्यंभवति ४ किंच स्फुरत्वित्यादि हेप्रियेमणिमंजरीहारलताकुचकुंभयोरु

नीलनलिनाभमपितन्वितवलोचनंधारयतिकोकनदरूपम् कुसुमशरबाणभावेनयदिरंजयसिकृ
कुच ष्णमिदमेतदनुरूपम् ४ स्फुरतुकुचकुंभयोरुपरिमणिमञ्जरीरंजयतुतवहृदयदेशम् रसतुरसनापितवघ
नजघनमण्डलेघोषयतुमन्मथनिदेशम् ५

परिस्फुरतुतरलताभवतु किंचसालतातवहृदयप्रदेशंरंजयतु स्तनमंडनंकरोतु एतेनपुरुषायितमेवसुरतंप्रार्थि॰
तमितिभावः किंच तवघनजघनमंडलेनिविडकटिप्रदेशेरसनाकांच्यपिरसतुशब्दंकरोतु श्रृंगारादिरससहितांमन्म
थनिदेशंकामाज्ञांघोषयतु त्वयाजितमितिमत्पराजयंघोषयत्वितिध्वनिः अनेनविपरीतरतप्रार्थनाप्रकटीकृता ५ ७२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच धृतमौनां दृष्ट्वा वचनव्यापारं कारयितुं संबोधयति हे मसृणवाणि स्निग्धवचने त्वं भण ब्रूहि आज्ञापय वा सरस-
लसदलक्तकरागं गलत्यावकरूपं कोऽयं अत्र नादृश्यं चरणद्वयं पादयुगलं करवाणि कुर्याम् कीदृशम् स्थलकमल-
स्थलपद्मं तस्य सुगंधित्व सुकुमारत्वादिगुणैः त्वक्कोमलतागंजनं शोभातिरस्कारकम् अतएव मम हृदयरंजनम् अनुरागवर्द्धकम्
कीदृशम् जनितः उत्पादितः रतिरंगे सुरतकौतुके परभागः पारम्यं शोभा येन क्रौंचबंधादौ मद्‌हृदये लग्नमालक्तकं सपारम्यं शो-
भां प्रकाशयतीति भावः स यथा क्रौंचबंधश्च सुरते वाऽरू पादयुगं वधूः संधूनयंती सुरते रमते क्रौंचकस्तु स इति कामसर्वस्वे अनेन

स्थलकमलगंजनं मम हृदयरंजनं जनितरतिरंगपरभागम् भण मसृणवाणि करवाणि चरणद्वयं सरसला-
लदलक्तकरागम् ६ स्मरगरलखंडनं मम शिरसि मंडनं धेहि पदपल्लवमुदारम् ज्वलति मयि दारुणो मदनकद-
नानलो हरतु तदुपहितविकारम् ७

चरणाग्रहोऽनुनयः कृत इति ध्वनिः ६ उपक्रांते चरणप्रसादं प्रार्थयते स्मरेति हे राधे उदारं रतिजनकं पदपल्लवं चरणकिसलयं शि-
रसि धेहि धारय कीदृशम् मम मंडनम् अलंकरणं मंडनस्यापि मंडनमिति अर्थः कीदृशम् स्मरगरलखंडनं कामतापनाशनम् आव-
यो रूपकमेतत् कर्णं ममैव मयि मदनस्य कामस्य यत् कदनं संतापः स एवानलोऽग्निर्ज्वलति संतापयति कीदृशः दारुणः संतापकः अ-
त एव तव पदपल्लवं तदुपहितविकारं मदनकृतोपतापं हरतु दूरीकरोतु संतापनिवर्तनेन सर्वांगपीडानिवृत्तिरिति वत् मणिः इति
पावे दारुकमणिस्सोऽप्यति संतापकः पल्लवाच्छादितस्य संतापो न भवति तद्वदत्रापि ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० किंचफलन्नतमर्थमाह इतीति इतिपूर्वोक्तप्रकारेणमुरुवैरिणःश्रीकृष्णस्यराधिकांअधिराधांलक्षीकृत्यवचनजातंसा
७२ निप्रायवचनसमूहोजयतिउत्कर्षेणवर्द्धताम् कीदृशम् चटुलंमनोहरम् चाटुप्रेमयुक्तम् पटुचतुरम् चारुसुकुमारम् की
दृशम् जयदेवस्यकवेर्भारत्यावाण्याभूषितमलंकृतम् कीदृशम् मानिनीजनसमूहस्यश्रीराधाख्यस्यवाजनितमुत्पादित
म् जनितंसुखंयेनतत् ८ प्रसन्नांदृष्ट्वात्मनःसंपन्नतांनिरूपयति परिहरेति हेकृतातंकेहेकृतकामकोपेअन्यंध्वस्तजनसंताप

इतिचटुलचाटुपटुचारुमुरवैरिणोराधिकामधिवचनजातम् जयतिजयदेवकविभारतीभूषितंमा
निनीजनजनितशातम् ८ परिहरकृतातंकेशंकांत्वयासततंघनस्तनजघनयाक्रांतेस्वांतेपरानवका
शिनि विशतिवितनोरन्योधन्योनकोपिममांतरंप्रणयिनिपरीरंभेविधेहिविधेयतां ६०

शंकांपरिहरसज यतोममस्वांतेहृदयेऽंतरमभ्यंतरंवितनोःकामादन्यःकोपिधन्यःसौभाग्यःस्त्रीलक्षणोपिनविशतिप्र
विशति एतेनान्यनायिकापरिहारउक्तः कीदृशेस्वांते त्वयासततंसर्वदाक्रांतेव्याप्ते कीदृश्या घनस्तनजघनयाघनेनिवि
डेऽनवकाशेकठिनेवास्तनजघनेयस्याःतयापुनःकीदृशे परानवकाशिनि अन्यस्याकाशशून्ये कीदृशे प्रणयिनि ७२
स्नेहपूर्णे कीदृशे परीरंभालिंगनेकृतालिंगनोयोगे तांविधेयतांसुरतकर्तव्यताम् विधेहिकुरु विधेहीत्यनेनकला
कुशलत्वंनायिकायाउक्तम् आतंकःक्रोधकंपयोरितिधरणिः ६०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यद्यालिंगने मौनमाचरसि तत्परिहाराय ममानुरूपं दंडमाचरेत्याह मुग्धेति हे मुग्धे सुंदरि मयि निर्दयं दयारहि
तं दंतदंशं दंतैः खंडनं दोर्वल्लिबंधः भुजलताबंधश्च निबिडगाढं स्तनाभ्यां पीडनान्यालिंगनानि च विधेहि कुरु हृतापरा
धे मयि सर्वे दंडाः कर्त्तव्या नात्र संकोचः कार्यः किंच हे चंडि कोपनस्वभावे सुरतोत्कंठे वाममापराधिनं त्वमेव मुदमानं
दं त्वं च प्राप्नुहि न त्वन्यस्यो ममानुरागाद इत्यर्थः नो चेत्पंचबाणः एव चांडालस्तस्य कांडदलनाद् बाणक्षरणाद् असवः प्राणाः

मुग्धेति विधेहि मयि निर्दयदंतदंशं दोर्वल्लिबंधनिबिडस्तनपीडनानि चंडि त्वमेव मुदमंच न पंचबाणचां
डालकांडदलनादसवः प्रयांतु ६१ शशिमुखि तव भाति भंगुरभ्रूर्युवजनमोहकरालकालसर्पी तदुदितभ
यभंजनाय यूनां त्वदधरसीधुसुधैव सिद्धमंत्रः ६२

प्रयांतु गच्छंतु अतो मयि प्रसन्ना भवेति प्रार्थना चंडी च सुरतोत्कंटेति महोदधिः ६१ किंच हे शशिमुखि चंद्रानने तव भंगु
रभ्रूर्वक्रभ्रूः भाति शोभते कीदृशी युवजनानां तरुणजनानां संमोहनाय करालाभीषणा कालसर्पी कृष्णाहिवधूः अन्या तु
जंगादंशेन जनं विमोहयति त्वं तु भ्रूभंगमात्रेणेति भावः किंच तदुदितभयभंजनाय तस्याः कृष्णवः सकाशादुदितमुत्पन्नं यद्भयं तत्
स्य भंजनाय नाशाय यूनां तरुणानां मादृशां त्वदधरसीधुः त्वदीयाधरसीधुर्मदिरा सैव सुधामृतमेव सिद्धमंत्रः साधितो मंत्रः प्र
भावयुक्तो वा ६२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० एवं धृतमौनां प्रत्याह व्यथयतीति हे तन्वि हे सुरांगि तव मौनं वृथा निःकारणं व्यथयति किंच हे तरुणि कोपे मधुरालापैरमृतव
चनैः पंचमरागप्रपंचय विस्तारय किंच कटाक्षैः कामजं तापं नाशय हे ज्योत्स्नवदने विमुखीभावं दत्तपृष्ठत्वं विमुंच अल्पजसमुद्भवा
७४ स्त्वैतदनुचितमिति भावः अत एव मानं मुंच मा सृज हे मुग्धे सुंदरि मूढे वा अहं प्रियः स्वयमेवानाहूत उपस्थितः समागतः कीदृ
शोऽहम् अतिशयस्निग्धः संपूर्णस्नेहो महावत्सलो वा तावत् मानाग्रहो न कर्तव्यः प्राप्तफलत्वादिति भावः इह संप्रति मानिन्या
अंगानि स्पर्शयन् प्रियं पंधूते बंधूकेति हे चंडि कोपनशीले सुरतोत्कंठे वा तव अधरोऽयं बंधूकस्य द्युतिः कांतिस्तस्या बांधवो मित्रं स

व्यथयति वृथा मौनं तन्वि प्रपंचय पंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः सुमुखि विमुखीभावं तावद्विमुंच न मु
ंच मां स्वयमतिशयस्निग्धो मुग्धे प्रियोऽहमुपस्थितः ॥ २ ॥ बंधूकद्युतिबांधवोऽयमधरः स्निग्धो मधूकच्छविर्गंडश्चंडि चका
स्ति नीलनलिनश्रीमोचनं लोचनम् नासाभ्येति तिलप्रसूनपदवीं कुंदाभदंति प्रिये प्रायस्त्वन्मुखसेवया विजयते वि
श्वं स पुष्पायुधः ॥ ६४ ॥

दृशश्च कामिनि शोभते किंच स्निग्धश्चिक्कणो गंडः कपोलश्च कान्ति कीदृशः मधूकपुष्पवद्दीप्तिर्यस्य तथा तव लोचनं नीलन
लिनश्रियं नीलोत्पलशोभां मोचयति लाजयतीति तव कांति एतेन लोचनस्य मनोहरत्वमुक्तम् तथा तव नासा नासिका तिल
प्रसूनपदवीं शोभाश्रेणीं अभ्येति प्राप्नोति हे कुंदाभदंति कुंदपुष्पसदृशा दन्ता यस्या इत्थं रसनेन दंता एवं च चलामलरूपामिति ध्व
निः हे प्रिये त्वन्मुखसेवया पुष्पायुधः कामः प्रायो बाहुल्येन तव मुखसेवया विश्वं जगत् विजयते वशीकरोति पुष्पायुधस्यायुधानि ७४
तव मुखे वर्तंत इति सेवाकारणमुक्तम् ॥ ६४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच तव दृष्ट्वैमदालसे अवलोकनाय मंदयत्ने हे स्वर्गलोके एव मदालसा यदनंतं तव मुखं इंदुमस्याचंद्रद्रष्टुं
स्पदंस्थानं त्वन्मुखदर्शनेन साक्षात्पश्चाद्बुद्धिर्भवतीत्यर्थः सा त्वं एकधा स्वर्गलोके उमती तवगतिर्गमनं जन
स्तंभाद्युग्मस्य वा मनोरमा मनोहारिणी सा एकविधा स्वर्गलोके एव मनोरमा तवोरूद्वये विधुतरंभं तिरस्कृतकदली

दृष्ट्वैतं वमदालसे वदनमिंदुमस्यास्पदं गतिं ऊर्जनमनोरमा विधुतरंभं मूरूद्वयम् रतिस्त
वकलावती रचितचित्रलेखे कवावहो विविधयौवनं वहसि तन्वि पृथ्वीगता ६५

कं कदलीनां वरूत्वान्तस्यापि वहत्त्वं स्वर्गलोके एव रंभेति तव रतिः सुरतक्रीडाकलावती नानाकामकलाकौशलयु
क्ता स्वर्गलोके काकला तवभ्रुवौ रचितचित्रलेखे विरचितसौंदर्याय चित्रलेखे हे स्वर्गलोके एव चित्रलेखा अहो इसाश्च
र्यं हे तन्वि सुंदरि पृथ्वीगतासती त्वं विविधयौवनं नानायुवतीकदंबजातं वहसि धारयसि ६५

Dr. Urmila Sharma Collection, Varanasi

स्वर्गं

सर्गोतेकविराविषमाग्राले प्रातिमिति हरिर्मनोहरलापहरो वावो युष्माकं गायतां श्रूएवतां च प्रातिं भक्तिविषयि
गी०टी० सर्गोतेकविराविषमाग्राले प्रातिमिति हरिर्मनोहरलापहरोवावो युष्माकं गायतांश्रृएवतांच प्रातिंभक्तिविषयि
णं तनुतां विस्तारयतु कीदृशः राधापीनपयोधरस्मरणकारी कीदृशः कुवलयापादकुंभेन कुंभस्थलेन सार्द्धरणे

७५ संसर्गवान् संभेदवान् कुवलयापीडकुंभसंसर्गेन राधापीनस्मरण कृदित्यर्थः कुंभशब्दोत्र श्रीराधास्तनस्मारकं
संसर्गवान् संभेदवान् कुवलयापीडकुंभसंसर्गेनराधापीनस्मरणकृदित्यर्थः कुंभशब्दोत्रश्रीराधास्तनस्मारकं

- इति यत्र यस्मिन् रणे हरिः क्षिपति खिदयुक्तो भवति अथोनंतरं क्षणं क्षणमात्रं केनापि सुखोदयेन मीलति लोचने
मुद्रिते करोति तत्तस्मिन् क्षिप्तद्विपे प्रक्षिप्तहस्तिनि तत्क्षणात् कंसस्यालमतिशायेन अस्मद्धितं सकलजीवितायां

प्रातिं वस्तनुतां हरिः कुवलयापीडेन सार्द्धरणे राधापीनपयोधरस्मरणकृत कुंभेन संसर्गवान् यत्र स्वि
द्यति मीलति क्षणमथो क्षिप्तद्विपे तत्क्षणात् कंसस्यालमस्मद्धितं जितमिति व्यामोहकोलाहलः ६६

जितं जितमिति वेगेन व्यामोहकोलाहलो मरणजयो मध्ये उत्साहो भूत् पद्ये द्वाभ्यां श्रीराधाकृष्णाभ्यां सुरतरसं पिबति सु
क्षिपः कामः तस्मिन् क्षिप्तजिते क्षिपे कंसस्य सखकृ जितस्य व्यामोहकोलाहलः परमसुखप्रदः किंकिणीनूपुरध्वनिस
घातकृतः जितं जितमिति परस्परं तयोरभूत् कीदृशो हरिः कुवलयं नीलोत्पलं तस्यापीडो माला शिरःसंघट्टने वाते ७५
नसंमोदवानिति पाठः श्लोकं समानम् कंसोसुरे स्मरकृते कृजिते तत्सुखे पिबेति कौपचूडामणिः ६६

इतिश्रीमत्कृष्णचंद्रसेवकोदीच्यावतंसश्रीशिवदासपंडितात्मजश्रीवनमालिभट्टविरचितायां वनमालिसंजीविन्यां श्री
गीतगोविंदटीकायां मानिनीमानापनोदने मुग्धमधुसूदनो नाम दशमः सर्गः १० एकादशोनुनयतः प्रसन्नां संविनाव्यता
म् उवाच काचिदङ्गना मुखे राधां सखी वचः एवं वहन्ननुनय प्रसन्नां राधां प्रति सख्याह सुचिरमिति कापि सखी प्रदोषे र
जनीमुखे स्फुरति दीप्यमाने सति राधां जगादोवाच वक्ष्यमाणमिति शेषः कीदृशे प्रदोषे दृष्टिमोषे दर्शनचोरके कस्मिन्स
ति केशवे श्रीकृष्णे सुचिरं बहुकालमनुनयेन मृगाक्षीं प्रीणयित्वा प्रसादयित्वा कुंजशय्यां लतागृहशयने गतवति प्राप्ते स

इतिश्रीगीतगोविंदे मुग्धमधुसूदनो नाम दशमः सर्गः १० सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतव
ति कृतवेशे केशवे कुंजशय्याम् रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगाद ६१

ति कीदृशे केशवे कृतवेशे कृताभिसारोचितवेशे श्राराधायां स्वस्मिन्वा संभोगसंपादनाय कृतालंकारण इत्यर्थः कीदृशीं राधा
म् रचिता रुचिरा मनोहरा भूषालंकारो ययासा ताम् कृष्णस्य स्वस्यवेति परस्परालंकारकरणेन परस्परं स्नेहः सूचितः पुनः कीदृशं
शीम् निरवसादां निर्गतो मानभंगादिरूपो ऽवसाद उपतापो यस्यास्तां प्रसन्नामित्यर्थः वेशो विधिघ्नभूषायां वेशो वेश्मनि कथ्यत

CC0. In Public Domain, Digitizagtion by eGangotri

गी० टी० अत्रार्थं गीतेन प्रपंचयति विरचितेति वसंतरागरूपकतालध्रुवानां स्वरूपमुक्तमेव हे मुग्धे सुंदरि राधिके
७६ मधुश्रीधरामृतरसं वसंतं वा स्वमाधुर्यसौंदर्यादिगुणेन मथ्नाति क्षोभयतीति मधुमथनः शृंगाररसास्वादनचतु
रस्त्वमनुसराश्लिगाढं नन्वनाकारिता कथं व्रजामीति चेत्तत्राह नहि शृंगाररसास्वादनचतुरं श्रयं सा स्वमानमा·
गः किंतु गौरवमेव कीदृशम् त्वद्गुणैस्त्वामेवानुगतमनुसृतम् तत्र हेतुमाह कीदृशम् विरचिता कृता प्राणेश्व

वसंतरागे रूपकताले विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम् संप्रति मंजुलवंजुलसी
मनि केलिशयनमनुयातम् मुग्धे मधुमथनमनुगतमनुसर राधिके ध्रुपदम् १

रिप्रसादे सादिचाटुप्रियवचनरचना तचनपरंपरा येन तम् अनुगतत्वमेवाह चरणेत्यत्र चरणे रचितः कृतः प्रणिपा
तः प्रणामो येन तम् तदानयनाय मच्चरणे कृतदंडवत् इति वा पुनः कीदृशम् संप्रति इदानीं त्वां प्रति मां संप्रेष्य मं
जुलो मनोहरो वेतसस्तस्य समीमनि मर्यादा विधौ निकुंजे यत्केलिशायनं क्रीडार्थं शय्या तामनुयातं प्राप्तम् अत ७६
स्त्वया शीघ्रं गंतव्यमिति मम प्रार्थना १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घने निविडे जघनस्तने कटितटनप्रदेशे यो भारस्तेन भाराधिक्यं यस्यास्तत्संबोधनम् श्रीकृष्णार्पणं विना जघनस्तनेके वलं भारमात्रमिति ध्वनिः अतः श्रीकृष्णमुखरितं कृतरणत्कारं मणिखचितमंजीरं नूपुरं यथा स्यात्तथा नूपेहि समीपं गच्छ किंच दरईषन्मंथरं मंदगतिचरणविहारं पादन्यासं यथा स्यात्तथा मरालानां राजहंसानां विकारं विलासं विधेहि कुरु एवं राजहंसगत्यापि यं रंजयेत्यर्थः अथवा कादृशं मधुमथनं दरं खल्कोपेन मंथरामंदाचरणे यो विहारो गतिर्यस्य तम् अथवा कीदृशम् मुखरिताकृतरणत्कारा मणिमयी मंजीरा मेखला यस्य तम् पुनः

घनजघनस्तनभारभरे दरमंथरचरणविहारम् मुखरितमणिमंजीरमुपेहि विधेहि मरालविकारम् २
शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावम् कुसुमशरासनशासनवंदिनि पिकनिकरे भज भावम् २

कीदृशम् मरालस्य कामस्य विकारो पीडा यस्य तम् कामस्य नामांतरं मराल इति मम मनोरंजनाय नव सर्वेषां एतदनुगतत्वं प्रपंच्य तदुद्दीपनविभावानाह शृण्वित्यादिना तरुणीजनमोहनस्य मधुरिपोस्तव विरहेण मधु अत्यन्ताधिकाधरामृतं मधुर्द्वंसतो वा रिपुर्यस्य तस्य श्रीकृष्णस्य रावं मुरलीरणत्कारं तत्र गत्वा शृणु कीदृशम् रमणीयतरं अतिशयेन मनोहरम् किंच पिकनिकरे कोकिलसमूहे भावं श्रीकृष्णसंभोगानुरागम् कीदृशम् रमणीयतरं अतिशायेन मनोहरम् किंच पिकनिकरे कोकिलसमूहे भावं श्रीकृष्णसंयोगानुरागं भज कीदृशे कुसुमशरासनस्य कामस्य शासनमाज्ञा तस्या वंदिनि स्तावके एतेनापि न श्रीकृष्णेऽभिप्रायं विधेहि इति भावः

Dr. Urmila Sharma Collection, Varanasi

हिर्गागलद्वत्रिस्रोन्नतमूर्ह तरुणीजनानां मोहने वशीकरणे द

गी०टी० किंच हे करभोरु कनिष्टांतो मणिवंधपर्यंतः करतलस्य वहिर्भागलद्वत्रिस्रोन्नत मूर्ह तरुणीजनानां मोहने वशीकरणे द निलेन वायुना तरलश्चंचलो यः

११ येपस्यात्तत्संवोधनं गतिं गमनं प्रति विलंवं मुंच त्यज यतो लतानिकुरंवं लतासमूहो निलेन वायुना तरलश्चंचलो यः अनेनाचेतनाऽपि वृंदावनगत ना!

किशलयनिकरः पल्लवसमूहस्तद्रूपेण करेण प्रेरणमिव त्वयापनमिव करोति अनेनाचेतनाऽपि वृंदावनगत

तरुलताः श्रीकृष्णानुरागोदये त्वामेव प्रेरयंति त्वय्यनुरागं च वोधयंति किमस्माकं चेतनानां सखीनां चित्रमिति भावः

अतस्त्वैवमहज्ञाप्यमिति ध्वनेः मणिवंधादा कनिष्टं करस्य कराभोवहिरित्यमरः निकुरंवः कदंवकुरंवमपि समूहे निकु

रवस्यात्कूजितेपि चेतिहलायुधः पिकादयन्त्रद्दीपनविभावाः ४ किंच हे प्रिये त्वं अमुं कुचकुंभं प्रियागमनमंगल

अनिलतरलकिशलयनिकरेण करेण लतानिकुरंवम् प्रेरणमिव करभोरु करोति गतिं प्रति मुंच विलंवम्

४ स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभम् पृछ मनोहरहारविमलजलधारममुं कुचकुंभम् ५

कलशं पृछ सहचरीसम्यक् वदति न वेति प्रश्नं कुरु वर्तुलत्वात्पीनत्वाच्च कुंभसाम्यं कुचस्य कीदृशम् अनंगस्य कामस्य

तरंगवशादिव स्फुरितं सकंपम् कमोत्र यथोचित्यानायः कलशास्तरंग निपतितः स्फुरतीति भावः कीदृशम् सूचित

हरिपरिरंभं सूचितो ज्ञापितो हरेः श्रीकृष्णस्य परिरंभो आलिंगनं येन तम् हरिजलनिधेरेव तव कुचकलशः पूर्णोभवि

ष्यतीति कलशाच्छादनमिति ध्वनिः पुनः कीदृशम् मनोहरो यो हारो मुक्ताहारः स एव विमलजलधारा यत्र तादृशम्

एतेन स्तनकलशस्य यौवनरसपूर्णत्वं ध्वनितम् कंपः सात्विकभावजः प्रियागमनशंसी निस्पंदात्पीस्तनेकंपः प्रियसमा

गमसूचक इतिनरते ५

CC0. In Public Domain, Digitizagtion by eGangotri

एवंवचनप्रसन्नां मालतीसखी लज्जितां प्रत्याह अधिगतमिति हे चंडि कोपने मुरलोऽङ्गे वा इदं तव वपुरखिलसखीभिः रतिरणेसु
रतसंग्रामे सज्जं कृतालंकरणादिसन्नद्धं वा अधिगतं ज्ञातं तासां वक्रधा विज्ञातेऽर्थे कालक्षेपो तिभावः कीदृशम् वपुः रसिता शब्दा
यमाना रसनाक्षुद्रघंटिका च सैव रवो डिंडिमो वाद्यविशेषो यत्र तादृशम् कृष्णम् अभिसर ओ कीदृशम् सरसं शृंगाररसहि
तम् कीदृशम् अलज्जं सुरतनिःशंकं अथवा क्रियाविशेषणम् वपुर्विशेषणं च पदत्रयम् ६ अभिसरणमेवाह हे प्रियेक
रेण सखीमवलम्ब्य सलीलं लीलाशृंगारचेष्टा वा सहितं यथा तथा चल गच्छ कीदृशेन स्मरशरवत् कामबाणवत् सुभगा सुंदरा

अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जम् चंडि रसितरसनारवडिंडिमम् अभिसर सरसमल
ज्जम् ६ स्मरशरसुभगनखेन सखीमवलंब्य करेण सलीलम् चलवलयक्वणितैरवबोधय हरिमपि निजग
तिशीलम् ७

नखो यत्र अन्यत्रापि सैरन्ध्र्यो स्त्वापि निवेसन्तरत्वं नखा एवेसतः स्मरसहायैव गच्छेति भावः किंच त्वङ्गाल्वावलयक्वणितैः कं
कणकंकारैर्हरिमपि मनोहरमपि अहमागतेत्यवहितं बोधय ज्ञापय अन्योपि वीरः प्रतिभटमवहितं कृत्वा युध्यत इति ध्व
निः कीदृशम् निजगमना निजगमनेन तव समीपमागते नुशीलं स्वभावो यस्य अथवा निजे आत्मनि गतिर्गमनं यस्य स नि
जगतिः कामस्तस्मिन्ननुशीलं चित्तैकाग्र्यं यस्य स्म राधीनमित्यर्थः ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वि ४ तेषां २ तरं १

श्रीजयदेवेन भणितं हरिविनिहितमनसां कृष्णनिविष्टचितानां अविरामं निरंतरं कुंजप्रदेशेऽधितिष्ठतु आश्रयतु अधि॰
गी॰टी॰ श्रीजयदेवेन भणितं हरिविनिहितमनसां कृष्णनिविष्टचितानां अविरामं निरंतरं कुंजप्रदेशे अधितिष्ठतु आश्रयतु अधिः अधरीकृतः स्वगुणैर्हीनी
भूतः स्थासां कर्मसिद्धिकरणे द्वितीया एतद्धारणमात्रेणैव कंठशोभा भवतीति भावः कीदृशाम् अधरीकृतः स्वगुणैर्ही
१८ नीकृतो हारो मुक्ताहारो येन पुनः कीदृशाम् उदासिताः स्वगुणैः स्वहृतावामैः सुंदर्यो येन हरिसुरतवर्णनेन जयदेवभ
णितम् मणिहारेभ्योऽप्यधिकमिति भावः ८ एवमनभिगच्छंतीं श्रीकृष्णस्तदुत्कंठां निरूपयति साभामित्यादिना हेस
खि सा राधा मां द्रक्ष्यति आदरेण द[redacted] स्यति दृष्ट्वा स्मरकथां मनोहरानंगकेलिवार्त्तां वक्ष्यति वदिष्यति अनंगालापं कृत्वा
प्रत्यंगं प्रति अवयवं प्रति आलिंगनैः प्रीतिं हे हं यास्यति प्राप्स्यति प्रीता सती मया सह रंस्यते क्रीडिष्यति इत्यनेन प्रकारेण चिं

श्रीजयदेवभणितमधरीकृतहारमुदासितवामम् हरिविनिहितमनसामधितिष्ठतु कंठतटीमविरामम् ८
सामां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यंगमालिंगनैः प्रीतिं यास्यति रंस्यते सखि समागत्येति चिंताकुलः स त्वां पश्यति
म॰ ईति वेपते पुलकयत्यानंदति खिद्यति प्रत्युज्जृंभति स्थिरतमः पुंजे निकुंजे प्रियः ९८

ताकुलः चिंतायुक्तः स प्रियो हे सखि श्रीकृष्णो निकुंजे लतामंदिरे स्थिरतमःपुंजे निश्चलांधकारसमूहे समागत्य त्वां पश्यति त्व
द्रियावेपते कंपते एतेन प्रथमसमागमावस्थामनुभवतीति ध्वनिः तच्चिह्नमाह पुलकयत्यगानि तवालिंगनं विज्ञाय त्वत्स
धं २ श्रीसुखेन पुलकांगो भवतीति निः किंच सुरतकेलिं स्मृत्वानंदति सानंदो भवति किञ्च सुरतसुखं विज्ञाय खिद्यति प्रस्वेदयुक्तो भ ७८
वति किंच त्वामागतां पुरतो विज्ञाय प्रत्युज्जृंभति प्रत्युत्थानं करोति किंच त्वामदृष्ट्वा मूर्छति क्लेशं प्राप्नोति किं बहुना कर्त्तव्यं
गोपालभूपस्यांतिकं त्वया गंतव्यमिति मम प्रार्थना ९८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गमनकालेयोग्यमंधकारंवर्णयति अक्ष्णोरिति हेसखिराधे ध्वांतेनिविडांधकारेविषमेनिकुंजेसर्वतःकुंजलतामंडपे
सुदृशांसुंदरीणांप्रसंगंअवयवंप्रतिआलिंगति तद्वदालिंगनव्याजेनास्मिन्त्वयागंतव्यमितिभावः कीदृशंध्वांतम्
अक्ष्णोर्नेत्रयोरंजनंकज्जलम् निक्षिपत्विस्मयत् श्रवणयोःकर्णयोस्तापिच्छगुच्छावलींतमालस्तवकश्रेणींनिक्षिपदि

अक्ष्णोर्निक्षिपदंजनंश्रवणयोस्तापिच्छगुच्छावलींमूर्ध्निश्यामसरोजदामकुचयोःकस्तूरिकापत्र
कम् धूर्तानामभिसारसत्वरहृदांविष्वग्निकुंजे सखिध्वांतंनीलनिचोलचारुसुदृशांप्रसंगमालिंगति
६९

तिसर्वत्रयोऽन्यम् किंच मूर्ध्निश्यामसरोजदामनीलोत्पलमालाम् किंच कुचयोःस्तनयोःकस्तूरिकापत्रकंमृगमद
पत्ररचनाम् कीदृशंध्वांतम् नीलनिचोलचारुनीलवस्त्रवत्चारुमनोहरम् कीदृशीनांसुदृशाम् धूर्तानांपरवंचक
नाम् पुनःकीदृशीनाम् अभिसारेसत्वरंहृद्यासांतास्तासांधूर्तःस्याद्वंचकेलोलेचेतिहारावली तापिच्छस्तमा-
लकस्त्वपि ६९

Dr. Urmila Sharma Collection, Varanasi

गी०टी आस्तां तावदभिसरणं त्वत्स्मरणपरीत्तार्थमेतदुच्यते काश्मीरेति हे राधे एतत्तमिस्रमंधकारं तत्रैव मतासामभिसारिका-
णां प्रेमप्रीतिस्तदेव हेमसुवर्णं तस्य निकषोपलतां घर्षणपाषाणतां तनोति विस्तारयति ध्वांतालिंगनं यदीदृशं तर्हि कृष्णालिं-
७९ गनं कीदृक् नविष्यतीत्यमूल्यप्रणयः सूचित इति ध्वनिः कीदृशम् तमालपत्रवन्नीलतममतिशयेन श्यामम् कीदृशम् त-
त्रैव हेमत्वं अभिसारिकाणामभितः सर्वतः रुचिमंजरीभिः कांतिकिरणैरावद्धा कृता रेखा येन कीदृशीनाम् काश्मीरं कुंकुमं
तद्वद्गौरं पीतं वपुर्यासाम् एतेन सौंदर्यप्रभावत्वाकल्पं चाभिसारिकाणां सूचितमिति ध्वनिः तादृशांधकारेभिसरंतीत्यभि-

काश्मीरगौरवपुषामभिसारिकाणामावद्धरेखमभितो रुचिमंजरीभिः एतत्तमालदलनीलतमं तमिस्रं तत्
प्रेमहेमनिकषोपलतां तनोति १० हारावलीतरलकांचनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य
द्वारे निकुंजनिलयस्य हरिं निरीक्ष्य व्रीडावतीमथ सखी प्रियमित्युवाच ११

सारिकाः १० किंच हारावलीति अथानंतरं सखी राधां निजगाद पुनरप्युवाच कीदृशीं निकुंजनिलयस्य चौरमंदिरस्य द्वारे खां-
गदीस्थां धकारे हरिं निरीक्ष्य व्रीडावतीं लज्जावतीं कीदृशस्य हारावल्यो मुक्ताहारश्रेण्यस्तासां तरलो यो मध्यमणिर्मध्यनायकः
कांचनस्य सुवर्णस्य कांचिदाम मेखलादाम मंजीरं नूपुरं कंकणं करभूषणमेतेषु खचिता ये मणयस्तेषां द्युत्या दीपित- अं च०ने
स्य प्रकाशितस्य निनीयवा पाठः प्रियमित्युवाचेति पाठः व्रीडावतीं राधामानीय प्रियं हरिमुवाचेति वा यो जनातरलः खेद्र हारम-
ध्यमणावपीति विश्वः निलयश्चौरमंदिर इति हारावली ११

CC0. In Public Domain, Digitizagtion by eGangotri

वराडीरागमंठताले रागतालध्रुवपदानां लक्षणमुक्तमेव श्लोकोक्तं गीतेनाह मंजुतरेत्यादिना हे राधे इह अस्मिन् मंजुतरं म
नोहरतरं यन्निकुंजतलं लतान्तरदेशस्तदेव केलिसदनं क्रीडामंदिरं तस्मिन् माधवसमीपं प्रविश त्वं तत्र विलस विहारं कुरु
एतेन विहारातिशयस्तूक्तः कीदृशे केलिमंदिरे राधेऽरःकामोऽधिकाधिको यत्र तादृशे रतिरसालसेन सुरतोल्लासेन हसितवदनं यस्या
स्तत्संबुद्धिः १ कीदृशे नवभवदलसदशोकदलपत्रं तन्निर्मिते शयने प्राप्यायांसारो रत्नेयस्य तादृशे राधासंबोधनं
कुंजविशेषणं वा पुनः कीदृशे कुचयोस्तनयोर्मध्ये निपतितश्चंचलो वा हारो मुक्ताहारो यत्र तादृशम् संबोधनं कुंजविशेषणं वा

वराडीरागे मंठताले मंजुतरकुंजतलकेलिसदने प्रविश राधे माधवसमीपमिह विलस रतिरभसहसितवदने
ध्रुपदम् १ नवलसदशोकदलशयनसारे प्रविश राधे माधवसमीपमिह विलस कुचकलशतरलहारे २ कु
सुमचयरचितशुचिवासगेहे प्रविश राधे माधवसमीपमिह विलस कुसुमसुकुमारदेहे ३

श्रीकृष्णपक्षे काकाक्षिगोलकन्यायेन श्रीराधासंबोधनं सदनविशेषणं वा हे माधव समीपं प्रकारणान्तराधायाः समीपमिह
कुंजसदने प्रविश्य विहरेति च सर्वत्र योजना ज्ञातव्या १ किंच कुसुमेति कीदृशे इह कुसुमचयेन पुष्पसमूहेन रचितं कृतं शुचिः शृं
गारस्तद्योग्यवासगृहं शयनमंदिरं यत्र कीदृशे कुसुमवत्सुकुमारो देहो यस्याः तादृशे राधाविशेषणं वा अन्यत्पूर्ववत् रं
कामोत्पादके कंदर्पयुद्धे अधः कंपनेतद्ये त्यनेकार्थः ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰टी॰ एवमनन्तिगच्छंतीप्रत्याह किंच कीदृशोहरे चलः संचारी यो मलयपवनस्यंदनवायुस्तेन सुरभौ सुगंधे शीते च शीतमंदसुगं
धसे वितरस्यार्थः कीदृशो रतौ सुरतौ वलितं कृतं ललितं मनोहरं गीतं यत्र राधासंबोधनं वा ललितलक्षणं नानाविधमनोहार्यं
८० स्त्नावजमनोहरं शृंगाररचेष्टितं स्त्रीणां ललितं सुप्रचक्षत इति कृष्णपक्षे सर्वं पूर्ववत् ४ किंच विततेति सुचिरं कृकाले विलं
सेतिसंबंधः पुनः कीदृशोहरे वितते विस्तीर्णे बकुलवल्लीनां नानालतानां पल्लवैर्घने निविडे अलसे सालसपीने स्थूले जघने

चलमलयवनपवनसुरभिशीते प्रविशराधेमाधवसमीपमिहविलसरतिवलितललितगाते ४ विततब
कुलवल्लिनवपल्लवघने प्रविशराधेमाधवसमीपमिहविलससुचिरमलसपीनजघने ५ मधुमुदितमधुपकु
लकलितरावे प्रविशराधेमाधवसमीपमिहविलसमदनरसरभसभावे ६

यस्मात्तत्संबोधनं रायनविशेषणं वा हे माधवेत्यादि पूर्ववत् वलितं मरसंप्रोक्तं वलितं चेष्टितं तथेति मेदिनीकारः ५ किंच
मधुमिति कीदृशोहरे मधुना वसंतेन पुष्परसेन वा मुदितानि मधुपकुलानि भ्रमरसमूहास्तैः कलितो विरचितो रावः शब्दो यत्र ता
दृशो पुनः कीदृशो मदनस्य कामस्य यो रसः शृंगारस्तत्र यो रभसस्तत्साहस्तेनोपलक्षितो भावोऽभिप्रायो यस्मिन् संबोधनं ८०
वा अन्यत्पूर्ववत् ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच मधिवति कीदृशेऽह्ह मधुरतरोतिशयेन मधुरो यः पिकनिकराणां कोकिलसमूहानां निनदः शब्दस्ते न मुखरे वाचाले श्रीदृपश्रानुप्रासं वो धनं च दशनादंतास्तद्रुचिव तरु चिरं मनोहरं माणिक्यं दाडिमीवीजा। नेताहृशीदंतकांतिर्यस्यास्तत्संबोधनं पक्वदाडिमवीजानां माणिक्यं शिखरं चिवुरितिशास्वतः ७ गीतोक्तां लीलांमं

मधुरतरपिकनिकरनिनदमुखरे प्रविश राधे माधवसमीपमिह विलसदशनरुचिरुचिरशि
खरे ७ विहितपद्मावतीसुखसमाजे कुरु मुरारे मंगलशतानि भणति जयदेवकविराजराजे ८

गलत्वेन निरूपयति विहितेति हे राधे जयदेवकविराजराजे कविनृपनृपे मंगलशतानि भणति सति कुरु श्रीकृष्णं प्रतिगमनमिति शेषः अथवा हे मुरारे हे कृष्ण त्वं जयदेवकविराजराजे भणति सति श्रोतृणां पाठकानां च मंगलशतानि कुरु कीदृशे विहितः कृतः पद्मावत्याः सुखस्य समाजः समूहो यत्र तादृशे अनेन स्वनायिकायां प्रेमातिशयो नलः सख्या
मितिभावः ८

Dr. Urmila Sharma Collection, Varanasi

पातुं २ वधून

एवमप्यप्रसन्नांपुनःप्रसादयंस्ताह त्वामित्यादिना हेसखि अस्मद्वर्जनं दुरापोप्ययंश्रीकृष्णस्तवैवसुलभः तवसुधया
गी०टी० तेनसंबाधंसांद्रंविंबाधरंपानंकर्तुमिच्छति कीदृशः त्वांचित्तेनमनसा चिरंसर्वदावहन्नतिश्रांतोतिशयश्रमयुक्तः किं
८१ च कंदर्पेणकामाग्निनाचभृशमतिशयेनतापितोदग्धः अन्योपिमाराक्रांतो मधुरपानादिना स्वामिन्याचर्यतइति
भावः तत्तस्मादिममनुरक्तमस्यास्यकृष्णस्यांकमुत्संगंक्षणंक्षणमात्रमलंकुरुभूषय वङ्कुवल्लभोयंकृष्णइतिमत्वेहास्मिन्नूह
लिकृतः संभ्रमःसंदेहः तत्रहेतुः दासइवसेवके कीदृशी भ्रूक्षेपःकटाक्षपातोमदीयोयमितिविलोकनेतस्यालक्ष्मीःशो

त्वांचित्तेनचिरंवहन्नयमतिश्रांतोभृशंतापितःकंदर्पेणचपातुमिच्छतिसुधासंबाधविंबाधरम् अस्यांकं
तदलंकुरुक्षणमिहभ्रूक्षेपलक्ष्मीलवक्रीतेदासइवोपसेवितपदांभोजेकुतःसंभ्रमः ७२ सासाध्वस
मानंदंगोविंदेलोललोचना सिंजानामंजुमंजीरंप्रविवेशनिवेशनम् ७३

भातदेवधनंतस्ययोलवः अल्पमोल्पंनेत्रकोणनिरीक्षणंतेनक्रीतेगृहीते पुनःकीदृशे तवैवोपसेवितंपदांभोजंचरणक
मलंयेन ७२ एवमनुनयसंतुष्टानिकुंजंप्रविवेशेत्याह सेति साराधानिवेशनंकेलिमंदिरंप्रविवेश किंकुर्वती मंजुमंजीरंम
नोहरंनूपुरंसिंजानावादयंती ससाध्वसंसुरतभयसहितंसानंदमानंदसहितंयथास्यात्तथा कीदृशी गोविंदेलोलेचंचले
लोचनेयस्याःसासिंजानेतिसात्विकःकंपेनचरणस्खलनेसाध्वसहर्षौव्यभिचारिभावौ लोललोचनेतिरसानुभावःकटाक्षः ए ८१
तेनशृंगाररसःसांगस्तयोर्मिलनेसंजातइतिनिरूपितम् ७३

CC0. In Public Domain, Digitizagtion by eGangotri

रागतालक्षवपदानि पूर्ववत् एवं निकुंजमंदिरप्रवेशं तां संप्रति हरिदर्शनमहोत्सवमाह राधेति सा राधा हरिं ददर्श कीदृ
शम् राधावदनचंद्रविलोकनेन विकसितायेमानाविकाराअंगादिमर्दनायास्ता एव विशिष्टो भ्रमो यो यत्र तम् कमिव जल॰
निधिमिव समुद्रमिव कीदृशम् जलनिधिम् विधुमंडलदर्शनेन चंद्रमंडलावलोकनेन तरलिताश्चंचलीकृतास्तुंगाउच्च
तास्तरंगाः कर्मयो यत्र तम् अत्रापि शृंगाररसत्वेन जलधिसाम्यम् श्रीराधामुखस्य चंद्रसाम्यं जंगमहोदानां तरंगसाम्यम्
कीदृशं एकः शृंगाररसोऽनुरागो यस्य तम् यद्वा एकस्यां राधायां रसोऽनुरागो यस्य नाम्नासु तम् कीदृशम् चिरं वक्रकाल

वराडीरागे रूपकताले राधावदनविलोकनविकसितविविधविकारविभंगम् जलनिधिमिव विधुमंडलद
र्शनतरलिततुंगतरंगम् १ हरिमेकरसं चिरमभिलषितविलासम् सा ददर्श गुरुहर्षवशंवदवदनमनंगनिवा
सम् ध्रुपदम् १ हारममलतरतारमुरसि दधतं परिरम्य विदूरम् स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरम् २

मभिलषितो वांछितो विलासः केलिर्येन तम् अथवा चिरमभिलषितः प्रार्थितो विलासो राधासंबंधि क्रीडा येन तम् कीदृशम्
गुरुर्महान् यः प्रियादर्शनात् हर्ष आनंदस्तस्य वशंवदं अधीनं वक्त्रं यस्य तम् पुनः कीदृशम् अनंगविकारांकानामं मंदिरं मन्मथकोटि
काशामित्यर्थः १ कीदृशम् विदूरमतिशयेन परिरभ्यालिंग्य उरसि वक्षसि हारं दधतं बिभ्राणम् कीदृशं हारम् विमलतरस्तारोऽतिवि
मलं मौक्तिकं यत्र तम् किमिव स्फुटतरः प्रकाशावकुलोयः फेनकदंबः फेनसमूहः तेन करंबितं मिश्रितं यमुनाजलपूरं प्रवा
हमिव अत्र रूढद्युतेः कल्लोलत्वेन यमुनायाः साम्यं हारस्यातिविमलत्वेन फेनसाम्यम् २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनःकीदृशंहरिम् श्यामलंनालंमृदुलंकोमलंशरीरमंडलंशरीरस्यप्रसंगंयस्यतम् कीदृशम् अधिगतंपरिहितंपियोगौरसादृ
गी० टी० रूपाङ्गौरडकूलंपीतांवरंयेन कमिव पीतपरागानांगौरपुष्परेणूनांपटलभरःसमूहातिशयस्तेनवलयितंवेष्टितंमूलंयस्य
८२ तादृशंनीलकमलमिव अत्रश्रीकृष्णस्यश्यामलत्वेनपरागसमूहस्यपीतत्वेनांतर्बहिर्मूलेपरागावृतत्वादद्भुतोपमैव नु कीदृशं
हरिम् तरलानांचंचलानांकटाक्षाणांचलनेनमनोहरंयद्वदनंतेनजनितोरतिरागःसुरतानुरागोयेनतमर्थाद्राधायाःएतेनद
र्शनसौख्यस्यपराकाष्ठादर्शिता कीदृशम् स्फुटानांविकाशितानांकमलानामुदरेमध्येखेलितानिक्रीडायुक्तानिखंजनयुगा

श्यामलमृदुलकलेवरमंडलमधिगतगौरडकूलम् नीलनलिनमिवपीतपरागपटलभरवलयितमूलम्
न तरलदृगंचलचलनमनोहरवदनजनितरतिरागम् स्फुटकमलोदरखेलितखंजनयुगमिवशरदितडागम् ४

निखंजनरीटपक्षियुगलानियत्रतादृशंशरत्कालेतडागमिव सरोवरंयथाभवतितथाश्रीकृष्णःश्रीराधादर्शनेनजातात्पर्यः
अत्रेयंव्यवस्था तडागस्थानीयःश्रीकृष्णःविकशितकमलस्थानीयंतस्यनेत्र कमलोदरस्थानीयंनेत्रयोर्मध्यभागंखेलितखंजन
स्थानीयेतन्नेत्रगोलकेशारदस्थानीयाश्रीराधेतियथावद्योपमुन्नेयम् श्रीराधाशरत्संयोगेनश्रीकृष्णचंद्रस्यविकाशोजातइतिध्व ८२
निः ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंदृशं हरिम् श्रीराधावदनकमलस्य परिशीलनेनासादरावलोकनेन मीलिते स्थिरीभूते मिहिरसमे सूर्यसदृशे कुंडले तयोः शोभा यस्य तम् तौ विना स्मरणशोभापि न्नारवहेति ध्वनिः यथा सूर्यदर्शनेन कमलप्रकाशस्तथा श्रीराधावदनसूर्यप्रदर्शनेन श्रीकृष्णवदनकमलप्रकाशो जात इति प्रेमपराकाष्ठादर्शिता कीदृशं हरिम् स्मितरुच्याईषद्धास्यकांत्या रुचिरो मनोहरस्तथा मुल्लसितो राधाधरपानोत्कंपितो योधरपल्लवस्तेन कृतो राधायां रतिलोभः सुरतलाभो येन तम् यथा सूर्यमंडले कमलश्री

रुचि

वदनकमलपरिशीलनमीलितमिहिरसमकुंडलशोभम् स्मितरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम् ५ शशिकिरणछुरितोदरजलधरसुंदरसकुसुमकेशम् तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशम् ६

स्तथा श्रीराधामुखे श्रीकृष्णस्य सुरतेच्छेति ध्वनिः अनेन श्रीराधायामेव तस्य रतिलोभः सूचितो नान्यत्र ५ कीदृशम् शशिकिरणैः छुरितं कर्बुरितमुदरं यस्य जलधरस्य तद्वत्सुंदराः सकुसुमाः केशा यस्य तम् पुष्पाणां चंद्रकिरणैः साम्यम् केशानां वलाहकसाम्यम् एतेन नायकस्य नायिकादर्शनेनातिशृंगारित्वमुक्तम् कीदृशम् तिमिरेंधकारे उदितं यद्विधुमंडलं चंद्रबिंबं तद्वन्निर्मलो यो मलयजतिलकस्तस्य निवेशो रचनाविशेषो यस्य तम् तिलकस्य वर्तुलत्वात्पूर्णचंद्रसाम्यम् एतेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशम् विपुलैर्विस्तीर्णैः पुलकभरैरोमांचितसमूहैर्दंतुरितं व्याप्तम् अनेनापि नायकस्य नायिकादर्शनेन रोमांचउक्त
गी०टी० इति ध्वनिः कीदृशम् रतिकेलिकलाभिः सुरतक्रीडायां चुंबनालिंगनादिकामकलाचातुरीभिरधीरं चंचलम् अथवा रतिकेलि
८३ कलाभिरुपलक्षिता श्रीराधा तस्या दर्शनेनाधीरं एतेन नायकस्य नायिकादर्शनेनातिव्याकुलतेति ध्वनिः कीदृशम् मणिगणानां
आभरणखचितरत्नसमूहानां किरणसमूहैः समुज्वलानि दीप्यमानानि भूषणान्यंगाभरणानि तैः सुभगं सुदरं शरीरं यस्य तम्
अथवा राधाया मणिगणकिरणसमूहेन समुज्वलभूषणैः सुभगं शरीरं यस्य तम् अथवा श्रीराधांगान्येव मणिगणकिरणसमूह
समुज्वलभूषणानि तैः सुभगं शरीरं यस्य तम् १ श्रीकृष्णभजनं शिक्षयन् सर्वाननुपदिशति श्रीजयदेवेति हे रसिकाः सुचिरं नितरां

विपुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरम् मणिगणकिरणसमूहसमुज्वलभूषणसुभगशरीरम् प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृ
तोदयसारम् १ श्रीजयदेवभणितविभव[illegible]द्विगुणीकृतभूषणभारम् ८

हरिं साधूनां भजनानुसारेण पापतापहरं हृदि विनिधाय हृदये आरोप्य प्रणमत मा एव भजनीयो नान्य इति नमत तन्नमनमेवसंबं
त्यु२ करिष्यतीति पदेशः कीदृशम् सुकृतस्य पुण्यस्योदयेन सारं प्राप्तिर्यस्य तम् स गतावितिधातुः हरिस्मरणभजनं सुकृतेन प्राप्यत इति ८३
प्रसिद्धिः पुनः कीदृशम् श्रीजयदेवभणितस्य गीतस्य विभवेन सामर्थ्येन जयदेवसरस्वत्या स्वगुणवर्णनैर्वेति द्विगुणीकृतो भूष
णभारो ऽलंकारसमूहो येन जयदेवसरस्वती स्वयमेवोपमालंकारवती भगवद्गुणैश्च सुतरामलंकृतेति भावः ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संप्रतिश्रीराधायाःश्रीकृष्णदर्शनेनहर्षंदर्शयन्नतिक्रम्येति इदानींतत्क्षणेप्रियतमंसमालोकसमयेकृष्णावलोकनकालेरा
धायाःश्रवणौनेत्रयोर्हर्षाश्रुनिकरःसात्त्विकभावेनानंदजलसमूहःपपात कइव अपांगंनेत्रप्रांतमतिक्रम्यश्रवणपथस्यकर्ण
मार्गस्यपर्यंतंगमनप्रयासेनैवस्वेदांबुपूरइवप्रस्वेदजलपूरइव कीदृशयोरक्ष्णोः श्रीकृष्णदर्शनात्निकोत्पत्यातिशयेनचं
चलत्वंप्रापितयोः प्रायशःश्रीराधादर्शनात्श्रीकृष्णस्याप्येतानिचिह्नानिजातानीतिध्वनिः ७४ पुनस्तदेवप्रकारांतरेणाह भ
जंसाइति मृगदृशोमृगाक्ष्याराधायाःतस्याःनेत्राप्यापांतेनजंसाःप्राक्भवेसाःअवहितेसावधानेआलीपरिजनेसखीसेवक

अतिक्रम्यापांगंश्रवणपथपर्यंतगमनप्रयासेनैवाक्ष्णोस्तरलतरभावंगमितयोः इदानींराधायाःप्रि
यतमसमालोकसमयेपपातस्वेदांबुप्रसरइवहर्षाश्रुनिकरः ७४ भजंसास्तल्पांतंकृतकपटकंडूतिपि
हितस्मितेयातेगेहाद्बहिरवहितालीपरिजने प्रियास्यंपश्यंत्याःस्मरकृतरसाकूतसुभगंसलज्जावलज्जापि
व्यगामदतिदूरंमृगदृशः ७५

वोगेहाद्बहिर्यातेअतिलज्जासखीवदूरमतिशयेनव्यगामदतिदूरमगात कीदृशेपरिजने कृतंकपटेनकर्णादिकंडूय
नेनपिहितंस्मितंहास्यंयेनतस्मिन् कीदृशःप्रियास्यंकृष्णमुखंपश्यंत्याः कीदृशम् स्मरकृतासेनकामरसेनाकूतंक्रीडा
विलासस्तेनसुभगंसुंदरम् आकूतंस्यादभिप्रायेकामेक्रीडितेध्वनितार्थकइतिहलायुधः ७५ सर्गांतेकविराशिषमाशास्ते मु
रजितःश्रीकृष्णस्यभुजदंडोजयतिसर्वोत्कर्षेणवर्त्तते कीदृशः प्रकीर्णःसर्वत्रसंलग्नःअसकृद्विंदवोरुधिरकणायत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्लि ४

वाहुदंडस्य२

गी०टी० कीदृशस्य भुजापीडस्यँ क्रीडयाहतः कुवलयापीडनामा करी हस्ती येन तस्य कर इव जयश्रिया विजयश्रीसपाविन्यस्तैर्नाना
८४ चनपाल्हिप्तैर्मन्दारकुसुमैः पारिजातपुष्पैर्महित इव पूजित इव पुनः कर इव स्वयं स्वयमेव सिंदूरेण द्विपस्य हस्तिनो रणे मुदानं
देन मुदित इव चिक्कित इव अथवा स्वयं आत्मना सिंदूरेण वीररसोदयेन द्विपेन द्वाभ्यां श्रीराधाकृष्णाभ्यां शृंगाररसं पिबतीति द्वि
पः कामस्तेन योरणः सुरतसंग्रामस्तत्र मुदानंदेन मुदित इव विचित्रित इव प्रकीर्णाकलेप्योक्तं विलोपातिपादवः १६ इतिश्री
मल्लस्यचंद्रसेवकोदाख्यावर्तसश्रीशिवदासपंडितात्मजश्रीवनमालिभट्टविरचितायां वनमालिसंजीविन्यां श्रीगीतगोविंदटी॰

जयश्रीविन्यस्तैर्महित इव मंदारकुसुमैः स्वयं सिंदूरेण द्विपरणमुदा मुदित इव भुजापीडक्रीडाहतकुवलया
पीडकरिणः प्रकीर्णासृग्बिंदुर्जयति भुजदंडो मुरजितः १६ इतिश्रीगीतगोविंदे अभिसारिकावर्णने एकाद॰
शः सर्गः ११ गतवति सखीवृंदे मंदत्रपाभरनिर्भरस्मरशरवशाकूतस्फीतस्मितस्नपिताधराम् सरसमसमं द
ष्ट्वा मुहुर्न्नवपल्लवप्रसवशयने निःक्षिप्ताक्षीमुवाच हरिः प्रियाम् ९९

कायामभिसारिकावर्णनमे एकादशः सर्गः ११ द्वादशोपार्थितां कांतां राधां संप्राप्य केशवः सुधांपल्लवशय्यायामुवाच स्मितमंजुलम्
१ गतवतीति सरसंशृंगाररसहितं यथा स्यात्तथा हरिः प्रियां श्रीराधां दृष्ट्वोवाच वक्ष्यमाणमिति शेषः कस्मिन्सति सखीवृंदे लज्जयाऽस॰
मेअनुपमं गतवति अपयाते सति कीदृशीम् अमंदा अधिका या त्रपा लज्जा तस्या भरो तिशयस्तस्या भावो वा तेन ये स्मरशराः कामवा
णास्तद्वशाद्यदाकूतमभिप्रायो विलासो वा तेन स्फीतं प्रवृद्धं यत् स्मितं माधुर्यं तेन स्नपितौ व्याप्तावधरौ यस्यास्ताम् पुनः कीदृ॰
शीम् मुहुर्वारंवारं नवपल्लवप्रसवशयने नूतनकिसलयपुष्पशय्यायां निःक्षिप्तनयनाम् एतेन सुरते त्वरा तस्याः सूचिता ९९

Dr. Urmila Sharma Collection, Varanasi

हरिःप्रियामाहेति यदुक्तं तद्गीतेनाह किसलयेति गीतस्यास्य विभासरागः तत्स्वरूपम् स्वछंदसंमानितपुष्पचापः प्रिया रसस्वादुरसान्वितस्सः पर्यंकमध्येस्यहृतोपवेशोभासोविपूर्वैः किलहेमगौरः तालध्रुवयोः स्वरूपमुक्तमेव हेराधिकेऽधुना मांअनुसरन्तंज कीदृशम् क्षणमनुगतंत्वदनुयद्क्षणमनुगामिनं आधीनंवा अथवा तवक्षणमधुनात्क्षणमधुरेणमदेनवसं तेनवानुगतंतवाधीनम् पुनः कीदृशंमाम् नापुरुषस्तस्यायंनारः शृंगारः स आयनमाश्रयोयस्यतम् तस्येदमित्यण्नडा दिभिःफकृतस्यायणादेशः एतेनशृंगाराश्रयोनारायणइतिसिद्धम् अथवा नराआपःनाराअप्सुजलानिवाअयनमाश्रयो

विभासरागेएकतालीताले किसलयशयनतलेकुरुकामिनिचरणनलिनविनिवेशम् तवपदप
ल्लववैरिपराभवमिदमनुभवतुसुवेशम् क्षणमधुनानारायणमनुगतमनुसरराधिके ध्रुपदम् १

यस्यतम् त्वद्वियोगानलसंतप्तत्वात् जलेवमामिरोदनंकरोमिवेतिभावः हेकामिनिचरणनलिनस्यप्रवेशंपल्लवतल्पेकुरुपवेशाय इदंतवपदपल्लववैरियतःशयनेतस्मात् पराभवंतत्कांत्यातिरस्कारमनुभवतुप्राप्नोतु कीदृशम् सुवेशंसुंदरम् पल्लवावानादिनाः लंकृतमपितवपदविपक्षंपल्लवंत्वच्चरणविन्यासपराजयंप्राप्नोतित्यर्थः अनेनात्मनायिकाशिरसिपादारोपःकृतोभविष्य तातिभावः१ किंच अहंतवचरणंकरकमलेनहस्तकमलेनकरोमिमंवाहयामि कथमितिचेत् यतस्त्वंविदूरमागमितासिश्रुति

CC0. In Public Domain, Digitizagtion by eGangotri

दूरं आगतासि सख्यानीतासीति वा अतः क्षणं नूपुरं शयनोपरि शय्यायामुपकुरु नूपुरं चरणयोर्निवेशयेत्यर्थः कमिव अनुग
 तीतवानुसरणे शूरं मामिव नूपुरानुगमनशूरत्वकथनव्याजेन तत्पादस्पर्शं प्रार्थयत इति भावः २ किंच अमृतमिव जीवन
 प्रदं वचनमनुकूलं सानुरागं रचय कथय कीदृशम् वदनमेव सुधानिधिश्चंद्रस्तस्माद्गलितं च्युतं आतापपरिक्षिप्ते ततर्हि शिरसि
स्थितं दुकूलं पट्टवस्त्रं विरहमिव वियोगमिवापनयामि दूरीकरोमि किमिति पयोधररोधकं स्तनाच्छादकम् एतेन नान्यत्र विरह
दुःखशांतिस्तत्रैवास्तीति ध्वनिः ३ किंच हे प्रिये वत्सले मदुरसि मम वक्षसि कुचकलशं निवेशयार्पय तदर्पणेन मनसिजस्य का

करकमलेन करोमि चरणमहमागमितासि विदूरम् क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम् २
वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम् विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम्
३ प्रियपरिरंभणरभसवलितमिव पुलकितमतिदुरवापम् मदुरसि कुचकलशं विनिवेशय मनसिजता शोषय
पम् ४

मस्य तापं संतापमात्मनो मम च शोषय नाशाय तत्स्पर्शमात्रेण कामपीडानिवृत्तिर्भविष्यतीति भावः कमिव प्रियस्य परिरंभे आलिं
गने योऽसौ रभसः स्पर्शौत्सुक्यं तेन वलितमिव व्याप्तमिव कीदृशम् पुलकितं संजातपुलकम् एतेन रसः पूर्यमाणः पुलकव्याजे
न बहिः स्फुरतीति ध्वन्यते पुनः कीदृशम् दुरवापमतिदुर्लभं त्वदन्यहेणवसलभमिति ध्वनिः कुचकलशपदं केलिसिंधुतरणायो
दुर ग्यमिति भावः कामज्वरे शीतलजलपूर्णकलशालिंगनं विधातव्यमेव यथा कलशांकास्य जलक्षतभाजनं तिरस्कृणो वदनज्वर
शांतये विरचयेति पुनः सखीजनोऽनलिनचंदनपंकजयोजनमिति ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमप्यप्रसन्नां प्रतिभीतइवाह हे भाविनि प्रशस्तान्तिप्राये अधरसुधारसं अधरामृतं उपनय समर्प्पय अधरवक्त्रसंयोगं कुर्वित्यर्थः किंचाधरामृतेन त्वां संत्वच्चरणानुवर्त्तिनं मां मृतमिव जीवय त्वदधरामृतपानेनैव मम जीवनं नान्यथेति भावः किंच त्वयि विनिहितमनसं त्वद्ध्यानेन दत्तचित्तम् किंच विरहानलेन दग्धवपुषं दग्धशरीरम् अतएवाविलासं विलासरहितम् एतेन दैहिकजीवनमात्रं कथितम् ५ किंच हे शशिमुखि चंद्रवदने श्रुतियुगले कर्णयुगे मणिरसनागुणं कांचीदाम मुखरय वाचालं कारय सुरतविपरीतविधायवाचालं कारयेत्यर्थः कीदृशम् अनुगुणः सदृशः कंठस्य निनादः कूजितं यत्र तम् किंच श्रुतियुगले पिकरुतैः कोकिलशब्दैर्विकले

अधरसुधारसमुपनय [redacted] जीवय मृतमिव दासम् त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम् ५ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादम् श्रुतियुगले पिकरुतविकले मम शमय चिरादवसादम् ६ मामतिविफलरुषा विकलीकृतमवलोकितुमधुनेदम् मीलति लज्जितमिव नयनं तव विरम विसृज रतिखेदम् ७ पु८

व्याकुले विरहिणां तन्नुनिर्दुःखदएव तदर्थेनावसादं संतापं मम शमयपनाशय रसनाकांचिद्विजिह्वयोरिति मेदिनीकारः ६ एवं श्रुत्वा किंचिद्विलोकयंती ईषत्प्रसन्नां प्रत्याह मामतीति हे प्रिये इदानीं तवेदं नयनं मामवलोकितुं ईषन्मीलति मुद्रां प्राप्नोति किमिव लज्जितमिव कृताविहिताचरणादिति कीदृशम् अतिविफलरुषा अतिशयनिरर्थकक्रोधेन विफलीकृतं प्रियावलोकनादिसुखवंचितम् नयनविशेषणं वा विरमनिःफलक्रोधात् रतौ खेदं श्रमं क्रीडादैन्यं वा विसृज त्यज सुरतमोहे माहशो विसृजेति ध्वनिः ७

Dr. Urmila Sharma Collection, Varanasi

गी०टी० श्रीजयदेवभणितं कथितं इदं गीतं रसिकजनेषु एतन्नाम्ना वितानः करोतु मनोरमं रतिजनकं रतिः संभोगः शृंगाररसं ना भावाः संचारिभा
विकादयस्तेषां वा विनोदं कौतुकं जनयतु उत्पादयतु कीदृशमिदम् अनुपदं प्रतिपदं निगदितो मधुरिपुमोदः कृष्णहर्षो यत्र तत्
८६ अथ पूर्वं संबंधः श्रीजयदेवभणितं श्रियः श्रीराधायाः दर्शनेन जयो आनंदो यस्य दीव्यति क्रीडति इति देवः स चासौ श्रीकृष्णस्तेन भ
णितं श्रीराधां प्रतिमामनुसरिष्यन्ननयवाक्यं कथितम् कीदृशम् अनुपदं निगदितं मधुरिपोः स्वस्य मोदो हर्षो यत्र तादृशम् अन्य
त्समानम् सुप्रीतिः प्रमदो हर्षस्त्स समरः ८ तमनुवर्ण्य प्रियं प्रतिना विसरतारंभमाह प्रत्यूहेति तयोः राधाकृष्णयोः स सुरतारम्भः प्रि

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदम् जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम्
८ प्रत्यूहः पुलकाङ्कुरेण निविडाश्लेषे निमेषेण च क्रीडाकूतविलोकनेऽधरसुधापाने कथानर्मभिः आनं
दाधिगमेन मन्मथकलायुद्धेपि यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारम्भः प्रियंभावुकः ७८

यंभावुकः प्रियंभवनशीलः परमसुखकर्त्ता वा उद्भूतः प्रकटो बभूव सकः यस्मिन् निविडाश्लेषे गाढालिंगने कर्त्तव्ये सुरतारम्भे पुल
काङ्कुरेण रोमोद्गमेन प्रत्यूहः आलिंगनविघ्नोभूत किंच यस्मिन् सुरतारम्भे सुरतक्रीडायां यदाकूतम् अभिप्रायपूर्वकमन्योन्यमवलो
कितं तस्मिन् निमेषेण पक्ष्मचलनेन प्रत्यूहोभूत किंच नैतावदपरमपि सुरतारम्भे ऽधरसुधापाने विक्षेपे कथानर्मभिः रहःक ८६
थाकौतुकैः प्रत्यूहोभूत किंच सुरतारम्भे आनंदाधिगमेन आनंदप्राप्त्या मन्मथकलायुद्धे कामवत् चतुःषष्टिकलाचितसंग्रामे प्रत्यू
होभूत एतैः सुरते विघ्नबाहुल्यं विपरीतरसस्पष्टत्वेन तावत् कथिता ७८

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दोर्भ्यामित्यादि दोर्भ्यां बाहुभ्यां सापराधइवालिंगनेसंयमितोयंत्रितः किंच पयोधरभरेणस्तनभारे
सुरतमेवविचित्ररसारंभेनदर्शयति दोर्भ्यामित्यादि दोर्भ्यां बाहुभ्यां सापराधइवालिंगनेसंयमितोयंत्रितः किंच पयोधरभरेणस्तनभारे
र्णपीडितः किंच पाणिजैर्नखैराविद्धः खंडितः दंतैः क्षताधरपुटः व्रणिताधरः श्रोणीतटेनतितंबेनाहतः संमर्दितः किंच कचेकेशेधृ
त्वाहस्तेनाननमितोनम्रीकृतः पादयोर्द्वौसद्द्व किंच अधरमधुस्यंदेनअधरामृतद्रवेनसंमोहितोविस्मृतान्यरसः कृतः एवंविधं
वितोपिकांतः श्रीकृष्णः कामप्यनिर्वचनीयांतृप्तिमवापतत्ततोहेतोः अहोआश्चर्यंकामस्यवामाविरुद्धागतिः स्थितिः अथवा
वामयतिनामयतिइतिवामापराजयकारिणीवामाभवतीज्ञावा एतेनविपरीतसुरतंस्पष्टमेवोक्तम् वामो विरुद्धशीलेस्यात्सुंदरेरम्येविक

दोर्भ्यांसंयमितःपयोधरभरेणापीडितःपाणिजैराविद्धोदशनैःक्षताधरपुटःश्रोणीतटेनाहतः हस्तेनाननमितःकचेधरमधुस्यंदेन
संमोहितःकांतःकामपितृप्तिमापतद्हो कामस्यवामागतिः ८९ मारांकेरतिकेलिसंकुलरणारंभेनयामाहसप्रायंकांतज
यायकिंचिदुपरिप्रारंभियत्साहसात् निःस्पंदाजघनस्थलीशिथिलितादोर्वल्लिरुत्कंपितंवक्षोमीलितमक्षिपौरुषरसःस्त्रीणांकु
तःसिध्यति ८८

मारेति हलायुधः नायकप्रार्थितोदंडः प्रसादस्तेनायेनियुक्तः रतिध्वनिः ९० तामेवतत्प्रसिद्धविभ्रान्तिष्टि मारांकइति कृतयाश्रीरा
धयासाहसप्रायंसाहसबहुलंकांतजयायश्रीकृष्णजयंकर्तुंतदुपरिकांतोपरिकिंचिदीषत्सुरतमितिशेषः रतिकेलिसंकुलरणे
रंभेरतिकेलिशिः संश्लेषचुंबनादिभिः संकुलेव्याप्तेरणारंभेसंग्रामोपक्रमेयत्प्रदाप्रारंभितदासाहसात्संभ्रमात्तद्घनस्थलीनिःस्पंदा
निश्चलाभूदितिशेषः कीदृशीकामस्योकःछिदंन खद्वतादयन्न किंच दोर्वल्लिर्बाहुलताशिथिलताश्लथीभूता वक्षोहृदयंउत्क
पितं अक्षिचक्षुर्मीलितंमुद्रितम् आलिंगनायकेनापिरसविशेषेणसर्वंजातमितिभावः एवंकृतोपिस्त्रीणांपौरुषरसःपुरु
षाभिलाषः कुतःकथंसिध्यतिअपितुनसिध्येदेवसर्वथैः संकीर्णसंकुलेव्याप्तइतियादवः ८०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मव८

एवंपुरुषायितेन स्वजयमलभमानायाः स्वभावं लब्ध्वा स्वजयं कृतवतीति तामेव जयसंपत्तिमाह तस्या इति एभिः पूर्वोक्तैः काम
गी० टी० शरैः पत्युर्मनः कीलितं वशीकृतं तदद्भुतमाश्चर्यमच्युत मनसाप्ययमस्य वधूमागच्छेदिति भावः कीदृशैः प्रातर्निखातैः प्रातःकाले
८१ दृशोर्नेत्रयोर्निखातैः कैस्तैरित्यत आह तस्याः राधायाः उरः पाटलपाणिजैः रक्तनखैरंकितं चिह्नितम् तस्याः दृशौ नयने निद्रयाक
षायिते लोहिते तस्या अधरशोणिमा अधररागः निर्धौतः पीतः चुंबनादिना किंच तस्या मूर्द्धजाः केशाः विलुलिताः स्रस्ताः शिथि
लिताः स्रजो माल्यानि येभ्यस्ते तस्याः दरईषत् श्लथं शिथिलं अंचलं वस्त्रांतं तादृशं कांचीदाम मेखलागुणा नीवीमोचनांतानि कामपंच

तस्याः पाटलपाणिजांकितमुरो निद्राकषाये दृशौ निर्धौतोधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः कांची
दामदरश्लथांचलमिति प्रातर्निखातैर्दृशोरेभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितम् ८१ व्याकोशः के
शपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ दष्टा बिंबाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः कांचीकां
चिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलितस्रग्धरेयं धिनोति ८२

शरत्वेन निरूपितानि अन्यत्र निखातैर्बाणैरस्य कीलितमिदमस्याश्चर्यमित्यर्थः ८१ तदेवाह व्याकोश इति इयं श्रीराधा तदपि मां धि
नोति प्रीणयति यद्यपि केशपाशः केशकलापो व्याकोशो विलुलितो जातः अलकैश्चूर्णकुंतलैस्तरलितं स्तरलितः प्रसृतम् क ४
पोलौ स्वेदलोलौ स्वेदेन सात्त्विकभावजेन चंचलौ बिंबाधरश्रीर्दष्टा खंडिता कुचकलशरुचा कांत्या हारयष्टिर्हारकलापः हारिता नि
र्जिता कांची मेखला कांचित् आशां दिशं गता चलिता तथाविधा जातापि किं कुर्वती हस्तेन स्तनजघनपदं स्तननितंबभागा
माछाद्य सद्यः शीघ्रं सत्रपं सलज्जं मां पश्यंती कीदृशी विलुलितां स्रस्तां स्रजं धारयंती मज्जायायकृतप्रयत्ना स्वयमेव प्राप्तपरानवेति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंपुरुषायितसुरतविलासमुत्का मुखपानसौभाग्यमाह मीलदृष्टीत्यादि धन्यः श्रीकृष्णः कुरंगीदृशाः मृगनयनायाः श्रीराधायाः आननं मुखं धयति पिबति धन्योहमितिसादरं राधाधरामृतं पिबतीतिभावः कीदृश्याः हर्षस्य सुरतानंदस्योत्कर्षेणाधिक्येन विमुक्तासालसानिःसहाः श्रांता व्यापारेभ्यःमात नुर्देहो यस्याः कीदृशाः नृपामायाः श्रीराधायायोतुंगौस्तनौ तयोरुपरिपरिष्वंगी आलिंगनस्वभावः एतेन सुरतविरामेपि सुरतातानैः कथिता कीदृशमाननम् केनचित्

मीलदृष्टिमिलत्कपोलपुलकं सीत्कारधाराव शादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौता
धरम् नृपामोत्तुंगपयोधरोपरिपरिष्वंगीकुरंगीदृशोहर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्या
ननं ८२

सुरवानंद[redacted]विक्षेपेण सुरतश्रमेण वा मीलदृष्टिमुद्रिताक्षि कीदृशाम् मिलतौ स्फुरद्रोमांचयोः कपोलयोः पुलकानि यत्र तत् पुनः कीदृशाम् सीत्काराणां धारास्तासांवशादधीनादव्यक्ताः अप्रकटाः आकुलाः व्याकेलयस्ता सु याः काकुः क्रीडाध्वनिविक्षेपस्तेन विकशंतः प्रकटाः एवं तोयेदंतास्तेषां अंशवः किरणास्तैर्धौतः प्रक्षालितोऽधरोयत्रता दृशम् काकुस्त्रियां विकारोयः शोकभीत्यादिभिर्ध्वनेरिसमरः ८२

Dr. Urmila Sharma Collection, Varanasi

गी०टी०
८८

अथेति। हिमालंङ्ख्यानंतरेवाराधासुरतश्रमापहृतमंडनापुनरपिमंडनवांछयामाधवंश्रीकृष्णंजगादोक्तव
ती कीदृशीस्वाधीनभर्तृका पुनःकीदृशी मुग्धासुरतसंग्रामचतुरासुंदरीवा कीदृशंकांतं मनोहरंरतिश्रां
तम् कृतसुरतश्रमम् ८४ साराधाइदंवक्ष्यमाणंसुरतांतेआनंदेन सादरंगोविंदंजगादोक्तवती कीदृशम् सह
साईषत्प्रेम्णा प्राणेशःप्रीतियुक्तम्कीदृशी नितांतखिन्नांगी स्मरजर्जरितांगी एतेनांगमेवभिन्नेन

अथकांतंरतिश्रांतमपिमंडनवांछया जगादमाधवंमुग्धाराधास्वाधीनभर्तृका ८४ अथस
हसःसुप्रीतंसुरतांतेसानितांतखिन्नांगी राधाजगादसादरमिदमानंदेनगोविंदम् ८५ रामक
रीरागेरूपकताले कुरुयदुनंदनचंदनशि शिरतरेणकरेणपयोधरे मृगमदपत्रकमत्रम
नोभवमंगलकलशसहोदरे निजगादसायदुनंदने क्रीडतिहृदयानंदनेध्रुवपदम् १

दुमदऽविपुवःसुरताभिलाषःसूचितः ८५ रागतालक्षवानोलक्षणंपूर्वमुक्तमेव अत्रस्वाधीनभर्तृकेयंनायिकापूर्वंजगा
दितियदुक्तंतद्गीतेनाह कुर्वितिसाराधायदुनंदनंजगादउक्तवती कीदृशे क्रीडतिरममाणे हृदयानंदनेचित्ताह्लादज
२२ नके किमुक्तवती हेयदुनंदननंदनंदनयादवानांहितार्थंयधृतोगोवर्द्धनोमयेति अत्रास्मिन्पयोधरे कुचेकरेणमृगमद
पत्रकंकस्तूरिकापत्ररचनांकुरु रचयकरेणविपुनःकरस्पर्शाभिलाषःसूचितः कीदृशेनकरेण चंदनादपिअतिशी

ऽतिसाभिलाषं ३

तलेन कीदृशेपयोधरे मनोभवस्यकामस्यमंगलायक
लशःपूर्णकुंभस्तस्यसहोदरेतुल्ये १ मध्य:

CC0. In Public Domain, Digitizagtion by eGangotri

किंच हेप्रियवदन्नलोचने नेत्रे त्वदधरचुंबनेन लंबितं विगलितं कज्जलमुज्वलय पुनरर्प्पय कीदृशम् भ्रमरसमूह
मर्द्दनं परान्नवजनकम् कीदृशे रतिनायकस्य कामस्य सायकान्मोचयतीति मोचने कामबाणापहारिणि यमुद्दीक्ष्य जा
ड्विजयाय कामोपि बाणान्मुंचति तादृशे लंबितं गलितं प्रोक्तं लंबमानं दूरापयोरिति त्वं कीदृशः २ किंचापरमप्याह हेशुभ
वेषरुचिरमूर्त्ते ममश्रुतिमंडले कर्णप्रदेशे कुंडले निवेशयार्प्पय कीदृशे नयनकुरंगस्य तरंगानां विकाराणां निरा
सकारे निरोधके एतेन कर्णांतविशाललोचनत्वमुक्तम् पुनः कीदृशे कामजालस्य क्रीडानुकारके वेषोऽलंकरणे के

अलिकुलगंजनसंजनकं रतिनायकसायकमोचने त्वदधरचुंबनलंबितकज्जलमुज्वलय प्रियलोचने २
नयनकुरंगतरंगविकाशनिरासकरे श्रुतिमंडले मनसिजपाशविलासधरे शुभवेषनिवेशय कुंडले ३ भ्र
मरचयं रचयंतमुपरि रुचिरं सुचिरं मम संमुखे जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ४

लिनवनेऽद्भुतभावकरइति वैजयंती २ किंच हेप्रियममसुखे अलकं चूर्णकुंतलं परिकर्मय मंडय (गंधादि) चुंबनादिना अलकं कीदृ
शम् उपरि मुखोपरि सुचिरं निरंतरं भ्रमरसमूहं भ्रमरश्रेणीं शोभां जनयंतं सजातीयबुद्ध्या भ्रमरास्तत्र पततीति भावः पुनः
कीदृशम् रुचिरं मनोहरं नर्मजनकं परिहासक्रीडाकारकम् नर्मजनः परिहाससखीजनः तस्यकं सुखरूपं वा कीदृशे
विमले निर्मले अनेन कलंकाभावः कीदृशे संमुखे संदर्शनयहाभिमुखे वा पुनः कीदृशे जितकमले येन तस्मिन् हे जि
तकमल जितमात्मनयनकोसाकमलं येन तत्संबोधनं वा तदाह विमले इ: कामस्तेन विमले प्रसन्ने परिकर्मप्रतिहृतो

सूचितः २

प्रबोधितामवकंर्मणां तिकोपमसर्वेषु ष ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हेकमलानेकृष्ण अलिकरजनीकरे ललाटचंद्रे तिलकं कुरु रचय कीदृशम् कस्तूरीरसेन निर्मितम् अतएव ललितं
गी०टी० मनोहरम् कीदृशम् विहिताकृताकलंककलाचंद्रकलंकश्शोभा सादृश्यं येन तत् कीदृशो विश्रमितो विश्रामं प्रापितोश्र
८९ मशीकरोंबुकणोयत्र तादृशो ललाटमलिकं गोधिरित्यमरः मृगाणां निर्मृगमदः कस्तूरी गंधश्शोखर इतिहारावली वलि
तंनिर्मितेयुक्त इतियादवः शीकरोंबुकणाश्शृतइत्यमरः रोहिणीशो निशानाथो रजनीकर इतिहलायुधः ५ किंच हे
मानदमानखंडनमानप्रदायक इतिवाममरुचिरे सुंदरे चिकुरे केशपाशे कुसुमानि कुरु रचय मानसजस्य कामस्य ध्वज कलंकर

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे विहितकलंककमलानन विश्रमितश्रमशीकरे ५ मम रु
चिरे चिकुरे कुरु मानद मानसजध्वजचामरे रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडामरे ६ सर
सघने जघने मम शंबरदारणवारणकंदरे मणिरसनावसनाभरणानि शुभाशय वासय सुंदरे ७

चामरतुल्ये कीदृशे रतिगलिते सुरतसमये वंधनमुक्ते शृंगारस्येष्टया सुंदरे वा कीदृशे शिखंडिनो मयूरस्य शिखंडकाश्च
इकास्त एव डामरा आटोपा आडंबरा वा चाकचिक्यानि यस्य तादृशे डामरो वाद्यभेदे स्यादाटोपेशिखिनामपीति मेदिनी ६
हे शुभाशय शुभांतःकरण मम सुंदरे जघने नितंबे मणिरसनां मणिखचितक्षुद्रघंटिकां वसनानि आभरणानि वासय परिधानं का ८९
रय कीदृशे सरसे शृंगारादिरससहिते घने निविडे च कर्मधारयः पुनः कीदृशे शंबरदारणः कामः स एव वारणः कुंजरस्त
स्य कंदरे निवासे कुंजरो वारणः करीत्यमरः ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हे रसिकजन श्रीजयदेववचसि वचनेदयासहितं हृदयं कुरु कीदृशे जयदेवे किंभूतं जयप्रदे कीदृशे मंडने दि श्यालंकारभूते पुनः कीदृशे हरिचरणस्मरणामृतेन कृतं कलिकलुषज्वरस्य खंडनं नाशो येन तादृशे यद्वा ज यदेवेति पाठे जयतीति जयः दीव्यतीति देवः हे जयदेव कृष्ण श्रीजयदेववचसि स्वहृदयं सदयं कुरु तद्वचांसि मंडये त्यर्थः कीदृशे मंडने श्रीराधालंकारसंपादके अन्यत्समानं ८ गीतोक्तमेव श्लोकेनाह रचयेति हे कृष्ण मम कु

श्रीजयदेववचसि जयदे हृदयं सदयं कुरु मंडने हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखं डने ८ रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोर्घटय जघने कांचीमञ्च स्रजा कबरीभरम् कलय वलयश्रे णीं पाणौ पदे कुरु नूपुराविति निगदितः प्रीतः पीतांबरोपि तथाकरोत् ८९

चौसं २

चयोः पत्रं पत्रिकारचनां मकरिकां रचय किंच कपोलयोश्चित्रं चित्ररचनाविशेषं कुरु किंच जघने नितंबे कांची कांचीदाम घटय परिधापय किंच कबरीभरं केशपाशसमूहं स्रजा पुष्पमालया अंचसंयोजय किंच वलयश्रेणीं कंकण समूहं पाणौ कलय कुरु किंच पदे चरणयोर्नूपुरौ कुरु इति एवमुक्तो राधया प्रीतः संतुष्टः पीतांबरः कृष्णोपि तथैवाकरोत्

एतेन स्वाधीनभर्तृकत्वमुक्तं ८९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० किंच यद्गांधर्वकलासुगानविद्यासुकौशलंनैपुण्यंप्रावीण्यं गंधर्वोमार्गादिशि वतकलान्त्संगानंदविलासाः यद्दै
८० ध्यवंविलेरनुध्यानं अनुहरणंचिंतनंच यच्चशृंगारस्यशृंगाररसस्यविवेकः संयोगादिविधानकौशलंतस्यतत्वंयथार्थज्ञा
नं किंच यत्काव्येषुकविरचनासुलीलायितं क्रीडाविलाससर्वस्वं तत्सर्वमन्यदपिचसुधियः जयदेवपंडितकवेः पंडासद
सद्विवेचिकाबुद्धिः कविर्देवताप्रसादलब्धकवित्वंतस्यश्रीगीतगोविंदतः श्रीगीतगोविंदग्रंथात् परिशोधयंतुविवेकेन वि

यद्गांधर्वकलासुकौशलमनुध्यानंचयद्दैवंशृंगारविवेकतत्वमपियत्काव्येषुलीलायितम् त
त्सर्वंजयदेवपंडितकवेः कृष्णैकतानात्मनः सानंदाः परिशोधयंतुसुधियः श्रीगीतगोविंदतः ८८

वारयंतुज्ञानंत्वित्यर्थः कीदृशाः सुधियः सानंदा आनंदसहिताः कीदृशस्य कवेः कृष्णैकतानात्मनः कृष्णेहरौ एकतानं
तदाकारमात्मामनोयस्यतस्य अथवा कृष्णस्यैकतानोमुख्य आत्मामनोयस्यां श्रीराधायां इत्यनेन श्रीराधाकृष्णोपा ८०
सकलमुक्तम् एकतानोनन्यवृत्तिरेकाग्रैकमनावपीत्यमरः ८८

Dr. Urmila Sharma Collection, Varanasi

सर्गांतिकविराचितमसाशास्ते पर्यमिति हरिर्वोयुष्मान्पातु रक्षतु कीदृशः कायव्यूहेवद्ध्यशरीरमिवाचरन् उपचितंसम्यक्
आकृतंकामनारोयस्यसः कीदृशः अनंतांगुतैः महसैः पादांबोरुहेकृतस्य चरणकमलंधारयतिधारिणीयावारिधिसुता
लक्ष्मीस्तांदिदृक्षुः द्रष्टुमिच्छुः लक्ष्मीदर्शनेतुनेत्रयुग्मेननसंभवतीति कायव्यूहंनेत्रसहस्रंकृत्वाइत्यभिप्रायः किंकुर्वन्
पर्यंकीकृतःशय्यास्थानेकृतोयोनागनायकः शेषस्तस्यफणाश्रेणीनांपंक्तीनांयेमणयस्तेषांगणेसमूहेसंक्रांतप्रति
बिंबसंवलनयासंवद्धप्रतिबिंबप्रसरणेनवपुर्विक्रियांविस्तरप्रकारंबिभ्रत्तदधत् मणीनामनंतदेहलाभेनतादृक्नेत्र

पर्यंकीकृतनगराजफणश्रेणीमणीनांगणेसंक्रांतप्रतिबिंबसंवलनयाविभ्रद्वपुर्विक्रियां पादांभोरुहधा
रिवारिधिसुतामहणांदिदृक्षुःशतैः कायव्यूहमिवाचरन्नुपचिताकूतोहरिःपातुवः ८९ त्वामप्राप्यमयिस्वयंवरपरां
क्षीरोदतीरोदरेशंकेसुंदरिकालकूटमपिबन्मूढोमडानीपतिः इत्थंपूर्वकथाभिरन्यमनसा विक्षिप्यवक्षोंचलं
राधायाःस्तनकोरकोपरिमिलन्नेत्रोहरिःपातुवः ९०

लाभोभूदित्यर्थः पद्ये वारिधितुल्यगुणोहयमानुस्तत्सुताश्रीराधातद्दर्शनमेवेनवपुषाकुर्याणोपितोषमलभमानःकायव्यूह
मिवाचरन्निति तुल्यं अस्मिन्पद्येनागराजेनमागासनंतप्रतिशोभार्थनिहितायेमणिगणाइत्यादिव्याख्येयं श्रेणीतुकथितापि
कौश्रेणीतुल्यार्थमसंहतानपीतियादवः संक्रांतःप्रतिबिंबेस्यास्त्वेत्रोसंक्रमेपिवेत्स्यपि ९० पुनःकविर्ग्रंथसमाप्तावाशी
र्वमाशास्ते त्वामितिहरिर्वःपातु हेसुंदरिमडानीपतिःरुद्रःक्षीरोदतीरोदरेक्षीरसमुद्रतटेत्वामप्राप्यकालकूटंविषमपिबदि
तिशंकेइत्यमनेनपूर्वकथाभिरन्यमनसाः अन्यमनस्कयावक्षोंचलंस्तनावरकवस्त्रंविक्षिप्यप्रसार्यराधायाःस्तनौकोरकौजातांकु

ततुपरिमिलन्नेत्रःकोमलांगोमंडितपदपंकजेति
कोरवालाविलासवर्णित ८८

गी० टी० इदानीं कविरात्मनः काव्यस्य माधुर्यादिगुणत्वं कथयति साध्वीति हे माध्वीक मद्य न भवतस्तवेयं मधुराहमिति चिन्ता साध्वी न भवति एतत्सदृशं न वा मीति चिन्तैव न कार्य्या किंच हे शर्करे त्वं च कर्कशासि कार्कश्येन रजोरूपासासीत्य-
ऐ१ र्थः किंच हे द्राक्षे त्वां के द्रक्ष्यंति आस्वादयिष्यंति अवलोकयिष्यंतीति वा किंच हे अमृत त्वमपि माधुर्यमादकादिगुणा

साध्वी माध्वीक चिंता न भवति भवतः शर्करे कर्कशासि द्राक्षे द्रक्ष्यंति के त्वाममृत मृतमसि क्षीर नीरं रसस्ते मा कंद क्रंद कांताधर धरणितलं गच्छ यच्छंति यावत् शृंगारसारं सारस्वतानि श्रीजयदेवस्य विष्वग्वचांसि ऐ१

त्विज्ञायेन गर्वो न धार्यः तदपेक्षया त्वं मृतमसि हे क्षीर ते तव रसः नीरं जलवद् अमधुरम् हे माकंद पक्वाम्रफल क्रंद विलप किंच हे कांताधर त्वं पातालं गच्छ जयदेवस्य विष्वक् समस्तेन वचांसि यावत् शृंगारसारं श्रीराधाकृष्णविषयं यच्छंति प्रयच्छंति तावत् अस्मा-भिर्न्नस्थेयं कीदृशानि सारस्वतानि सरस्वतीरससंभूतानि जयदेववाणीतामृतेन सर्वे पदार्था निराकृता इति भावः ऐ१

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० श्रीभोजदेवप्रभवस्य रामादेवीसुतस्य श्रीजयदेवकस्य पराशरादिप्रियवर्गकंठे श्रीगीतगोविंदकवित्वमस्तु स्वटीका
८२ योसर्वसेमतियोग्यतामाह साधूनामिति इह वनमालिसंज्ञादिभ्यां श्रीगीतगोविंदटीकायां भक्त्यर्थिनां साधूनां भक्ती
नांसंमतिः स्वीकारः स्यादेव विदुषामपि नानाश्रृंगाररसग्रंथनश्रमं विचार्य अस्यामादरो भवेदेव येच भक्तिपांडित्य
हीनाविरलाः परग्रंथनिंदापरास्तानर्थये याचे किं तत् मत्कृतिं भूयो वारंवारं वा सदृह टीकायामवद्यं वदंतु टीका
श्रमेषु तातेषु परनिंदेच्छा वासना स्थास्यतिचेत् भक्तिमार्गपरिशीलनेन कृतः साडवीसनेतिजा वः टीकामध्यकमा

साधूनां स्वतएव संमतिरिहस्यादेव भक्त्यर्थिनामालोच्य ग्रथनश्रमं च विदुषामस्मिन्भवेदादरः ये केचि
सरकृसुपश्रुतिपरास्तानर्थयेम कृतिं भूयोवीक्ष्य वदं त्ववद्यमिह चेत्सा वासनास्थास्यति ८२ इतिश्री
गीतगोविंदे सुप्रीतपीतांबरो नाम द्वादशः सर्गः १२

सारं ९ श्रीवदासतनूजेन नन्हे तेन वनमालिना गीत
लोक्य सारं समुद्धृतं तत्रापि स्खलितं किंचित् क्षंतुमर्हंतु सूरयः १
गोविंदटीकेयं रचिता शुभदा हृदयः २ वैशाखे कृष्णपक्षस्यैकादश्यां शुभमंगले वाराणस्यां कृता टीका नन्दे ४ क
न वनमालिना ३ कायस्थानरोत्तम गृहे मध्ये माधवसंश्रयोः रचिता गीतगोविंदटीका श्रीवनमालिना ४ क
लिंदजा तीरविहारशीलगोपांगनानां मनयनाभिरामम् वंशीरवैर्मोहितमारकोटिं वंदे सदा तं हृदयनाथमारतं ५
इति श्रीमल्लक्ष्मणचंद्र सेवकोदीच्य ज्ञातीय श्री श्रीवदास पंडितात्मज श्रीवनमालिना विरचितायां वनमालिसं

इतिश्रीगीतगोविंदटीकायां ... नामद्वादशः सर्गः १२ ग्रंथसंख्या २८०० शुभंभवतु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाण्डुलिपि: समाप्ता

MANUSCRIPT ENDS

ختم شد

Dr. Urmila Sharma Collection, Varanasi